श्रीसोमनाथसंस्कृतविश्वविद्यालय-ई-ग्रन्थमाला - ११

# तर्कभाषा
## (प्रमाणनिरूपणान्ता)

**प्रधानसम्पादकः**
**प्रो. सुकान्तकुमारसेनापतिः**
कुलपतिः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

**सम्पादकौ**
**डॉ. उमा महेश्वरी बी.** | **डॉ. जानकीशरण आचार्यः**
दर्शनविभागाध्यक्षा | दर्शनसङ्कायाध्यक्षः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

**श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्**
(राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा A+ श्रेण्या प्रत्यायितः)

श्रीसोमनाथसंस्कृतविश्वविद्यालय-ई-ग्रन्थमाला - ११

# तर्कभाषा
## (प्रमाणनिरूपणान्ता)


**प्रधानसम्पादकः**

**प्रो. सुकान्तकुमारसेनापतिः**

कुलपतिः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

**सम्पादकौ**

**डॉ. उमा महेश्वरी बी.** | **डॉ. जानकीशरण आचार्यः**

दर्शनविभागाध्यक्षा | दर्शनसङ्कायाध्यक्षः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्



**श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्**

(राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा A+ श्रेण्या प्रत्यायितः)

**प्रकाशकः -**

**प्रो. (डॉ.) ललितकुमारः पटेलः**

प्रभारी कुलसचिवः,

श्रीसोमनाथसंस्कृतयुनिवर्सिटी,

राजेन्द्रभुवनरोड, वेरावलम् - ३६२ २६५

गीर-सोमनाथजनपदम्, गुजरातम्

दूरभाषः - ०२८७६-२४४५३२

www.sssu.ac.in

**सहसम्पादकः समन्वयकश्च -**

**डॉ. कार्तिकः पण्ड्या**

संशोधनाधिकारी,

श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

***© Shree Somnath Sanskrit University, Veraval-2024***

**Note :** The responsibility of the facts stated, opinions expressed, or conclusions reached, is entirely that of the authors and that Shree Somnath Sanskrit University accepts no responsibility for him/her.

संस्करणम् : प्रथमम्

वर्षम् : नवम्बर- २०२४

प्रतिकृतयः : E-Book in PDF

आई.एस.बी.एन. : ९७८-९३-८३०९७-६७-८

मूल्यम् : निःशुल्कम्

मुद्रकः : झेनिथ ग्राफिक, व्रज-प्लाझा, जैनदेरासरमार्गः,
वेरावलम् ३६२२६५, जि. गीर-सोमनाथः, गुजरातम्

Shree Somnath Sanskrit University E-Grantha Series - 11

# Tarkabhāṣā

## (Upto Pramāṇa Nirūpaṇa)

*Chief Editor*

**Prof. Sukanta Kumar Senapati**

Vice Chancellor

Shree Somnath Sanskrit University, Veraval

*Editors*

**Dr. Uma Maheswari B.**

Head, Department of Darshana

**Dr. Janakisharan Acharya**

Dean, Faculty of Darshana

Shree Somnath Sanskrit University, Veraval.

**Shree Somnath Sanskrit University, Veraval**

(Accredited by NAAC with A+ Grade)

**Published by -**

**Prof. (Dr.) Lalitkumar Patel**
Registrar (I/c,
Shree Somnath Sanskrit University, Veraval
Rajendra Bhuvan Road, Veraval - 362265
Dist. - Gir-Somnath, Gujarat
Phone - 02876-244532
Website - www.sssu.ac.in

**Assistant Editor & Co-ordinator -**

**Dr. Kartik Pandya**
Research Officer,
Shree Somnath Sanskrit University, Veraval

© ***Shree Somnath Sanskrit University, Veraval-2024***

**Note :** The responsibility of the facts stated, opinions expressed, or conclusions reached, is entirely that of the authors and that Shree Somnath Sanskrit University accepts no responsibility for him/her.

| | |
|---|---|
| Edition | : Frist |
| Year | : November -2024 |
| Copy | : E-Book in PDF |
| ISBN | : 978-93-83097-67-8 |
| Price | : Free |
| Printed By | : Zenith Graphic, Vraj Plaza, Jain Derasar Road, Veraval-362265, Dist. Gir-Somnath, Guj. (India) |

# शुभाशंसनम्

संस्कृतं भारतस्य हृदयं विवेकस्य च वाणी अस्ति। भारतीयविद्या-परम्परायाः आधारभूतम् इदं संस्कृतम् विविधज्ञानविज्ञानयुक्तं राजते। एतस्मिन् विद्यमाना दार्शनिकविचारसम्पत्तिः अत्यन्तं गम्भीरा विलक्षणा चास्ति। तत्र न्यायदर्शनस्य गाम्भीर्यं अन्यादृशमेव राजते। इदं हि न्यायदर्शनं वेदशास्त्रमूलकं सुतर्कसहितं न्यायशास्त्रसम्बद्धविविधान् विचारान् प्रकाशयति।

न्यायशास्त्रस्य अतिगम्भीरान् विचारान् सहजतया अवबोधयितुं तर्कभाषा इत्याख्यस्य प्रकरणग्रन्थस्य तर्कभाषा-पाङ्क्ताध्ययनम् इति कार्यशालान्तर्गतस्य सरलमानकसंस्कृतेन विश्वविद्यालयपरिसरस्य डॉ.बी.उमामहेश्वरी, डॉ.जानकीशरणआचार्यः एवञ्च श्रीबाबडेश्वरेति संलग्नसंस्कृतमहाविद्यालयस्य डॉ.भरतशीलु इति त्रिभिरध्यापकैः सुनिरूपणं कृतम् इति मोदावहः एष विषयः। तर्ककर्कषस्य विषयाणां सहजतया छात्रावबोधाय त्रिभिर्विद्वद्भिः कृतोऽयं प्रयत्नः सुतराम् अभिनन्दनीयः। अस्य ग्रन्थस्य अध्ययनेन ग्रहणधारणपटूनां शिष्याणां बुद्धिम् अधिरोहति तर्कशास्त्रम् इति निश्चप्रचम्। तर्कभाषानिरूपणस्य योऽयं उपायः विश्ववद्यालयस्य प्रकाशनविभागेन आश्रितः, सः नितान्तं छात्रसमाजं उपकरिष्यति। अनेन कार्येण गम्भीरशास्त्रसिद्धान्तानां सहजावबोधो भविष्यतीति विश्वसिमि।

एतादृश सरलग्रन्थरचनाद्वारा छात्राणां न्यायशास्त्रं प्रति अभिरुचिः वर्धिष्यते इति न संशयः। विश्वविद्यालयस्य प्रकाशनविभागे कार्यरतानां डॉ.कार्तिकपण्ड्या तत्-सहयोगिनां, ज्ञानसङ्क्रमणे उपकृतानां त्रयाणामपि अध्यापकानां कृते च साधुवादं वितनोमि।

**भवदीयः**

प्रो. सुकान्तकुमार सेनापति
कुलपतिः

## सम्पादकीयम्

'काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्' इत्युभ्युक्ति न्यायदर्शनस्य सर्वशास्त्रोपकारकत्वं निगदति। अत्र हि दर्शने प्रमाणप्रमेयादीनां सूक्ष्मो विचार उपलभ्यते। न्यायशास्त्रीयाः ग्रन्थाः विद्वदपश्चिमानां कृतेऽपि बुद्धेः निकयत्वेन परिगण्यन्ते। न्यायदर्शने प्रतिपादिताः विषयाः केवलं पाण्डित्यप्रदर्शनाय परमतनिराकरणाय वा न सन्ति परं शास्त्रीयप्रमेयं प्रति विपरीत भावना असम्भावना संशयः इत्यादिदोषान् निवर्त्य नैकाभिः उपपतिभिः श्रुत्यर्थं दृढयन्ति। अत एवोक्तं श्रीमदुदयनाचार्यैः 'न्यायचर्चेयमीशस्य मननप्रतिदेशभाक्' इति। भगवत्पादाः शङ्कराचार्याः अपि अमुमेवार्थं न्यगादिषुः वेदान्तचूडामणौ 'अभावना वा विपरीतभावना संभावना विप्रतिपत्तिरस्याः। संसर्गयुक्तं न विमुञ्चति ध्रुवं विक्षेपशक्तिः क्षपयत्यजस्रजम्।।' इति। प्रमाणप्रमेयादिषोडशपदार्थानां तत्त्वज्ञानात् निःश्रेयसाधिगमः इति न्यायसूत्रकारः असूत्रयत्। सामान्यतः न्यायशब्दः नियमेन ईयते इति व्यत्पत्त्या नियमयुक्ते व्यवहारे प्रयुज्यते, परं शास्त्रग्रन्थेषु नीयते प्राप्यते विवक्षितार्थसिद्धिः अनेन इति व्युत्पत्त्या येन प्रतिपाद्यविषयस्य सिद्धिर्भवति, येन सिद्धान्तः साधितो भवति स एव 'न्यायः' उच्यते। एवञ्च प्रतिज्ञाहेतूदाहरणोपनयनिगमनात्मकः पञ्चावयवयुक्तो वाक्यसमूहः न्याय इति कथ्यते। अत एवोक्तं वात्सयायनभाष्ये ''साधनीयस्यार्थस्य यावति शब्दसमूहें सिद्धिः परसमाप्यते स पञ्चावयवपेतवाक्यात्मको न्यायः'' इति। ''प्रमाणैरर्थपरीक्षणं न्यायः'', ''समस्तप्रमाणादर्थाधिगतिर्न्यायः'' इत्यादिलक्षणानाम् अयमवार्थः फलितार्थः यत् न्यायशब्दः यत्र प्रमाणसाहाय्येन वस्तुविचारः क्रियते तत्र सर्वत्र प्रयोक्तुं शक्यते इति। एतस्य दर्शनस्य त्रिविधा प्रवृत्तिः दृश्यते - उद्देशो लक्षणं परीक्षा च। तेषु नामधेयेन पदार्थमात्रकथनम् इति उद्देशं निरूप्य उद्दिष्टस्य तत्त्वव्यवच्छेदकोऽसाधारणो धर्मो लक्षणं निरूप्यत। लक्षितस्य लक्षणं घटते न वा इति प्रमाणैरर्थावधारणं परीक्ष। इत्थं प्रमाणादीनां पदार्थानां तत्त्वज्ञानान् निःश्रेयसाधिगमप्रकारोऽपि सूत्रकारेण वर्णितः

vii ''दुःखजन्मप्रवृत्रतिदोषमिथ्याज्ञानानाम् उत्तरोत्तरापाय तदनन्तरस्यापायाद् अपवर्गः'' इति। एवञ्च प्रमाणादीनां षोडशपदार्थानां सम्यग् ज्ञाने एव निःश्रेयसप्रेप्सुभिः सर्वैः यत्नाः आस्थेय इत्ययं न्यायदर्श्य प्रतिपाद्यो विषयः।

एतादृशविषयस्य प्रतिपादकानि सन्ति बहूनि न्यायसूत्रतद्भाष्यादीनि प्रौढग्रन्थरत्नानि यानि समासव्याासशैल्या न्यायप्रमेयांशान् निरूपयन्ति। तत्रा अन्यतमः ग्रन्थरत्नः विद्यते केशवमिश्रविरचितः 'तर्कभाषा' इति। सिद्धान्तेषु उदयनाचार्यं अनुसरन् ग्रन्थकारोऽयं द्वादशशतकीय इति विज्ञायते, यतः त्रयोदशशतकीयैः अन्यैः व्याख्याततत्वात् तत्रपूर्वतनः इति ज्ञातुं शक्यते। प्रमाणप्रमेयाख्याभागद्वयविभक्तोऽयं तर्कभाषाग्रन्थः न्यायदर्शनसम्मतषोडश-पदार्थान् निर्दिश्य सर्वादौ प्रमाणं निरूपयति। प्रमाणानि चतुर्धा विभज्य क्रमशः चतुर्णां प्रमाणानां सप्रपञ्चं निरूपणं करोति। अर्थापत्त्यनुपलब्ध्योः पृथक्प्रामाण्यं दूषयित्वा प्रामाण्यस्य परतस्त्वं साधयति। तदनु आत्मेन्द्रियार्थप्रमेयाणां निरूपणप्रसङ्गे सविस्तरं संशयादीन् अन्यानपि पदार्थान् विशदयति। सोऽयं तर्कभाषाग्रन्थः विश्वविद्यालयस्यास्य शास्त्रिपाठ्यक्रमे तृतीये वर्षे अनिवार्यप्रश्नपत्ररूपेण निर्धारितः अस्ति। तर्कप्रधानग्रन्थत्वात् अस्मिन् ग्रन्थे छात्रेः काठिन्यम् अनुभूयते स्म। अतः महाविद्यालयच्छात्राणाम् अनुरोधकारणात् ग्रन्थस्यास्य निर्धारितभागस्य सरलमानकसंस्कृतेन व्याख्या स्यात् इति विश्वविद्यालयेन निश्चितः। यद्यपि तर्कभाषायाः सन्ति बहवः व्याख्याग्रन्थाः। परं स्नातकस्तरीयच्छात्रान् उद्दिश्य सरलसंस्कृतेन एतस्य ग्रन्थस्य व्याख्या अत्र छात्राणम् अवबोधाय प्रस्तुता अस्ति। एतादृशस्य ग्रन्थस्य प्रकाशनसन्दर्भे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य मान्याः कुलपतयः प्रेरणामूर्तयः प्रो. सुकान्तकुमारसेनापतिवर्याः सादरं स्मर्यन्ते। तैः एतस्य ग्रन्थस्य विषये शुभाशंसनं प्रदाय अस्य ई-पुस्तकरूपेण प्रकाशना अनुमतिः प्रदत्ताः अतः तान् प्रति धन्यतावचांसि आविष्कुर्महे। तत्कालीनकुलपतिः अथ च प्रभारीकुलसचिवः प्रो. ललितकुमारपटेलवर्यः अपि सन्दर्भेऽस्मिन् यथोचितं मार्गदर्शनं प्रादात्, अतः तं प्रत्यपि कार्तज्ञ्यं विनिवेदयामः। प्रत्यक्षपरोक्षरूपेण साहाय्यम् आचरितवद्भ्यः कार्तज्ञ्यं विज्ञाप्य ग्रन्थोऽयं भगवतः सोमनाथस्य सन्निधौ समर्पयामः।

**- सम्पादकौ**

# विषयानुक्रमणिका


| क्रमः | शीर्षकम् | लेखकस्य नाम | पृष्ठस-ङ्ख्या |
|---|---|---|---|
| १ | तर्कभाषा परिचयः | डॉ.जानकीशरण आचार्य | २ |
| २ | तर्कभाषा पदार्थविवेचनम् | डॉ.जानकीशरण आचार्य | २६ |
| ३ | प्रमाणपदार्थः, निर्गुणद्रव्योत्पत्तिः धारावाहिकज्ञानं च | डॉ.जानकीशरण आचार्य | ४९ |
| ४ | प्रत्यक्षप्रमाणम् | डॉ.जानकीशरण आचार्य | १०० |
| ५ | सन्निकर्षनिरूपणम् | डॉ. बी. उमा महेश्वरी | १३८ |
| ६ | अनुमानप्रमाणम् | डॉ. बी. उमा महेश्वरी | १५० |
| ७ | अनुमानम् द्वैविध्यम् | डॉ. बी. उमा महेश्वरी | १६५ |
| ८ | हेत्वाभासाः | डॉ. बी. उमा महेश्वरी | १८९ |
| ९ | उपमानप्रमाणम् | डॉ. भरतभाई शीलु | २०५ |
| १० | शब्दप्रमाणम् | डॉ. भरतभाई शीलु | २१६ |

# पाठः – १

## तर्कभाषा-परिचयः

### १.१ प्रस्तावना

धर्मः अर्थः कामः मोक्षः च इति चतुर्षु पुरुषार्थेषु मोक्षः एव एतादृशः पुरुषार्थः अस्ति यम् अधिकृत्य समग्रे संस्कृत-साहित्ये विचाराः प्राप्यन्ते। समस्तम् अपि वैदिकसाहित्यं मोक्षप्राप्तेः उपायान् विविधप्रकारेण विवृणोति। यत् शास्त्रं एतस्य मोक्षस्य प्राप्त्युपायान् दर्शयति तत् "दर्शनम्" इति पदेन कथ्यते। **"काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्"** इति उक्तिः भारतीयदर्शनेषु न्याय-वैशेषिकदर्शनस्य महत्त्वपूर्णं स्थानं प्रतिपादयति। अस्मिन् दर्शने प्रमाण-प्रमेयाणाम् अत्यन्तं सूक्ष्मतया विचारः कृतो वर्तते। न्यायदर्शनस्य ग्रन्थानां भाषा बहुकठिना अस्ति। अतः अस्मिन् व्याघ्रमुखशास्त्रे अर्थात् न्यायशास्त्रे प्रविविक्षूणां कृते न्यायशास्त्रीयाणां प्रमाणप्रमेयादीनां सुलभतया ज्ञानाय श्रीकेशवमिश्रेण तर्कभाषा विरचिता अस्ति। अस्मिन् पाठे वयं न्यायवैशेषिकदर्शनपरिचयेन सह तर्कभाषायाः तत्कर्तुश्च परिचयं ज्ञास्यामः

## १.२ दर्शन-परिचयः

'दृशिर् - प्रेक्षणे' इति प्रेक्षणार्थक-दृश्-धातोः भावे करणे वा अर्थे 'ल्युट्'-प्रत्ययः क्रियते। ल्युटः स्थाने 'अन'-आदेशे कृते स्वादिकार्ये च कृते 'दर्शनम्' इति पदं सिद्ध्यति। दर्शनशब्दस्य अर्थो भवति "दृश्यते ज्ञायते वस्तुतत्त्वम् अनेन इति दर्शनम्" इति। वस्तुनः यथार्थज्ञानं येन साधनेन भवति, तस्य साधनस्य नाम दर्शनम्। दर्शन-शब्दे करणार्थे 'ल्युट्'-प्रत्ययः कृतः अस्ति। करणम् अर्थात् क्रियायां प्रकृष्टोपकारकम्, 'साधनम्' इति वा। अतः येन साधनेन इदं वस्तुजातम्, ब्रह्म, जीवात्मा, प्रकृतिः च याथातथ्येन दृश्यते, अर्थात् परीक्ष्यते तत् साधनम् एव 'दर्शनम्' इति प्रसिद्धम्। अर्थात् दर्शनं शास्त्रं कथ्यते। शास्त्रं नाम यत् हितं शास्ति उपदिशति वा तत् शास्त्रम्। मनुष्याणां प्रवृत्तिः शुभकर्मसु भवेत्, अशुभकर्मभ्यः तेषां निवृत्तिः भवेत् इति शास्त्रम् उपदिशति। दर्शनम् अपि सर्वेषां परम-कल्याणाय मोक्षस्य मार्गं प्रदर्शयति। अतः दर्शनस्य शास्त्रत्वं प्रसिद्धम् एव। शास्त्रस्य लक्षणं श्लोकवार्तिके ग्रन्थे एवम् उक्तम् –

**प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा।**
**पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते॥** (श्लोकवार्तिकम्)

अर्थात् यत् पुंसां नित्येन अनित्येन वा प्रवृत्तिं निवृत्तिं वा अवबोधयति तत् शास्त्रम्। शास्त्रस्य लक्षणान्तरम् अपि प्राप्यते। तद्यथा –

**शासनात् शंसनात् शास्त्रं शास्त्रमित्यभिधीयते।**
**शासनं द्विविधं प्रोक्तं शास्त्रलक्षणवादिभिः॥**

शास्त्रपदस्य अर्थद्वयं (१) शासनम्, (२) शंसनं चेति। शासनं द्विविधं प्रवृत्तिः निवृत्तिः वा। शासनार्थे शास्त्रं क्रियाप्रेरकम् अतः पुरुषतन्त्रम्। शंसनार्थे शास्त्रं ज्ञानपरम् अतः वस्तुतन्त्रम्।

भारतीयदर्शनानि द्विविधानि सन्ति – वैदिक - दर्शनानि अवैदिक - दर्शनानि च। प्रमुखानि वैदिकदर्शनानि षट् सन्ति। तद्यथा - (१) न्याय-दर्शनम्, (२) वैशेषिक-दर्शनम्, (३) सांख्य-दर्शनम्, (४) योग-दर्शनम्, (५) पूर्व-मीमांसा-दर्शनम्, (६) उत्तर-मीमांसा-दर्शनं च। प्रमुखानि अवैदिक-दर्शनानि त्रीणि सन्ति – (१) चार्वाक-दर्शनम्, (२) बौद्ध-दर्शनम्, (३) जैन-दर्शनं चेति। वैदिक-दर्शनानाम् अपरं नाम 'आस्तिक-दर्शनानि' इति, अवैदिक-दर्शनानाम् अपरं नाम 'नास्तिक-दर्शनानि' इति।

वस्तुतः भारतीय-दर्शनानि द्विधा विभज्यन्ते – आस्तिक-दर्शनानि, नास्तिक-दर्शनानि चेति। "अस्ति परलोके मतिः यस्य स आस्तिकः", "नास्ति परलोके मतिः यस्य सः नास्तिकः" इति आस्तिक-नास्तिक-शब्दयोः अर्थः। अथवा **"अस्ति पारलौकिक-विषय-प्रवृत्तिः यस्य स आस्तिकः"**, "नास्ति च पारलौकिक-विषय-प्रवृत्तिः यस्य सः नास्तिकः" इत्यपि व्युत्पत्तिः कथयितुं शक्यते। "अस्तिनास्ति दिष्टं मतिः" इति पाणिनीय-सूत्रेण (८.८.६०) ठक्प्रत्यये 'ठस्येक' इति सूत्रेण ठकारस्य स्थाने 'इक'-आदेशे स्वादि-कार्ये च आस्तिक-नास्तिक-पद-द्वयं सिद्ध्यति। तत्र यानि दर्शनानि वेदानां परमं प्रामाण्यं स्वीकुर्वन्ति तानि आस्तिक-दर्शनानि इति व्यवह्रियन्ते। आस्तिक-दर्शनानि पूर्वोक्तरीत्या षट् सन्ति (१) न्याय-दर्शनम्, (२) वैशेषिक-दर्शनम्, (३) सांख्य-दर्शनम्, (४) योग-दर्शनम्, (५) पूर्व-मीमांसा-दर्शनम्, (६) उत्तर-मीमांसा-दर्शनं च। "नास्तिका वेदनिन्दकाः" इति वचनानुरोधात् यानि दर्शनानि वेदानां प्रामाण्यं न स्वीकुर्वन्ति तानि नास्तिक-दर्शनानि

इति व्यवह्रियन्ते। नास्तिक-दर्शनानि त्रीणि सन्ति - (१) चार्वाक-दर्शनम्, (२) बौद्ध-दर्शनम्, (३) जैन-दर्शनं चेति।

षड् आस्तिक-दर्शनानि त्रिधा विभक्तानि भवन्ति। तद्यथा – (१) द्वौ तर्कौ, (२) द्वे सांख्ये, (३) द्वे मीमांसे च। समानतन्त्रत्वात् अयं विभागः कृतः। द्वौ तर्कौ यथा – १. न्याय-दर्शनं वैशेषिक-दर्शनं च प्रमाण-पदार्थ-विचार-प्रधानौ। द्वे सांख्ये यथा – १. सांख्य-दर्शनं योग-दर्शनं च प्रकृति-पुरुषयोः विचार-प्रधाने, द्वे मीमांसे च १. पूर्व-मीमांसा उत्तर-मीमांसा च धर्म-ब्रह्म-विचारप्रधाने। एते तु आस्तिकनास्तिक-दर्शनानां प्रधानभेदाः सन्ति। एतद् अतिरिच्य अपि दर्शनानि सन्ति। एतेषां दर्शनानां प्रकारं वयम् अधस्तनाकृत्या सम्यक् ज्ञातुं शक्नुमः–

अधोलिखित-तालिकायाम् आस्तिक-दर्शनानां प्रवर्तकानाम् महर्षीणां नामानि प्रस्तूयन्ते–



| क्रमः | दर्शनस्य नाम | प्रवर्तकः महर्षिः | सूत्र-ग्रन्थः |
|---|---|---|---|
| १. | न्याय-दर्शनम् | महर्षिः गौतमः | न्याय-सूत्रम् |
| २. | वैशेषिक-दर्शनम् | महर्षिः कणादः | वैशेषिक-सूत्रम् |
| ३. | सांख्य-दर्शनम् | महर्षिः कपिलः | सांख्य-सूत्रम् |
| ४. | योग-दर्शनम् | महर्षिः पतञ्जलिः | योग-सूत्रम् |
| ५. | पूर्व-मीमांसा | महर्षिः जैमिनिः | मीमांसा-सूत्रम् |
| ६. | उत्तर-मीमांसा | महर्षिः बादरायणः (वेदव्यासः) | ब्रह्म-सूत्रम् (वेदान्त-सूत्रम्) |

नास्तिकदर्शनेषु चार्वाकदर्शनस्य प्रवर्तकः बृहस्पतिः, बौद्धदर्शनस्य तथागतः बुद्धः तथा च जैनदर्शनस्य भगवान् महावीरः प्रवर्तकः अस्ति।

## १.३ न्यायवैशेषिक-दर्शन-परिचयः

सामान्यतः न्यायशब्दः नियमेन ईयते इति व्युत्पत्त्या नियमयुक्ते व्यवहारे प्रयुज्यते। यथा न्यायालयः, न्यायाधीशः इति। परं शास्त्रग्रन्थेषु न्यायशब्दस्य अर्थः अस्ति - “प्राप्यते विवक्षितार्थस्य सिद्धिः अनेन इति न्यायः”। न्यायभाष्यकारेण उक्तम् “प्रमाणैर्थपरीक्षणं न्यायः” इति।

अर्थात् यत्र प्रमाणसाहाय्येन वस्तुविचारः क्रियते तत्र न्यायशब्दः प्रयुज्यते। न्याय-पदस्य व्युत्पत्तिः बहुधा प्राप्यते। तद्यथा -

१. "नियमेन ईयते" इति न्यायः।

२. "प्रमाणैः अर्थ-परीक्षणं न्यायः"। (वात्स्यायन-भाष्ये)

३. "नीयते=प्राप्यते अयनं=मोक्षः येन असौ न्यायः"।

४. "नीयते=अधिगम्यते विवक्षितार्थस्य सिद्धिः येन असौ न्यायः"।

इदं न्यायदर्शनं न्यायविद्या, गौतमीविद्या, अक्षपाददर्शनम्, तत्त्वशास्त्रम्, हेतुविद्या, वादार्थः, तर्कविद्या, आन्वीक्षिकी, प्रमाणविद्या इत्यादिभिः नामभिः प्रसिद्धम् अस्ति। वात्स्यायनभाष्ये उक्तं यत् इयम् आन्वीक्षिकी सर्वविद्याप्रकाशिका, सर्वकर्मसाधिका, सर्वधर्माणाम् आधारभूता च अस्ति –

**प्रदीपः सर्वविद्यानाम् उपायः सर्वकर्मणाम्।**
**आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्तिता ॥**
**सम्यग्-दर्शनसम्पन्नः कर्मभिर्न निबध्यते।**
**दर्शनेन विहीनस्तु संसारं प्रतिपद्यते॥** इति।

अस्य न्यायदर्शनस्य सर्वशास्त्रोपकारता सुतरां प्रसिद्धा। चतुर्दशविद्यास्थानेषु अपि न्यायविद्या परिगणिता अस्ति। विद्यास्थानं नाम चतुर्दशानां शास्त्राणां पुरुषार्थसाधनोपायत्वम्। विद्यास्थानानि यथा –

**पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः।**
**वेदास्स्थानानि विद्यानां धर्मस्य तु चतुर्दश॥**
(याज्ञवल्क्यस्मृतिः, १.३)

न्यायदर्शनस्य प्रवर्तकः महर्षिः गौतमः अस्ति। अस्य अक्षपादः, मेधातिथिः इत्यादीनि नामानि न्यायदर्शनस्य दृश्यन्ते। अस्य न्यायदर्शनस्य प्राचीनतमः मूलग्रन्थः अस्ति – न्यायसूत्राणि। ग्रन्थेऽस्मिन् पञ्च अध्यायेषु प्रायः ५२८ सूत्राणि सन्ति। एतस्मिन् दर्शने षोडशपदार्थाः स्वीकृताः सन्ति, येषां तत्त्वज्ञानात् निःश्रेयसाधिगमः भवति। यथोक्तं सूत्रकारेण **“प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थानानां तत्त्वज्ञानात् निःश्रेयसाधिगमः”** इति। प्रमाणादीनां तत्त्वज्ञानम् उद्देश-लक्षण-परीक्षाभिः भवति। अत एव एतस्य शास्त्रस्य प्रवृत्तिः त्रिविधा अस्ति उद्देशः, लक्षणम्, परीक्षा च। अस्मिन् दर्शने उक्तं यत् यथार्थज्ञानसाधनानां प्रमाणादीनां तत्त्वज्ञानात् मोक्षप्राप्तिः भवति।

सूत्रकारेण एतेषां पदार्थानां तत्त्वज्ञानेन मोक्षप्राप्तेः क्रमः एवं दर्शितः अस्ति – **“दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानाम् उत्तरोत्तरापाये तदनन्तरापायात् अपवर्गः”** इति। अर्थात् दुःखादीनां यद्यत् उत्तरं तस्य तस्य विनाशे सति तदनन्तरस्य अपायात् अपवर्गः। तत्र षोडशपदार्थानां तत्त्वज्ञानात् मिश्याज्ञानापाय दोषः नष्टः भवति, दोषापाये प्रवृत्तिः अपैति, प्रवृत्तेः अपायात् निमित्ताभावे जन्म अपैति। जन्मापाये दुःखम् अपैति। दुःखस्य अत्यन्तापायश्च मोक्षः। एवञ्च प्रमाणादीनां षोडशपदार्थानां यथार्थज्ञानम् एव मोक्षप्राप्तेः कारणम् इति न्यायदर्शनस्य सङ्क्षेपतः प्रतिपाद्यो विषयः।

न्यायशास्त्रस्य प्रवृत्तिः द्विधा दृश्यते – प्रमेयप्रधाना, प्रमाणप्रधाना च। येषु ग्रन्थेषु प्रमेयविचाराणां प्राधान्यं, ते प्रमेयप्रधानां ग्रन्थाः। येषु ग्रन्थेषु प्रमाणविचाराणां प्राधान्यम् अस्ति ते प्रमाणप्रधानाः ग्रन्थाः। महर्षिगौतमारभ्य गङ्गेशोपाध्यायपर्यन्तं प्रायः सर्वेषु ग्रन्थेषु प्रमेयाणां प्राधान्यं दृश्यते। इयं प्रवृत्तिः “पदार्थमीमांसा”, प्राचीनन्यायः” चेति कथ्यते। परं गङ्गेशोपाध्यायस्य (१४ शती) “तत्त्वचिन्तामणिः” इति ग्रन्थेन “प्रमाणमीमांसा” प्रवृत्तिः समारब्धा, यस्यां प्रमाणप्रधानग्रन्थानां विपुलता अस्ति। इयं धारा “नव्य-न्यायः” इति कथ्यते। न्यायदर्शने नूतनायाः धारायाः प्रवर्तकत्वात् अयं ग्रन्थः अत्यन्तं महत्त्वपूर्णः वर्तते।

प्राचीन-नव्यन्याययोः न केवलं प्रमेय-प्रमाण-विचाराणां भेदः, परं भाषायां शैल्यां च भेदः अस्ति। प्राचीन-न्याय-शास्त्रस्य शैली सरला सुगमा आडम्बर-रहिता च दृश्यते। प्रायोगिक-शैल्यां रचिताः ग्रन्थाः संक्षिप्ताः सन्ति। परं नव्यन्यायशास्त्रग्रन्थेषु प्रकारता-विशेष्यता-संसर्गता-प्रतियोगिता-अनुयोगिता-अवच्छेदकता-निरूप्यता-निरूपकता-प्रभृतयः शब्दाः आधिक्येन दृश्यन्ते। नव्यन्यायशैली परिमार्जिता आडम्बर-पूर्णा स्वरूपतः दुर्गमा अपि शैलीसौन्दर्यात् अर्थतः स्पष्टा भवति। प्राचीन-न्याय-शास्त्रे विषय-प्रतिपादनं तलस्पर्शि न अपि तु स्थूलं भवति। नव्य-न्याये तु विषय-प्रतिपादनं सूक्ष्मातिसूक्ष्मविचारप्रधानं सत् सर्वाङ्ग-स्पर्शि भवति।

वैशेषिक-दर्शनस्य प्रवर्तकः महर्षिः कणादः अस्ति। "कणं कणम् अत्ति" इति अन्वर्थ-नाम्ना प्रसिद्धः कणादः। वैशेषिक-दर्शनम् "औलूक्य-दर्शनम्", "काणाद-दर्शनम्" इत्यादि-नाम्ना अपि दर्शन-जगति प्रसिद्धम्। 'विशेषः' इति पदार्थं ये स्वीकुर्वन्ति ते वैशेषिकाः। विशेष-शब्दात् ठक्-प्रत्यये कृते तस्य इकादेशे स्वादि-कार्ये कृते च वैशेषिकाः इति रूपं सिद्धं भवति। अयं पदार्थः अस्मात् पदार्थात् भिन्नः इति पदार्थयोः भेदः विशेष-नामकेन पदार्थद्वारा स्पष्टः भवति। अतः अयं विशेष-नामकः पदार्थः यस्मिन् दर्शने स्वीक्रियते तत् दर्शनम् वैशेषिक-दर्शनम् इति नाम्ना प्रसिद्धिं गतम्। वैशेषिक-शब्दस्य उत्पत्ति-

विषये क्वचित् मतभेदः अपि दृश्यते। केचन वदन्ति यत् वैशेषिक-दर्शनस्य प्रवर्तकः महर्षिः कणादः विशेषस्य उपदेष्टा, इदं दर्शनं न्याय-सांख्यादि-दर्शन-तुलनया द्रव्यादि-पदार्थानां प्रतिपादने विशिष्टम् अस्ति इति कारणात् अस्य दर्शनस्य नाम वैशेषिकम् इति जातम्। अन्ये तु कथयन्ति यत् पञ्चम-पदार्थस्य 'विशेषस्य' अतिरिक्ततया कथनात् वैशेषिकम् इति नाम। वस्तुतः अन्तिमं मतं किञ्चित् युक्ति-युक्तम् अस्ति इति बहुभिः स्वीक्रियते। वैशेषिक-सूत्रेषु १० अध्यायाः प्रत्यध्यायम् आह्निक-द्वयम्, ३७० सूत्राणि च सन्ति। वैशेषिक-दर्शनानुसारं द्रव्य-गुण-कर्मादिपदार्थानां तत्त्वज्ञानात् मोक्षप्राप्तिः भवति।

प्राचीनन्याये ये षोडश पदार्थाः स्वीकृताः सन्ति तेषां पदार्थानां वैशेषिकैः स्वीकृतेषु सप्त-पदार्थेषु अन्तर्भावः कर्तुं शक्यते इति नवीन-नैयायिकानां मतम्। एवं अनयोः समानतन्त्रत्वं सिध्यति।

## १.४ न्यायवैशेषिक-ग्रन्थानां परिचयः

न्याय-दर्शनस्य मुख्यग्रन्थानां परिचयः संक्षेपेण अधः प्रस्तूयते –

| ग्रन्थस्य नाम | रचयिता | वैशिष्ट्यम् |
|---|---|---|
| न्याय-सूत्रम् | महर्षिः गौतमः | न्याय-दर्शनस्य आधारभूतः सूत्रग्रन्थः |

| | | |
|---|---|---|
| वात्स्यायन-भाष्यम् | वात्स्यायनः | न्यायसूत्राणां प्रसिद्धः भाष्य-ग्रन्थः |
| न्याय-भाष्य-वार्तिकम् | उद्द्योतकरः | वात्स्यायन-भाष्यस्य उपरि वार्तिकग्रन्थः |
| न्यायवार्तिक-तात्पर्यटीका (न्यायनिबन्धनम्) | वाचस्पति-मिश्रः | न्यायवार्तिकस्य व्याख्यात्मकोऽयं ग्रन्थः महता पाण्डित्येन गभीरेण च विचारेण सम्पन्नः। |
| न्याय-मञ्जरी | जयन्त-भट्टः | प्रमुख-न्याय-सूत्राणाम् उपरि लिखितः अयं ग्रन्थः नैकान् न्याय-विषयान् सूक्ष्मतया प्रतिपादयति। |
| न्यायसारः | भासर्वज्ञः | न्याय-दर्शनस्य प्रकरण-ग्रन्थः यत्र प्रमाण-मीमांसायाः प्राधान्यम्, अस्ति। |
| तत्त्व-चिन्तामणिः | गङ्गेशोपाध्यायः | नव्य-न्यायस्य प्रवर्तकः अत्यन्तं प्रसिद्धः ग्रन्थः। |

| | | |
|---|---|---|
| दीधिति-टीका (तत्त्वचिन्तामणेः टीका) | रघुनाथ-शिरोमणिः | तत्त्व-चिन्तामणेः प्रसिद्धाः टीका |
| माथुरी (तत्त्वचिन्तामणेः टीका) | मथुरानाथ-तर्कवागीशः | मथुरानाथः रघुनाथ-शिरोमणेः प्रधान-शिष्यः आसीत्। अनेन स्वगुरोः दीधिति-टीकाम् अवलम्ब्य माथुरी टीका कृता। |
| जागदीशी | जगदीश-तर्कालङ्कारः | रघुनाथ-शिरोमणेः दीधिति-टीकां विषयीकृत्य जागदीशी नाम्ना टीका जगदीश-भट्टाचार्येण विरचिता। |
| गादाधरी | गदाधर-भट्टाचार्यः | रघुनाथ-शिरोमणेः दीधितिव्याख्यायाः व्याख्या |
| न्याय-सिद्धान्त-मुक्तावली | विश्वनाथ-पञ्चाननः | कारिकाभिः निबद्धः अयं ग्रन्थं न्याय-विषयान् सरलतया प्रतिपादयति। |
| तर्क-भाषा | केशव-मिश्रः | न्याय-दर्शनस्य षोडश-पदार्थानां निरूपणं सरलरीत्या प्राप्यते। |

| | | |
|---|---|---|
| तर्क-सङ्ग्रहः | अन्नम्भट्टः | न्याय-दर्शने प्रवेशाय अत्यन्तं सरलरीत्या संक्षिप्त-रीत्या च लिखितः प्रकरणग्रन्थः। |

एतेषु ग्रन्थेषु केशवमिश्रविरचिता "तर्कभाषा" इति न्यायदर्शनस्य प्रकरणग्रन्थः अस्ति, यस्य परिचयः अग्रे प्रस्तूयते।

वैशेषिक-दर्शनस्य प्रमुखग्रन्थानां संक्षेपेण परिचयः अधः प्रस्तूयते –

| ग्रन्थस्य नाम | रचयिता | वैशिष्ट्यम् |
|---|---|---|
| वैशेषिक-सूत्रम् | महर्षिः कणादः | वैशेषिक-दर्शनस्य आधारभूतः सूत्रग्रन्थः |
| प्रशस्तपाद-भाष्यम् | प्रशस्तपादः | वैशेषिक-दर्शनस्य प्रसिद्धं भाष्यम् |
| किरणावली-टीका | उदयनाचार्यः | प्रशस्तपाद-भाष्यस्य व्याख्यारूपः ग्रन्थः |
| न्याय-कन्दली-टीका | श्रीधराचार्यः | प्रशस्तपादस्य 'पदार्थधर्म-संग्रहः' इति ग्रन्थस्य टीकारूपः ग्रन्थः |

| | | |
|---|---|---|
| न्याय-लीलावती | वल्लभाचार्यः | वैशेषिक-दर्शनस्य सिद्धान्तानां प्रतिपादकः प्रकरण-ग्रन्थः |

## १.५ तर्कभाषायाः तत्कर्तुश्च परिचयः

केशवमिश्रप्रणीता तर्कभाषा न्यायदर्शनस्य प्रकरणग्रन्थः अस्ति। अयं प्रमाणप्रमेयाख्यभागद्वये विभक्तः। अत्र प्रमाणपदार्थनिरूपणे षोडशपदार्थान् निर्दिश्य प्रमाकरणं प्रमाणमिति प्रमाणपदार्थं निरूप्य तदङ्गतया कारणत्व-करणत्वे निरूपिते स्तः। तदनु अत्र 'अनधिगतार्थगन्तृ प्रमाणम्' इति मतं खण्डितम् अस्ति। चतुर्धा प्रमाणानि विभज्य सविकल्पक-निर्विकल्पकभेदात् षड्विधसन्निकर्षसहितं प्रत्यक्षप्रमाणं विचारितम्। अनुमानप्रकरणेऽपि अनुमानप्रमाणम् अपि स्वार्थपरार्थभेदात् विभज्य परार्थानुमानस्य लक्षणं अवयवपञ्चकं तथा च सप्रकारं हेत्वाभासाः प्रतिपादिताः सन्ति। अतिदेशवाक्यार्थस्मरणसहकृतं गोसादृश्यविशिष्टपिण्डज्ञानम् उपमानम् इति उपमानं वर्णयित्वा शब्दप्रमाणं सलक्षणं सप्रकारं च वर्णितम्। अत्र अर्थापत्त्यनुपलब्ध्योः पृथक्प्रमाणत्वं खण्डयित्वा न्यायदर्शनरीत्या चत्वारि प्रमाणानि निरूपितानि सन्ति। प्रमाणप्रकरणान्ते प्रामाण्यस्य परतस्त्वं युक्तम् इति साधितम्। तदनु आत्मेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखाप-वर्गभेदेन द्वादशप्रमेयाणां निरूपणं कृतम्। तत्रैव बुध्याद्यष्टगुणोपेतः

देहेन्द्रियादिव्यतिरिक्तः प्रतिशरीरं भिन्नः भिन्नः नित्यः आत्मा अपि वर्णितः अस्ति। ततः परं संशयादिनिग्रहस्थानान्ताः पदार्थाः सलक्षणं प्रतिपादिताः सन्ति।

तर्कभाषायाः रचयिता श्रीकेशवमिश्रः द्वादशशतकीयः मिथिलायां लब्धजन्मा आसीत् इति ज्ञायते। अनेन स्वग्रन्थे न कोऽपि ग्रन्थः ग्रन्थकारो वा निर्दिष्टः। न वा अनेन स्वस्य परिचयः ग्रन्थे प्रदत्तः अस्ति। सिद्धान्तप्रतिपादने अयं प्रायः उदयनाचार्यम् अनुसरति। कुसुमाञ्जलीतः कानिचन उद्धरणानि उद्धृतानि। अस्य शिष्यः गोवर्धनमिश्रः इति ज्ञायते। केशवमिश्रस्य ईषत् परिचयः स्वशिष्यमाध्यमेन प्राप्यते। गोवर्धनमिश्रेण तर्कभाषायाः उपरि टीका लिखिता, यत्र एषः वदति –

**विजयश्रीतनूजन्मा गोवर्धन इति श्रुतः।**
**तर्कानुभाषां तनुते विविच्य गुरुनिर्मिताम्॥**

अनेन श्लोकेन ज्ञायते यत् अस्य गुरुः तर्कभाषाकारः केशवमिश्रः अस्ति। एषः अन्यत्रापि लिखति यत् केशवमिश्रेण 'पद्मनाभः' इति स्वाग्रजसकाशात् तर्कशास्त्रम् अधीत्य स्वान्तःसुखाय तर्कभाषा प्रणीता आसीत् –

श्रीविश्वनाथाजुन-पद्मनाभानुजो गरीयान् बलभद्रजन्मा।
तनोति तर्कानधिगत्य सर्वान् श्रीपद्मनाभाद्विदुषो विनोदम्॥
इति।

तर्कभाषा अत्यन्तं सङ्क्षेपेण परं गभीरतया न्यायसम्मतान् पदार्थान् प्रतिपादयति। अतः एतस्याः विद्वत्सु भूयान् आदरः अस्ति। एतस्याः उपरि प्रायः चतुर्दश टीकाग्रन्थाः सन्ति। तद्यथा –

| | |
|---|---|
| १. गोवर्धनमिश्र-कृता | तर्कभाषा-प्रकाशिका |
| २. गोपीनाथ-कृता | उज्ज्वला-टीका |
| ३. सोमबिल्व-वेङ्कट-कृता | तर्कभाषा-भावटीका |
| ४. रामलिङ्ग-कृता | न्यायसंग्रहटीका |
| ५. माधवदेव-कृता | सारमञ्जरी |
| ६. भास्करभट्ट-कृतः | परिभाषादर्पणः |
| ७. बालचन्द्र-कृता | तर्कभाषा-प्रकाशिका |
| ८. चिन्नभट्ट-कृता | तर्कभाषा-प्रकाशिका |
| ९. गणेशदीक्षित-कृता | तत्त्वप्रबोधिनी |
| १०. कौण्डिन्यदीक्षित-कृता | तर्कभाषा-प्रकाशिका |
| ११. केशवभट्ट-कृता | तर्कदीपिका |
| १२. गौरीकण्ठसार्वभौम-कृता | तर्कभाषा-प्रकाशिका |

| | |
|---|---|
| १३.नागेशभट्ट-कृता | युक्तिमुक्तावली |
| १४.विश्वकर्म-कृतः | न्यायप्रदीप |

तर्कभाषायाः उपरि एतादृशाः टीकाग्रन्थाः एतस्याः लोकप्रियताविषये, विद्वन्मान्यताविषये, प्रमाणम् अस्ति। अयं लघुग्रन्थः भारतीयदर्शनानां प्रवेशद्वारम् अस्ति यत्र न्यायवैशेषिकयोः पदार्थानां सिद्धान्तानां च मिश्रितं निरूपणम् अस्ति।

----------

## प्रकृतपाठस्य सारः

- चतुर्विधपुरुषार्थेषु मोक्षप्रतिपादकं शास्त्रं दर्शनम् इति कथ्यते।
- "काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्" इति उक्तिः भारतीयदर्शनेषु न्याय-वैशेषिकयोः महत्त्वपूर्णं स्थानं वक्ति।
- दर्शनशब्दस्य अर्थो भवति यत् "दृश्यते ज्ञायते वस्तुतत्त्वम् अनेन इति दर्शनम्"। वस्तुनः यथार्थज्ञानं येन साधनेन भवति, तस्य साधनस्य नाम दर्शनम्।
- शास्त्रं नाम यत् हितं शास्ति उपदिशति वा तत् शास्त्रम्।
- भारतीयदर्शनानि द्विविधानि सन्ति - वैदिक-दर्शनानि अवैदिक-दर्शनानि च।

- यानि दर्शनानि वेदानां परमं प्रामाण्यं स्वीकुर्वन्ति तानि आस्तिक-दर्शनानि इति व्यवह्रियन्ते।
- आस्तिक-दर्शनानि षट् सन्ति (१) न्याय-दर्शनम्, (२) वैशेषिक-दर्शनम्, (३) सांख्य-दर्शनम्, (४) योग-दर्शनम्, (५) पूर्व-मीमांसा-दर्शनम्, (६) उत्तर-मीमांसा-दर्शनं च।
- "नास्तिका वेदनिन्दकाः" इति वचनानुरोधात् यानि दर्शनानि वेदानां प्रामाण्यं न स्वीकुर्वन्ति तानि नास्तिक-दर्शनानि इति व्यवह्रियन्ते।
- नास्तिक-दर्शनानि त्रीणि सन्ति - (१) चार्वाक-दर्शनम्, (२) बौद्ध-दर्शनम्, (३) जैन-दर्शनं चेति।
- शास्त्रग्रन्थेषु न्यायशब्दस्य अर्थः अस्ति - "प्राप्यते विवक्षितार्थस्य सिद्धिः अनेन इति न्यायः"।
- इदं न्यायदर्शनं न्यायविद्या, गौतमीविद्या, अक्षपाददर्शनम्, तत्त्वशास्त्रम्, हेतुविद्या, वादार्थः, तर्कविद्या, आन्वीक्षिकी, प्रमाणविद्या इत्यादिभिः नामभिः प्रसिद्धम् अस्ति।
- न्यायदर्शनस्य प्रवर्तकः महर्षिः गौतमः अस्ति। अस्य अक्षपादः, मेधातिथिः इत्यादीनि नामानि न्यायदर्शनस्य दृश्यन्ते।
- न्यायदर्शने षोडशपदार्थाः स्वीकृताः सन्ति, येषां तत्त्वज्ञानात् निःश्रेयसाधिगमः भवति।

- वैशेषिक-दर्शनस्य प्रवर्तकः महर्षिः कणादः अस्ति। अत्र सप्त पदार्थाः स्वीकृताः सन्ति।
- प्राचीनन्याये ये षोडश पदार्थाः स्वीकृताः सन्ति तेषां पदार्थानां वैशेषिकैः स्वीकृतेषु सप्त-पदार्थेषु अन्तर्भावः कर्तुं शक्यते इति नवीन-नैयायिकानां मतम्।
- केशवमिश्रप्रणीता तर्कभाषा न्यायदर्शनस्य प्रकरणग्रन्थः अस्ति।
- तर्कभाषायाः रचयिता श्रीकेशवमिश्रः द्वादशशतकीयः मिथिलायां लब्धजन्मा आसीत् इति ज्ञायते।

* * *

## अभ्यासः

### (अ) एकेन वाक्येन समाधानं लिखत।

१ कति विद्यास्थानानि प्रसिद्धानि सन्ति? कानि च तानि?

२ वैशेषिकदर्शनस्य प्रणेता कः?

३ आस्तिकदर्शनानि कति सन्ति?

४ न्यायसूत्रेषु कति अध्यायाः सूत्राणि च सन्ति?

५ न्यायमञ्जरी ग्रन्थस्य प्रणेता कः?

६ पुरुषार्थाः कतिविधाः सन्ति?

७ दुःखस्य अत्यन्तापायः किम्?

८ प्रशस्तपादभाष्यं कस्य दर्शनस्य अस्ति?

९ न्यायदर्शनस्य प्रवर्तकः कः?

१० बृहस्पतिप्रणीतं दर्शनं किं मन्यते?

११ "विशेषः" इति पदार्थः कस्मिन् दर्शने स्वीकृतम्?

१२ नास्तिकदर्शनानि कति सन्ति? कानि च तानि?

१३ किं नाम दर्शनम्?

१४ तर्कभाषायाः रचयिता कः?

१५ भारतीयदर्शनानि कतिविधानि सन्ति? कानि च तानि?

**(आ) योग्यं विकल्पं योजयत।**

| | |
|---|---|
| १. तर्कभाषा | (क) महर्षिः कणादः |
| २. गङ्गेसोपाध्यायः | (ख) न्यायभाष्यम् |
| ३. वात्स्यायनः | (ग) बादरायणः |
| ४. औलूक्यदर्शनम् | (घ) नव्यन्यायः |
| ५. उत्तरमीमांसा | (ङ) प्रकरणग्रन्थः |

**(इ) व्याख्यात्मकरूपेण उत्तरं लिखत।**

१. आस्तिकशब्दस्य अर्थः

२. नास्तिकशब्दस्य अर्थः

३. न्यायशब्दस्य अर्थः

४. वैशेषिकशब्दस्य अर्थः

५. चतुर्विधः पुरुषार्थः

**(ई) निबन्धात्मकरूपेण उत्तरं लिखत।**

१. आस्तिकनास्तिकदर्शनानां परिचयं लिखत।

२. न्यायदर्शनस्य परिचयं प्रतिपाद्य तर्कभाषाग्रन्थस्य तत्कर्तुश्च परिचयं लिखत।

**(उ) परियोजनाकार्यम्**

१. भारतीयदर्शनानां भेदोपभेदानां विहङ्गावलोकनं कुरुत।

* * *

## उत्तराणि – पाठः – १

**(अ) एकेन वाक्येन समाधानं लिखत।**

१. चतुर्दश। पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः।
वेदास्स्थानानि विद्यानां धर्मस्य तु चतुर्दश॥

२. महर्षिः कणादः

३. षट्। न्याय-वैशेषिक-सांख्य-योग-पूर्वमीमांसा-
उत्तरमीमांसाः चेति।

४. पञ्च अध्यायाः, ५२८ सूत्राणि च।

५. जयन्तभट्टः

६. चतुर्विधा

७. मोक्षः

८. वैशेषिकदर्शनस्य

९. महर्षिः गौतमः

१०. चार्वाकदर्शनम्

११. वैशेषिकदर्शने

१२. त्रीणि। चार्वाक-बौद्ध-जैनदर्शनानि।

१३. दृश्यते ज्ञायते परमतत्त्वम् अनेन इति दर्शनम्।

१४. केशवमिश्रः

१५. द्विविधानि। आस्तिकानि नास्तिकानि च।

(आ) योग्यं विकल्पं योजयत।

१. (ङ)

२. (घ)

३. (ख)

४. (क)

५. (ग)

* * *

# पाठः – २

# तर्कभाषा-पदार्थविवेचनम्

## २.१ प्रस्तावना

"प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" इत्युक्त्यनुसारेण निष्फले कार्ये न विदुषां प्रवृत्तिः। अतः एव भारतीयपरम्परायां संस्कृतग्रन्थप्रणेतारः निर्मीयमाणस्य ग्रन्थस्य प्रारम्भे एव अनुबन्धचतुष्टयं कण्ठतः शब्दतो वा प्रतिपादयन्ति तेन प्रयोजनस्य ज्ञानम् अनायासेन एव भवति। प्रयोजनज्ञानात् अध्येतुः ग्रन्थाध्ययने प्रवृत्तिर्जायते। अत्र ग्रन्थकारः मङ्गलाचरणं विधाय ग्रन्थस्यास्य अनुबन्धचतुष्टयं प्रतिपादयति। ततः न्यायदर्शनसम्मतान् षोडशपदार्थान् निर्दिश्य अस्य शास्त्रस्य त्रिविधां प्रवृतिं दर्शयति। समग्रे न्यायदर्शने सूत्रकारेण पदार्थाः उद्दिष्टाः सन्ति, तेषां लक्षणं परीक्षा च इह कर्तव्या भवति। अस्मिन् पाठे एतान् विषयान् ग्रन्थस्य पङ्क्त्याधारेण वयं पठिष्यामः।

## २.२ मङ्गलाचरणम्

(मूलम्)

**बालोऽपि यो न्यायनये प्रवेशम् अल्पेन वाञ्छत्यलसः श्रुतेन।**
**संक्षिप्तयुक्त्यन्विततर्कभाषा प्रकाश्यते तस्य कृते मयैषा॥**

यः अलसः बालः स्वलेन अध्ययनेन एव न्यायशास्त्रस्य सिद्धान्तेषु प्रवेशं प्राप्तुम् इच्छति, तस्य कृते मया ग्रन्थकारेण केशवमिश्रेण एषा सङ्क्षिप्त-युक्त्यन्विता तर्कभाषा प्रकाश्यते इति मङ्गलाचरणस्य शाब्दिकोऽर्थः।

ग्रन्थादौ ग्रन्थमध्ये ग्रन्थान्ते च मङ्गलमाचरणीयम् इति शिष्टाचारात्, **"मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्ति आयुष्मत्पुरुषाणि च अध्येतारश्च सिद्धार्था यथा स्युः"** इति महाभाष्योक्तेश्च चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्तये प्रेक्षावत्प्रवृत्त्यर्थं च विषयप्रयोजने निर्दिशन् ग्रन्थकारः वस्तुनिर्देशात्मकं मङ्गलाचरणं करोति। शिष्यशिक्षार्थं तन्मङ्गलाचरणं ग्रन्थतः निबध्नाति च। मङ्गलाचरणं त्रिविधं प्रसिद्धम् - (१) नमस्कारात्मकम्, (२) आशीर्वादात्मकम्, (३) वस्तुनिर्देशात्मकं चेति। यत्र स्वगुरुं देवतां परमात्मानं प्रति नमस्कारः विधीयते तत् नमस्कारात्मकं मङ्गलाचरणम् उच्यते। यथा **"वागर्थाविव**

**सम्पृक्तौ वागर्थ....**" इति। यत्र स्वस्य कृते, स्वशिष्याणां कृते वा आशीः काम्यते, तत् आशीर्वादात्मकं मङ्गलाचरणं कथ्यते, यथा "**या सृष्टिः स्रष्टुराद्या वहति.....**" इति। यत्र तु साक्षात् ग्रन्थस्य विषयवस्तु प्रतिपाद्यते तत् वस्तुनिर्देशात्मकं मङ्गलाचरणं कथ्यते। यथा अत्रैव ग्रन्थकारेण साक्षात् ग्रन्थस्यस्य अनुबन्धचतुष्टयं कथितम् अस्ति।

अयं तर्कभाषाग्रन्थः न्यायदर्शनस्य प्रकरणग्रन्थः अस्ति। प्रकरणग्रन्थो नाम यः ग्रन्थः शास्त्रस्य एकदेशेन सह सम्बद्धो भूत्वा शास्त्रकार्यान्तरम् एव साधयति, सः प्रकरणग्रन्थः उच्यते। यथोक्तम् –

**"शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरे स्थितम्।**
**आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः॥"**
(पाराशर-उपपुराणम्, २८/२१)

अस्मिन् मङ्गलाचरणे ग्रन्थकारेण ग्रन्थस्यास्य नाम "तर्कभाषा" इति कथितम्। तर्कभाषा शब्दस्य व्युत्पत्तिः तु एवं भवितुम् अर्हति – "तर्कयन्ते प्रतिपाद्यन्ते इति तर्काः (प्रमाणादयः षोडशपदार्थाः तर्काः), ते भाष्यन्ते अनया इति तर्कभाषा। अर्थात् प्रमाणादिषोडशपदार्थानां व्याख्या अस्मिन् ग्रन्थे विद्यते इति कारणात् एतस्य ग्रन्थस्य नाम

तर्कभाषा अस्ति। अयं ग्रन्थः " यथा नाम तथा गुणः" इति उक्तिं सार्थकं करोति।

मङ्गलाचरणे "बाल" इति पदं पारिभाषिकम् अवगन्तव्यम्। सामान्यतया बालः इत्युक्ते यः मातुः स्तनपानं करोति सः अबोधशिशुः बाल इति निगद्यते। परम् अत्र बालः इति पदं तादृशस्य बालस्य कृते विद्यते येन काव्य-कोष-व्याकरणादिग्रन्थाः पठिताः सन्ति, यः विषयम् अवगन्तुं धारयितुं च शक्नोति, परन्तु येन न्यायशास्त्रस्य अध्ययनं न कृतम् अस्ति। अतः "अधीतकाव्यकोषव्याकरणकलापः किन्त्वनधीतन्याय-शास्त्रो बालः" इति बालशब्दस्य व्युत्पत्तिः व्याख्याकारैः उक्ता अस्ति। मङ्गलाचरणस्थः अलस-शब्दः इदं सूचयति यत् यद्यपि विद्याध्ययनम् अतिकठिनं भवति, तत्र परिश्रमकर्तारः अध्येतारः विरलाः भवन्ति, तथापि शिष्यवत्सलस्य गुरोः करुणावशात् जडमतिः बालः अपि विषयग्रहणे समर्थो भवति। अतः यः बालः कठोरपरिश्रमभयात् न्यायशास्त्रस्य अध्ययनं कर्तुं नेच्छति, तस्य कृतेऽपि इयं तर्कभाषा अल्पेन श्रुतेन अर्थात् स्वल्पाध्ययनेन एव न्यायशास्त्रे प्रवेशं कारयितुं समर्था अस्ति। यतो हि एषा तर्कभाषा सङ्क्षिप्तयुक्तिभिः समन्विताः अस्ति। अतः न्यायसिद्धान्तानाम् अनायासेन ज्ञानम् एव एतस्या तर्कभाषायाः प्रयोजनम् अस्ति।

## २.३ अनुबन्धचतुष्टयम्

शास्त्राध्ययने प्रवृत्तेः पूर्वं शास्त्रस्य प्रतिपाद्यः विषयः कः? प्रयोजनं किम्? कः एतस्य शास्त्रस्य अधिकारी? शास्त्रस्य शास्त्रेण वा प्रतिपाद्यस्य विषयस्य च कः सम्बन्धः? इत्येते प्रश्नाः मनसि उद्भवन्ति। अतः सर्वेषां शास्त्राणाम् आदौ ग्रन्थकारैः अनुबन्धचतुष्टयं प्रतिपाद्यते। एते विषयादयः चत्वारः अंशाः "अनुबन्धचतुष्टयम्" इति व्यवह्रियन्ते। अनुबन्धचतुष्टयं विना प्रेक्षावतां ग्रन्थे प्रवृत्तिरेव न स्यात्। किञ्च प्रकरणग्रन्थः येन शास्त्रैकदेशसम्बद्धः भवति, तत्तच्छास्त्रीयैव अनुबन्धैः स ग्रन्थः अनुबन्धयुक्तो भवेत्। अन्यथा शास्त्रप्रकरणोर्भिन्न-विषयादिकारणात् तच्छास्त्रेण अस्य ग्रन्थस्य असम्बद्धत्वप्रसङ्गाद् असम्बद्धप्रलपितोऽयं ग्रन्थः इति आपद्येत। अनुबन्ध इति शब्दस्य व्युत्पत्तिलभ्योऽर्थो भवति - अनु स्वज्ञानाद् अनन्तरं बध्नन्ति शास्त्रे ग्रन्थे वा आसञ्जयन्ति प्रवर्तयन्ति ये ते अनुबन्धाः इति। अर्थाद् यस्य ज्ञानानन्तरं ज्ञाता कस्मिँचित् शास्त्रे ग्रन्थे वा प्रवर्तते, स अनुबन्ध इत्युच्यते। यदि अनु-उपसर्गपूर्वकात् बन्ध् धातोः करणार्थे घञ्प्रत्ययः क्रियते तर्हि अनुबन्ध इत्यस्य अर्थो भवति—अनुबध्यते शास्त्रं यैस्ते अनुबन्धाः।

संस्कृतवाङ्मये शास्त्रादौ एतद् अनुबन्धचतुष्टयं निर्णेयं भवति, अन्यथा शास्त्रे प्रवृत्तिर्न स्यात्। अतो भट्टपादैरपि उक्तम्—

ज्ञातार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते।
ग्रन्थादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः॥ इति।

सर्वस्यैव हि शास्त्रस्य कर्मणो वाऽपि कस्यचित्।
यावत् प्रयोजनं नोक्तं तावत् तत् केन गृह्यते॥
(मीमांसाश्लोकवार्तिकम्)

एते अनुबन्धाः चत्वारः भवन्ति — (१) अधिकारी, (२) विषय, (३) सम्बन्धः, (४) प्रयोजनं च।




अनुबन्धचतुष्टये विषयः प्रयोजनं चेति शास्त्रारम्भप्रयोजकौ इति तु सिद्धम् एव। तत्र स्वार्थप्रतिपत्तारम् अनाश्रित्य शास्त्रस्य प्रवृत्त्ययोगाद् आदौ अधिकारी अपेक्षितः। तस्य च अधिकारिणो विषयबोधमन्तरेण अप्रवृत्तेः विषयस्य अधिकार्यनन्तरं निरूपणं क्रियते। विषयस्य च

शक्यप्रतिपाद्यत्वसिद्धये सम्बन्धस्य विषयाद् आनन्तर्यमुच्यते। प्रयोजनस्य च चरमत्वं प्रसिद्धमेव।

तर्कभाषायाः मङ्गलाचरणे ग्रन्थकारः ग्रन्थस्य अनुबन्धचतुष्टयं निर्दिशति। यः अलसः बालः अल्पेन अध्ययनेन अत्यन्तकठिने न्यायशास्त्रे प्रवेशं वाञ्छति, सः एतस्य ग्रन्थस्य अधिकारी अस्ति। न्यायशास्त्रे उक्तानां प्रमाणप्रमेयादीनां षोडशपदार्थानां यथार्थज्ञानम् एतस्य ग्रन्थस्य विषयः अस्ति। अयं ग्रन्थः षोडशपदार्थानां प्रतिपादकः अस्ति, षोडशपदार्थाः च प्रतिपाद्याः सन्ति इति प्रतिपादक-प्रतिपाद्यसम्बन्धः अस्ति। प्रयोजनं तु षोडशपदार्थानां तत्त्वज्ञानात् मोक्षप्राप्तिः इति।

## २.४ षोडशपदार्थाः

तर्कभाषाकारः न्यायशास्त्रस्य प्रथमं सूत्रं प्रदर्शयन् तर्कभाषाग्रन्थस्य आरम्भं करोति। तेन सह अस्य सूत्रस्य अर्थम् अपि स्वयं प्रतिपादयति —

(मूलम्)

“प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः” इति न्यायस्यादिमं सूत्रम्।

अस्यार्थः – प्रमाणादिषोडशपदार्थानां तत्त्वज्ञानात् मोक्षप्राप्तिर्भवतीति। न च प्रमाणादीनां तत्त्वज्ञानं सम्यग्ज्ञानं तावद्भवति यावदेषामुद्देशलक्षणपरीक्षाः न क्रियन्ते।

न्यायदर्शनस्य प्रथमं सूत्रम् अस्ति — “प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः” इति। अस्मिन् सूत्रे न्यायदर्शनसम्मताः षोडशपदार्थाः कण्ठतः उक्ताः सन्ति। ते यथा –

(१) प्रमाणेन - (यथार्थज्ञानस्य साधनम्)
(२) प्रमेयः - (प्रमाणेन यस्य ज्ञानं भवति, सः प्रमेयः)
(३) संशयः - (एकस्मिन् धर्मिणि विरुद्धनानाधर्माणां परिज्ञानम्)
(४) प्रयोजनम् - (येन प्रयुक्तः मनुष्यः कर्मणि प्रवर्तते तत्)

(५) दृष्टान्तः - (यस्मिन् विषये वादिप्रतिवादिनोः समानं ज्ञानम् अस्ति सः)

(६) सिद्धान्तः - (प्रामाणिकरूपेण स्वीकृतः अर्थः)

(७) अवयवः - (अनुमानवाक्यस्य एकदेशः)

(८) तर्कः - (अनिष्टप्रसङ्गः)

(९) निर्णयः - (निश्चयात्मकं ज्ञानम्)

(१०) वादः - (तत्त्वज्ञानस्य इच्छुकानां वादिप्रतिवादिनां कथा)

(११) जल्पः - (जयाभिलाषिणोः वादिप्रतिवादिनोः कथा)

(१२) वितण्डा - (स्वपक्षस्थापनहीना कथा)

(१३) हेत्वाभासः - (हेतुवद् आभासन्ते ये ते अथवा हेतोः देषाः)

(१४) छलः - (अन्याभिप्रायेण उक्तस्य शब्दस्य अन्यार्थस्य कल्पना)

(१५) जातिः - (असद् उत्तरम्)

(१६) निग्रहस्थानम् - (पराजयहेतुः)

न्यायसूत्रकारेण उक्तं यत् एतेषां षोडशपदार्थानां तत्त्वज्ञानात् मोक्षप्राप्तिः भवति। अत्र “इति” शब्दः हेतुवाचकः अस्ति। तस्य अयम् अर्थः यत् एतेषां प्रमाणादीनां षोडशपदार्थानां तत्त्वज्ञानं तावत्पर्यन्तं न

भवितुम् अर्हति यावत् एतेषाम् उद्देशः, लक्षणम्, परीक्षा च न क्रियते। उद्देशः अर्थात् कस्यापि पदार्थस्य नाममात्रेण कथनम्। तस्य पदार्थस्य असाधारणधर्मस्य कथनं लक्षणम् उच्यते। एतादृशः असाधारणधर्मः तस्मिन् पदार्थे भवितुम् अर्हति उत न इति विचारः परीक्षा उच्यते।

### २.५ त्रिविधा शास्त्रप्रवृत्तिः

न्यायशास्त्रशास्त्रोक्तानां प्रमाणप्रमेयादिषोडशपदार्थानां तत्त्वज्ञानात् मोक्षप्राप्तिः भवतीति प्रतिपादितम्। पदार्थतत्त्वज्ञानस्य क्रमः अपि ग्रन्थकारेण प्रोक्तः। इदानीम् एतस्मिन् विषये न्यायभाष्यकारस्य वात्स्यायनस्य सम्मतिम् अपि प्रदर्शयति —

(मूलम्)

**यदाह भाष्यकारः – "त्रिविधा चास्य शास्त्रस्य प्रवृत्तिरुद्देशो लक्षणं परीक्षा चेति"।**

**उद्देशस्तु नाममात्रेण वस्तुसङ्कीर्तनम्। तच्चास्मिन्नेव सूत्रे कृतम्। लक्षणं तु असाधारणधर्मवचनम्। यथा गोः सास्नादिमत्त्वम्। लक्षितस्य लक्षणमुपपद्यते नवेति विचारः परीक्षा। तेनैते लक्षणपरीक्षे प्रमाणादीनां तत्त्वज्ञानार्थं कर्तव्ये।**

न्यायभाष्यकारेण वात्स्यायनेन कथितं यत् अस्य न्यायशास्त्रस्य प्रवृत्तिः त्रिधा भवति – (१) उद्देशः, (२) लक्षणम्, (३) परीक्षा च।




"उद्देशो लक्षणं परीक्षा च" इति भाष्यपङ्क्तौ 'उद्देश'शब्दस्य लक्षणम् अस्ति - "नाममात्रेण वस्तुसङ्कीर्तनम्"। अर्थात् प्रमाणम्, प्रमेयः, संशयः इत्यादिना केवलं नाममात्रेण वस्तुनः कथनम्। अयम् उद्देशः स्वयं सूत्रकारेण अस्मिन्नेव सूत्रे षोडशपदार्थानां नामग्रहणेन कृतः अस्ति। अस्मिन् लक्षणे सर्वाणि अपि पदानि आवश्यकानि सन्ति। यदि मात्रपदं विहाय "नाम्ना वस्तुसङ्कीर्तनम्" इत्येव लक्षणं क्रियेत तर्हि प्रमाणादिलक्षणे इदम् अतिव्याप्तं स्यात्। यतो हि "प्रमाकरणं प्रमाणम्" इत्यत्रापि नाम्ना प्रमाणपदार्थः सङ्कीर्तितः अस्ति। यदि केवलं "वस्तुसङ्कीर्तनम्" इत्येव लक्षणं क्रियेत तर्हि एतस्य लक्षणे परीक्षायां च अतिव्याप्तिः स्यात्। यतो हि लक्षणे परीक्षायां चापि वस्तुसङ्कीर्तनं भवति। अतः ग्रन्थकारेण उद्देशस्य निर्दुष्टं लक्षणम् "नाममात्रेण

वस्तुसङ्कीर्तनम्” इति प्रतिपादितम्। न्यायशास्त्रस्य आरम्भिके सूत्रे प्रमाण-प्रमेयादिपदार्थानां नाममात्रम् उक्त्वा यः उपदेशः कृतः अस्ति सः न्यायशास्त्रस्य उद्देशात्मकप्रवृत्तेः उदाहरणम् अस्ति। उद्देशस्य इदं लक्षणं ग्रन्थकारेण “तत्र नामधेयेन पदार्थमात्रस्याभिधानमुद्देशः” (न्यायभाष्यम्, १/१/२) इति भाष्योक्तलक्षणं मनसि निधाय कृतम् अस्ति।

## २.६ लक्षण-निरूपणम्

सम्प्रति लक्षणस्य लक्षणम् उच्यते - “असाधारणधर्मवचनम्” इति। लक्षणशब्दस्य अर्थो भवति “लक्षणकथनम्”। लक्षणकथनस्य अर्थो भवति “असाधारणधर्मस्य प्रतिपादनम्”। अतः लक्षणस्य लक्षणम् आगतम् – “असाधारणधर्मवचनम्” इति। कस्यापि पदार्थस्य वस्तुनः वा लक्षणस्य प्रयोजनं भवति लक्ष्यभूतपदार्थेन इतरपदार्थस्य व्यावृत्तिः व्यवहारप्रवृत्तिश्च। यथा गोः लक्षणस्य प्रयोजनम् अस्ति ‘समानजातीय-महिषादिचतुष्पदप्राणिभ्यः
विजातीयचतुष्पदभिन्नप्राणिभ्यः च व्यावृत्तिः अर्थात् भेदः, अत एव उच्यते “समानाऽसमानजातीयव्यवच्छेदो हि लक्षणार्थः” इति। अयमेव असाधारणधर्मः ‘गो’शब्दव्यवहारस्य प्रवर्तकः अस्ति। एवञ्च ‘इतरव्यावृत्तिः’ ‘व्यवहारः’ चेति लक्षणस्य द्वे प्रयोजने स्तः।

असाधारणधर्मस्य अर्थात् विशेषधर्मः सः उच्यते यः केवले स्वलक्ष्यभूते पदार्थे एव भवति। यदि कश्चिद् धर्मः, स्वलक्ष्यातिरिक्ते भिन्ने पदार्थेऽपि तिष्ठति तर्हि सः 'लक्षणम्' न उच्यते। यतो हि सः धर्मः 'अतिव्याप्तः" भवति। अतः एतस्मिन् लक्षणे 'अतिव्याप्तिदोषः' अस्ति। लक्षणे एतादृशाः त्रयः दोषाः भवितुम् अर्हन्ति। अतः एव "अतिव्याप्त्यव्याप्त्यसम्भवेतिदोषत्रय-रहितोऽसाधारणधर्मो लक्षणम्" इति लक्षणशास्त्रविदः लक्षणस्य लक्षणं लक्ष्यन्ति।

## २.७ लक्षणदोषाः

लक्षणे सामान्यतयाः त्रयो दोषाः भवितुम् अर्हन्ति – (१) अतिव्याप्तिः, (२) अव्याप्तिः, (३) असम्भवः च।






“अलक्ष्यवृत्तित्वम् अतिव्याप्तिः” इति अतिव्याप्तेः लक्षणम्। अर्थात् यः धर्मः स्वलक्ष्यभूते पदार्थे तु तिष्ठति, परं लक्ष्यभूतभिन्ने पदार्थेऽपि तिष्ठति, सः धर्मः अतिव्याप्तः उच्यते। यथा “शृङ्गित्वं गोर्लक्षणम्” क्रियते तर्हि गोः लक्षणं शृङ्गित्वं लक्ष्यभूते गोपदार्थे तु अस्ति, परन्तु अलक्ष्यभूते गोभिन्नपदार्थे महिषादिषु अपि विद्यते। महिषादीनां शृङ्गित्वात्। महिषादौ अतिव्याप्तं भवति, अतः एतस्मिन् लक्षणे “अतिव्याप्तिः” दोषः अस्ति।

यदा लक्ष्यपदार्थस्य लक्षणं क्रियते तदा एतदपि अवधेयं यत् लक्षणं सम्पूर्णे लक्ष्ये व्याप्तं भवेत्। लक्षणम् 'अव्याप्तम्' अर्थात् सम्पूर्णे




लक्ष्ये कुत्रचित् अस्ति, कुत्रचित् नास्ति इति न भवेत्। यद्येवं तर्हि लक्षणे "अव्यातिः" दोषः भवति। अव्याप्तेः लक्षणम् अस्ति "लक्ष्यैकदेशाऽवृत्तित्वम्"। अर्थात् लक्ष्यभूतवस्तुनः असाधारणधर्मः लक्ष्यस्य कस्मिँश्चिद् एकस्मिन् भागे विद्यते, अन्यस्मिन् भागे तु न विद्यते। यथा एकेन उदाहरणेन पश्यामः। यदि गोः लक्षणम् "कृष्णवर्णवत्त्वं शुक्लवर्णवत्त्वं वा गोत्वम्" इत्येव क्रियेत तर्हि लक्षणस्य अर्थो भवति "या कृष्णवर्णवती शुक्लवर्णवती वा अस्ति, सा गौः" इति। एतादृशं लक्षणम् अव्याप्तिदोषग्रस्तम् अस्ति। यतः गावः विभिन्नवर्णीयाः भवन्तिः, अतः काश्चन एव गावः कृष्णवर्णीयाः भवन्ति, न तु सर्वाः। न वा सर्वाः गावः शुक्लवर्णीयाः भवन्ति। अतः यदा कृष्णवर्णवत्त्वं

गोत्त्वम् उच्यते तदा लक्षणं कृष्णगोषु तु विद्यते, परं कृष्णेतरगोषु इदं लक्षणं न गच्छति। अतः एतत् लक्षणम् अव्याप्तिदोषकारणात् न भवितुम् अर्हति।




तथैव लक्षणे 'असम्भवः" दोषः अपि न भवेत्। असम्भवो नाम "लक्ष्यमात्राऽवृत्तित्वम्"। अर्थात् यत् लक्षणं लक्ष्ये नैव विद्यते, तत् असम्भवदोषदूषितं भवति। यथा "एकशफवत्त्वं गोर्लक्षणम्" अर्थात् या एकशफवती (शफः=खुरः) अस्ति सा गौः। इदं लक्षणम् सम्भवदोषकारणात् न भवितुम् अर्हति। यतो हि गोः पादे एकः शफः न भवति, एकः शफः तु अश्वगर्दभादीनां भवति। कस्यापि गोः एकः शफः न भवति। इदं लक्षणं असम्भवदोषकारणत् लक्ष्ये सुतरां न गच्छति अतः अस्मिन् लक्षणे 'असम्भवः'-दोषः अस्ति। अत एव शास्त्रकारैः लक्षणस्य लक्षणम् "अतिव्याप्त्यव्याप्त्य-सम्भवेतिदोषत्रय-रहितोऽसाधारणधर्मो लक्षणम्" इति उक्तम्।

तर्हि गोः निर्दिष्टं लक्षणं किं भवेत्? तदा उच्यते – "सास्नादिमत्त्वं गोर्लक्षणम्" इति। अर्थात् या सास्नावती (गलकम्बलवती भवति) सा गौः। सर्वासु गोषु सास्ना भवति। अतः निखिलासु गोषु लक्षणस्य




विद्यमानत्वात्, लक्ष्येतराविद्यमानत्वात् गोः इदं लक्षणम् अतिव्याप्त्यादिदोषत्ररहितम् अस्ति।

अतिव्याप्तिः, अव्याप्तिः, असम्भवः चेति दोषत्रयस्य यत् लक्षणं पूर्वमुक्तम् तदेव नैयायिकाः क्रमशः इत्थं वदन्ति-

- लक्ष्यतावच्छेदकाभावसमानाधिकरणत्वम् – अतिव्याप्तिः।
- लक्ष्यतावच्छेदकसमानाधिकरणाऽभावप्रतियोगित्वम् – अव्याप्तिः।
- लक्ष्यतावच्छेदकव्यापकीभूताभावप्रतियोगित्वम् – असम्भवः।

एतेषां लक्षणां न्यायबोधिन्यादिषु व्युत्पत्तिप्रसङ्गे प्रकृतत्वात् इह विवरणं न क्रियते।

एतदतिरिच्य लक्षणे अन्येऽपि अपि दोषाः उपस्थिताः भवति। ते यथा– (१) आत्माश्रयः, (२) अन्योन्याश्रयः, (३) चक्रकम्, (४) अप्रसिद्धिः च।

तत्र "स्वज्ञानसापेक्षज्ञानविषयत्वम् आत्माश्रयः"। यथा गोभिन्नाऽवृत्तित्वे सति गोमात्रवृत्तिजातिमत्त्वं गोर्लक्षणम्। "स्वज्ञानसापेक्षज्ञानसापेक्ष-ज्ञानविषयत्वम् अन्योन्याश्रयः"। यथा महिषभिन्नत्वं गोत्वम्, गोभिन्नत्वं च महिषत्वम्। "स्वज्ञानसापेक्षज्ञानसापेक्षज्ञानविषयत्वं चक्रकम्" यथा गोत्वं नाम सास्नारहितपदार्थेषु अविद्यमाना सास्नायुक्तपदार्थेषु विद्यामाना जातिः। सास्ना नाम गोः गलकम्बले लम्बायमनाः मांसपिण्डविशेषः। "लक्षणस्य निर्वचनीयस्वरूपे कस्यचिदंशस्याऽसत्त्वम् अप्रसिद्धिः" यथा रोमरहितरसनवत्त्वं गोत्वम् इति। एतेषां विशिष्टं विवरणन्तु आकरग्रन्थेषु द्रष्टव्यम्।

----------

## प्रकृतपाठस्य सारः

- "प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" इत्युक्त्यनुसारेण निष्फले कार्ये न विदुषां प्रवृत्तिः।
- ग्रन्थादौ ग्रन्थमध्ये ग्रन्थान्ते च मङ्गलमाचरणीयम् इति शिष्टभारतीयपरम्परा अस्ति।
- मङ्गलाचरणं त्रिविधं प्रसिद्धम् - (१) नमस्कारात्मकम्, (२) आशीर्वादात्मकम्, (३) वस्तुनिर्देशात्मकं चेति।
- तर्कभाषाग्रन्थः न्यायदर्शनस्य प्रकरणग्रन्थः अस्ति।
- एते अनुबन्धाः चत्वारः भवन्ति - (१) अधिकारी, (२) विषयः,

  (३) सम्बन्धः, (४) प्रयोजनं च।
- न्यायदर्शने प्रमाण-प्रमेयादिषोडशपदार्थाः स्वीकृताः सन्ति।
- न्यायदर्शनरीत्या एतेषां षोडशपदार्थानां तत्त्वज्ञानात् मोक्षप्राप्तिः भवति।
- न्यायशास्त्रस्य प्रवृत्तिः त्रिधा भवति-(१) उद्देशः, (२) लक्षणम्, (३) परीक्षा च।
- लक्षणस्य लक्षणम् अस्ति - "असाधारणधर्मवचनम्" इति।

- लक्षणे सामान्यतया त्रयो दोषाः भवितुम् अर्हन्ति – (१) अतिव्याप्तिः, (२) अव्याप्तिः, (३) असम्भवः च।

* * *

## अभ्यासः

### (अ) एकेन वाक्येन समाधानं लिखत।

१ तर्कभाषायाः मङ्गलाचरणं किम् अस्ति?

२ न्यायदर्शनस्य सूत्रकारः कः?

३ को नाम बालः?

४ गोः निर्दुष्टं लक्षणं किम् अस्ति?

५ अनुबन्धाः कति सन्ति? के च ते?

६ तर्कभाषाकारः कः

७ न्यायदर्शने कति पदार्थाः स्वीकृताः?

८ "शृङ्गित्वं गोत्वम्" इति लक्षणे कः दोषः?

९ न्यायशास्त्रस्य प्रवृत्तिः कतिविधा भवति?

१० किं नाम प्रमाणम्?

११ का नाम जातिः?

१२ न्यायदर्शने भाष्यकारः कः?

१३ को नाम उद्देशः?

१४ "एकशफवत्त्वं गोत्वम्" इति लक्षणे को दोषः?

१५ किं नाम लक्षणम्?

**(आ) योग्यं विकल्पं योजयत।**

| | |
|---|---|
| १. न्यायसूत्रम् | (क) असम्भवः |
| २. लक्ष्यमात्राऽवृत्तित्वम् | (ख) लक्षणम् |
| ३. तर्कभाषाः | (ग) परीक्षा |
| ४. लक्षणस्य विचारः | (घ) महर्षिः अक्षपादः |
| ५. असाधारणधर्मः | (ङ) प्रकरणग्रन्थः |

**(इ) व्याख्यात्मकरूपेण उत्तरं लिखत।**

१. त्रिविधं मङ्गलाचरणम्।

२. प्रकरणग्रन्थस्य लक्षणम्।

३. तर्कभाषा-शब्दस्य व्युत्पत्तिः।

**(ई) निबन्धात्मकरूपेण उत्तरं लिखत।**

१. न्यायदर्शनरीत्या षोडशपदार्थानां परिचयं लिखत।

२. त्रिविधां शास्त्रप्रवृत्तिं सोदाहरणं प्रतिपादयत।

## (उ) परियोजनाकार्यम्

१. अन्येषु शास्त्रेषु दर्शनेषु वा प्रवृत्तिः कतिविधा दृश्यते, तद्विषयकं सङ्कलनात्मकं कार्यं कुरुत।

* * *

## उत्तराणि – पाठः – २

### (आ) एकेन वाक्येन समाधानं लिखत।

१. बालोऽपि यो न्यायनये प्रवेशमल्पेन वाञ्छत्यलसः श्रुतेन। संक्षिप्तयुक्त्यन्विततर्कभाषा प्रकाश्यते तस्य कृते मयैषा।

२. महर्षिः गौतमः

३. अधीतकाव्यकोषव्याकरणकलापः अनधीतन्यायशास्त्रः।

४. सास्नादिमत्त्वं गोत्वम्

५. चत्वारः। अधिकारि-विषय-सम्बन्ध-प्रयोजनभेदात्।

६. केशवमिश्रः

७. षोडश

८. अतिव्याप्तिः

९. त्रिविधा

१०. प्रमाकरणम्

११. असद् उत्तरम्।

१२. वात्स्यायनः

१३. नाममात्रेण वस्तुसङ्कीर्तनम्

१४. असम्भवः।

१५. असाधारणधर्मवचनम्

(आ) योग्यं विकल्पं योजयत।

१. (घ)

२. (क)

३. (ङ)

४. (ग)

५. (ख)

## पाठः – ३

# प्रमाणपदार्थः निर्गुणद्रव्योत्पत्तिः धारावाहिकज्ञानं च

### ३.१ प्रस्तावना

"प्रमेयसिद्धिः प्रमाणाद्धि" अर्थात् प्रमाणेन एव प्रमेयस्य सिद्धिः भवति इत्यतः न्यायसूत्रकारेण महर्षिगौतमेन न्यायदर्शने निरूपितेषु षोडशपदार्थेषु तत्र तावत् सर्वादौ प्रमाणपदार्थस्य उल्लेखः कृतः अस्ति। तेषां पदार्थानां यथार्थज्ञानं प्रमाणैः एव भवितुम् अर्हति। अतः प्रमाणपदार्थः आदौ निरूपणीयः। न्यायदर्शने प्रत्यक्ष-अनुमान-उपमान-शब्दभेदेन चत्वारि प्रमाणानि सन्ति। एभिः चतुर्भिः प्रमाणैः यत् यथार्थज्ञानम् अर्थात् प्रमा उत्पद्यते सा अपि प्रत्यक्ष-अनुमिति-उमपिमि-शाब्दभेदेन चतुर्विधा भवति। प्रमाणस्य लक्षणं तु प्रमाकरणम् इति प्रसिद्धम्। प्रमायाः करणम्=प्रमाणम् इत्यर्थः। न्यायशास्त्रस्य प्रवृत्तिः उद्देशः लक्षणं परीक्षा चेति त्रिप्रकारिका भवतीति पूर्वम् उपपादितम्। प्रत्येकं पदार्थस्य उद्देशकथनानन्तरं तस्य लक्षणम्, लक्षितस्य लक्षणम् सम्भवति न वेति परीक्षा अपि कर्तव्या भवति। एतस्मिन् पाठे प्रमाणलक्षणम्, प्रमाणलक्षणस्य घटकीभूतायाः प्रमायाः स्वरूपम्, करण-कारकयोः मध्ये भेदः, अन्यथासिद्धत्वस्य स्वरूपम्, समवायि-असमवायि-निमित्तभेदेन त्रिविधं कारणम्, अयुतसिद्धस्य लक्षणम्,

निर्गुणद्रव्यस्य उत्पत्तिः, धारावाहिकं ज्ञानं च इति विषयान् तर्कभाषायाः पङ्क्त्याधारेण ज्ञास्यामः।

## ३.२ प्रमाणलक्षणम्

न्यायदर्शनस्य प्रथमे सूत्रे प्रतिपादितानां प्रमाणादीनां षोडशपदार्थानां नाम्ना निर्देशः कृतः अस्ति। सम्प्रति षोडशपदार्थानां लक्षणम्, तस्य परीक्षा च क्रियते। यतो हि लक्षणानन्तरं यावत् पर्यन्तं लक्षणस्य परीक्षा न क्रियते तावत् पर्यन्तं तस्य पदार्थस्य यथार्थं ज्ञानं न भवितुम् अर्हति। अतः सर्वादौ प्रमाणपदार्थस्य लक्षणं क्रियते –

(मूलम्)

**तत्रापि प्रथममुद्दिष्टस्य प्रमाणस्य तावल्लक्षणमुच्यते। प्रमाकरणं प्रमाणम्। अत्र च प्रमाणं लक्ष्यं, प्रमाकरणं लक्षणम्।**

**ननु प्रमायाः करणं चेत् प्रमाणम्, तर्हि तस्य फलं वक्तव्यम्, करणस्य फलवत्त्वनियमात्। सत्यम्। प्रमैव फलम्, साध्यमित्यर्थः। यथा छिदाकरणस्य परशोः छिदैव फलम्।**

अत्र ग्रन्थकारेण उद्देशक्रमात् प्रथमे क्रमे प्राप्तस्य प्रमाण-पदार्थस्य लक्षणम् उच्यते - “प्रमाकरणं प्रमाणम्” इति। प्र-

उपसर्गपूर्वकं मा-धातोः करणार्थे 'ल्युट्'-प्रत्यये कृते सति 'प्रमाणम्' इति शब्दः निष्पद्यते। यस्य च अर्थो भवति प्रमीयते ज्ञायते येन तत् प्रमाणम्। अतः यथार्थज्ञानस्य यत् जनकं भवति तत् प्रमाण-पदेन उच्यते। एतादृशप्रमाणेन यत् यथार्थज्ञानं जायते तत् 'प्रमा' इति उच्यते। लक्षणेन यस्य सिद्धिः क्रियते अथवा यस्य लक्षणम् उच्यते तत् लक्ष्यम् इति उच्यते। "प्रमाकरणं प्रमाणम्" इत्यत्र 'प्रमाकरणम्' इति पदं लक्षणम् अस्ति। 'प्रमाणम्' इति पदं तु लक्ष्यम् अस्ति इति बोधव्यम्।

इदानीम् अत्र एका शङ्का भवति यत् यदि प्रमायाः करणम् 'प्रमाणम्' अस्ति तर्हि प्रमाणस्य फलं वक्तव्यम्। यतो हि यत् करणं (साधनम्) भवति तस्य फलम् अवश्यं भवति। "यद् यत् करणम्, तत् तद् फलवत्" इति व्याप्तिः अपि अस्ति। करणफलयोः नित्यसम्बन्धः भवति इत्यर्थः।

ग्रन्थकारः एतस्याः शङ्कायाः समाधानं वदति यत् शङ्काकर्त्रा पूर्वपक्षिणा सत्यम् उक्तम्। यत्र पूर्वपक्षिणः अर्धं वाक्यार्थः स्वीक्रियते तत्र 'सत्यम्' इति पदस्य प्रयोगः भवति। "अर्धाङ्गीकारे सत्यशब्दः प्रयोज्यः" इति नियमात्। करणफलयोः नित्यसम्बन्धं ग्रन्थकारः अपि अङ्गीकरोति। तर्हि सिद्धान्तिना प्रमाणरूपकरणस्य फलं वक्तव्यम्। अत्र

सिद्धान्तः उच्यते - प्रमाणरूपकरणस्य 'प्रमा' एव फलम्। यतो हि प्रमाणं प्रमारूपफलनिष्पत्तौ साधनं भवति। फलशब्दार्थम् अज्ञातवते पूर्वपक्षिणे ग्रन्थकारेण कथितं यत् "प्रमैव फलं साध्यमित्यर्थः"। फल-निष्पत्तौ इति धातोः फल-शब्दः निष्पद्यते, तदनुरोधात् ग्रन्थकारेण फलशब्दस्य अर्थः 'साध्यम्' इति कृतः। तदनुरूपः दृष्टान्तः अपि ग्रन्थकारेण प्रोक्तः "छिदाकरणस्य परशोः छिदैव फलम्" इति। यथा कश्चन कृषकः परशुना काष्ठखण्डस्य छेदनं करोति। तत्र छेदनक्रियायां परशुः 'करणम्' भवति तथा च काष्ठखण्डस्य यः द्वैधीभावः=छेदनं जायते तदेव तस्य परशुरूपकरणस्य फलम् अस्ति। एतावता प्रबन्धेन प्रमाकरणं प्रमाणम् इति सिद्धं भवति।

### ३.३ प्रमालक्षणम्

इदानीं "प्रमाकरणम्=प्रमाणम्" इत्यत्र प्रमाणलक्षणघटकस्य 'प्रमा'शब्दस्य अर्थः उच्यते -

(मूलम्)

**का पुनः प्रमा, यस्याः करणं प्रमाणम्। उच्यते — यथार्थानुभवः प्रमा। यथार्थः इत्ययथार्थानां संशय-विपर्यय-तर्कज्ञानानां निरासः। अनुभवः इति स्मृतेर्निरासः।**

**ज्ञातविषयं ज्ञानं स्मृतिः। अनुभवो नाम स्मृतिव्यतिरिक्तं ज्ञानम्।**

अत्र पूर्वपक्षी शङ्कते यत् "प्रमाकरणं प्रमाणम्" इति यत् प्रमाणलक्षणं प्रोक्तम्, तत्र 'प्रमा' इति किम् अस्ति, यस्याः करणं 'प्रमाणम्' भवति? अत्र ग्रन्थकारः प्रमालक्षणकथनपूर्वकं समाधानं करोति यत् "यथार्थानुभवः प्रमा" इति। यथार्थश्चासौ अनुभवश्च इति सामानाधिकरण्येन अत्र कर्मधारयसमासः क्रियते। "तद्वति तत्प्रकारकोऽनुभवः यथार्थानुभवः"। यथा पुरोवर्तिनि रजते 'इदं रजतम्' इत्याकारकं यत् ज्ञानं जायते स यथार्थानुभवः। तथा हि तत्र ज्ञाने त्रयो विषयाः भवन्ति - विशेष्यः, प्रकारः, संसर्गश्चेति। पुरोवर्तिरजतं विशेष्यम्। रजतत्वं प्रकारः, समवायः संसर्गः। अत्र लक्षणे तच्छब्देन प्रकारीभूतो धर्मो ग्राह्यः। रजतत्ववत् रजतम् अत्र ज्ञाने विशेष्यम्। रजतत्वम् अत्र प्रकारः इति रजतत्ववद्विशेष्यकत्वे सत रजतत्वप्रकारकत्वे सति अनुभवत्वस्य 'इदं रजतम्' इति यथार्थानुभवे विद्यमानत्वात् लक्षणसङ्गतिः। "तदभाववति तत्प्रकारकोऽनुभवः अयथार्थः" इति। यथा शुक्तौ "इदं रजतम्" इति ज्ञानम्।

अत्र मूले यथार्थानुभवः इति पदं लक्षणम् अस्ति, प्रमा इति पदं तु लक्ष्यम्। अस्मिन् लक्षणांशे 'यथार्थः' 'अनुभवः' च इति द्वे पदे स्तः।

प्रमालक्षणे यदि यथार्थः इति पदं न दीयते तर्हि "अनुभवः प्रमा" इत्येव प्रमालक्षणं स्यात्। तदा अस्य लक्षणस्य संशयज्ञाने विपर्ययज्ञाने तर्कज्ञाने च अतिव्याप्तिः भवति। यतो हि अनुभवः ययार्थ-अयथार्थभेदेन द्विविधः भवति। तत्र यथार्थानुभवः तु प्रमा भवति, परम् अयथार्थानुभवः प्रमाकोटौ न प्रविशति। अतः "अनुभवः प्रमा" इत्येव लक्षणं क्रियते तर्हि इदं लक्षणम् अयथार्थानुभवे प्रविष्टत्वात् अतिव्याप्तिदोषग्रस्तं भविष्यति।

अयथार्थानुभवः त्रिविधः भवति - संशयः विपर्ययः तर्कश्च। तत्र एकस्मिन् धर्मिणि विरुद्धनानाधर्म-वैशिष्ट्यावगाहिज्ञानं संशयः। यथा मन्दान्धकारे फल-पुष्प-पत्ररहितस्य वृक्षस्य मध्यभागं दृष्ट्वा "स्थाणुर्वा पुरुषो वा" इत्याकारकं संशयात्मकम् अनुभवज्ञानं जायते। एतत् संशयात्मकं ज्ञानं प्रमा न उच्यते। मिथ्याध्यवसायो विपर्ययः। यथा शुक्तिकां दृष्ट्वा "इदं रजतम्" इति ज्ञानम्। यथा वा मन्दान्धकारे रज्जुं दृष्ट्वा "अयं सर्पः" इति ज्ञानं विपर्ययः (भ्रमः) इत्युच्यते। एतत् ज्ञानमपि अनुभवरूपम् अस्ति परन्तु विपर्ययकारणात् प्रमात्मकं ज्ञानं न भवितुम् अर्हति। तर्कस्य लक्षणम् अस्ति "व्याप्यारोपे व्यापकारोपः" इति। तर्कः अपि एकम् आरोपात्मकम् (आहार्यम्) ज्ञानम् अस्ति। यत्र व्याप्यस्य आरोपेण व्यापकस्य आरोपः क्रियते स "तर्कः" इति उच्यते। यथा "धूमो यदि वह्निव्यभिचारी स्यात्, तर्हि वह्निजन्यो न स्यात्" इति तर्कः

उच्यते। अनेन तर्केण विपरीतम् अनुमानं निष्पद्यते। अतः प्रमालक्षणे यथार्थपददानेन अयथार्थज्ञानेषु=संशयविपर्ययतर्केषु अस्य लक्षणस्य अतिव्याप्तिः न भवति।

प्रमालक्षणे यदि अनुभवः इति पदं न दीयते तर्हि प्रमालक्षणं "यथार्थः" इत्येव स्यात्। तेन स्मरणात्मकं यत् यथार्थज्ञानम् अस्ति, तत्र एतस्य लक्षणस्य अतिव्याप्तिः भविष्यति। न्यायमते तु स्मृतिः अनुभवभिन्नत्वात् प्रमाकोटौ न स्वीक्रियते। अतः स्मृतौ अतिव्याप्तिवारणाय 'अनुभवः' इति पदम् आवश्यकम्। अनु=पश्चात् भवति यः सः अनुभवः। अर्थात् प्रमाणव्यापारात् पश्चात् यः उत्पद्यते, सः 'अनुभवः' इत्युच्यते। स्मृतिज्ञानस्य उत्पत्तौ कस्यापि प्रमाणव्यापारस्य अपेक्षा भवति। सा तु पूर्वानुभवजनितसंस्कारेण सादृश्य-अदृष्ट-चिन्तादि-उद्बोधकसामग्र्याः सन्निधाने सति उत्पद्यते। अतः एव ग्रन्थकारः स्मृतेः लक्षणं करोति - "ज्ञातविषयं ज्ञानं स्मृतिः" इति। पूर्वं प्रमाणान्तरेण ज्ञातस्य विषयस्य पुनः सादृश्यादृष्टचिन्तादि-सहकारेण यत् स्मरणं जायते तत् 'स्मृतिः' इति उच्यते। स्मृतिभिन्नं यत् ज्ञानं भवति तत् अनुभवज्ञानम् उच्यते।

तर्कसङ्ग्रहे "संस्कारमात्रजन्यं ज्ञानं स्मृतिः" इत्यपि स्मृतेः लक्षणं प्राप्यते। अत्र मात्रपददानेन अस्य स्मृतिलक्षणस्य प्रत्यभिज्ञायाम्

अतिव्याप्तिः न भवति। "तत्तेदन्तावगाहिनी प्रतीतिः प्रत्यभिज्ञा" इति लक्षणलक्षिता प्रत्यभिज्ञा अपि एकं ज्ञानम् अस्ति। इयं प्रत्यभिज्ञा स्मृत्यनुभवज्ञानात्मिका भवति। अतः साऽपि प्रमाकोटौ न प्रविशति। अतः "स्मृतिव्यतिरिक्तं ज्ञानम् अनुभवः" इति लक्षणं निर्दुष्टम् अस्ति।

### ३.४ करण-कारणयोः भेदः

"प्रमाकरणं प्रमाणम्" इति प्रमालक्षणे प्रमापदस्य विचारः अस्माभिः कृतः। सम्प्रति अस्मिन् लक्षणे करण-पदार्थः विशदीक्रियते -

(मूलम्)

**किं पुनः करणम्? साधकतमं करणम्। अतिशयितं साधकं साधकतमं प्रकृष्टं कारणमित्यर्थः।**

प्रमायाः स्वरूपं तु अवगतम्, परं तस्या प्रमायाः 'करणम्' एतावता न अवगतम्। अतः करणस्वरूपं परिज्ञातुं प्रश्नः क्रियते - "किं पुनः करणम्" इति। एतस्य प्रश्नस्य समाधानं दीयते - "साधकतमं करणम्" इति। "अतिशायने तमबिष्ठनौ" इति पाणिनिसूत्रेण (५.३.५५) अतिशायने अर्थे "तमप्" प्रत्ययेन "साधकतमम्" इति पदं निष्पद्यते। "क्रियां कुर्वद् हि कारकम्" इति न्यायेन सर्वेषु कारकेषु

स्वव्यापारकारणात् कर्तृत्वं भवति, तेन करणकारके अपि कारकत्वम् (साधकत्वम्) सम्भवति। एतादृशाभिप्रायेण एव ग्रन्थकारेण साधकतमम् इति पदस्य निष्कृष्टः अर्थः "प्रकृष्टं कारणम्" इति उक्तम्।

वस्तुतः कस्यापि कार्यस्य उत्पत्तिः एकस्मात् कारणात् न भवति, तत्र बहूनां कारणानाम् अपेक्षा भवति। तेषु कारणेषु कतिपयानि कारणानि साधारणकारणानि भवन्ति, कतिपयानि तु




असाधारणकारणानि। येषां कारणानाम् अपेक्षा सर्वेषु कार्येषु भवति तानि साधारणकारणानि उच्यन्ते। एतानि कार्यमात्रं प्रति कारणानि भवन्ति। वैशेषिकदर्शने एवमपि उक्तम् अस्ति यत् वैशेषिकशास्त्रसम्मताः ये षट् पदार्थाः सन्ति ते कार्यमात्रं प्रति अर्थात् निखिलकार्यं प्रति कारणानि भवन्ति। कार्यमात्रं प्रति कारणत्वात् तेषां साधारणकारणम् इति संज्ञा। तानि च साधारणकारणानि दिक्, कालः, ईश्वरीयज्ञानम्, ईश्वरीयेच्छा, ईश्वरकृतिः, प्रागभावश्च इमानि षट् सन्ति। एतद् अतिरिक्तं

यानि कारणानि भवन्ति तानि असाधरणकारणानि उच्यन्ते। यथा घटरूपं कार्यं प्रति कुलालः, कपालद्वयं, चक्रम्, चीवरम्, दण्डः इत्यादीनि।

एतादृशेषु असाधारणेषु कारणेषु यत् प्रकृष्ट कारणम् अर्थात् अतिशययुक्तं कारणं भवति तत् 'करणम्' इत्युच्यते। कारणे अतिशयप्रकर्षः एव 'व्यापार'शब्देन निगद्यते। अत एव नैयायिकैः करणस्य लक्षणम् "व्यापारवत् असाधारणं कारणं करणम्" इति क्रियते। अर्थात् स्वव्यापारद्वारा यत् यस्य कार्यस्य असाधारणं कारणं भवति, तदेव तस्य कार्यस्य 'करणम्' अपि भवति। यथा घटरूपस्य कार्यस्य असाधारणकारणेषु कपालद्वयसंयोगरूपव्यापारेण दण्डः, चक्रम्, चीवरादि घटं प्रति करणं भवितुम् अर्हन्ति। एवमेव पटरूपं कार्यं प्रति तन्तुसंयोगरूपव्यापारेण तुरी, वेमादिकं करणं भवितुं अर्हन्ति। व्यापारस्य "तज्जन्यस्तज्जन्यजनकोऽवान्तरव्यापारः" इति लक्षणं तु स्वयं तर्कभाषाकारः अग्रे वक्ष्यति।

प्रमाणलक्षणं स्पष्टीकर्तुं "साधकतमं करणम्" इति करणलक्षणं ग्रन्थकारेण प्रोक्तम्। अत्र साधकतमम् अर्थात् प्रकष्टं कारणं 'करणम्' भवति इत्युक्तम्। किन्तु यावता कारणलक्षणम् एव न परिज्ञायते तावता

प्रकृष्टकारणस्य स्वरूपं परिज्ञातुं न शक्यते। अतः इदानीम् अत्र कारणस्य लक्षणं ग्रन्थकारेण उच्यते -

(मूलम्)

**ननु साधकं कारणमिति पर्यायस्तदेव न ज्ञायते किं तत्कारणमिति। उच्यते — यस्य कार्यात् पूर्वभावो नियतोऽनन्यथासिद्धश्च तत्कारणम्। यथा तन्तुवेमादिकं पटस्य कारणम्।**

**यद्यपि पटोत्पत्तौ दैवादागतस्य रासभादेः पूर्वभावो विद्यते, तथापि नासौ नियतः। तन्तुरूपस्य तु नियतः पूर्वभावोऽस्त्येव किन्तु अन्यथासिद्धः, पटरूपजननोपक्षीणत्वात्, पटं प्रत्यपि कारणत्वे कल्पनागौरव-प्रसङ्गात्।**

**तेनानन्यथासिद्धनियतपूर्वभावित्वं कारणत्वम्।**
**अनन्यथासिद्धनियत-पश्चाद्भावित्वं कार्यत्वम्।**

अत्र ग्रन्थकारेण कारणस्य लक्षणम् "यस्य कार्यात् पूर्वभावो नियतोऽनन्यथासिद्धश्च तत्कारणम्" इत्युक्तम्। अर्थात् यस्य सत्ता घटादिकार्योत्पत्तेः पूर्वं निश्चिता भवेत् तथा च यत् अन्यथासिद्धम् (अनावश्यकम्) न भवेत् तत् "कारणम्" इत्युच्यते। यथा पटस्य

तन्तवः, वेमा इत्यादीनि कारणानि भवन्ति। तेषां सत्ता उपस्थितिर्वा पटकार्यस्य उत्पत्तेः प्राक् नियता भवति, तथा च तानि कारणानि पटकार्यं प्रति अन्यथासिद्धानि अपि न भवन्ति अर्थात् अनन्यथासिद्धानि भवन्ति, अतः तानि पटस्य कारणानि भवितुम् अर्हति। कारणलक्षणस्य समन्वयः एतेषु कारणेषु कर्तुं शक्यते।

इदानीं कारणलक्षणस्य दलसार्थक्यं विचार्यते। यदि कारणलक्षणे "नियतः" इति पदं न दीयते तर्हि "यस्य कार्यात् पूर्वभावः" इत्येव कारणलक्षणं स्यात्। तदा अस्य लक्षणस्य अर्थः भवति - यस्य सत्ता पटादिकार्योत्पत्तेः पूर्वं भवेत् तत् कारणम्। एतादृशलक्षणम् अतिव्याप्तिदोषग्रस्तम् अस्ति। यतो हि कदाचित् पटस्य उत्पत्तिकाले दैववशात् कश्चन रासभः (गर्दभः) तत्र आगत्य उपस्थितः भवति, तर्हि पटकार्यं प्रति तस्य अपि पूर्वभावः आगतः। तेन कारणलक्षणस्य रासभे अतिव्याप्तिः जाता। अतः तत्र अतिव्याप्तिवारणाय कारणलक्षणे "नियतः" इति दलं योजितम्। पटकार्यस्य उत्पत्तिकाले कदाचित् संयोगवशात् रासभस्य उपस्थितिः भवितुम् अर्हति, परं सा उपस्थितिः नियता (निश्चिता) न भवति। अतः पटं प्रति रासभः कारणं भवितुं न अर्हति।

तर्हि अत्र कश्चन एवं वदति यत् पटस्य उत्पत्तेः पूर्वं तन्तुरूपस्य नियतः पूर्वभावः विद्यते। अतः पटकारणभूतानां तन्तूनां यत् रूपम् अस्ति तत् तन्तुरूपं पटं प्रति कारणम् भवितुम् अर्हतीति। तदा अत्र उच्यते - तन्तुरूपम् अपि अन्यथासिद्धत्वात् पटं प्रति कारणं न भवितुम् अर्हति। अत एव ग्रन्थकारेण कारणलक्षणे "अन्यथासिद्धम्" इति पदं निवेशितम्। "न अन्यथासिद्धः=अनन्यथासिद्धः" अर्थात् अन्यथासिद्धभिन्नत्वम्। तन्तुरूपं पटं प्रति अन्यथासिद्धं भवति। यतो हि पटरूपस्य उत्पादने तन्तुरूपस्य शक्तिः (उपयोगिता) क्षीणा भवति, अतः पटं प्रति तन्तुरूपं कारणं न भवितुम् अर्हति। पटरूपं प्रति तु तन्तुरूपम् अवश्यं कारणं भवति। यदि पुनः पटं प्रत्यपि तन्तुरूपं कारणत्वेन अङ्गीक्रियते तर्हि अत्र कल्पनागौरवस्य प्रसङ्गः आगच्छति। "कल्पनागौरवम्" कश्चन दोषः भवति। अतः "अनन्यथासिद्धनियतपूर्व-भावित्वं कारणत्वम्" इति कारणस्य निष्कृष्टं लक्षणं सिद्ध्यति। अत्र "अन्यथासिद्धश्च असौ नियतश्च स चासौ पूर्वभावश्च सोऽस्यास्ति इति अनन्यथासिद्धनियतपूर्वभावि" इति कर्मधारयसमासः विद्यते।

"यस्य कार्यात्......" इति कारणलक्षणं तु उक्तम्, परं यावत्पर्यन्तम् अवधिभूतस्य कार्यस्य परिज्ञानं न भवति तावत्पर्यन्तं अवधिमत्कारणस्य ज्ञानं न भवितुम् अर्हति। अतः ग्रन्थकारः इदानीं कार्यस्य लक्षणं वदति "अनन्यथासिद्धनियतपश्चाद्भावित्वं कार्यत्वम्"

इति। अर्थात् यत् अन्यथासिद्धं न भूत्वा नियतरूपेण कारणस्य पश्चात् भवति, तत् 'कार्यम्' इत्युच्यते।

### ३.५ अन्यथासिद्धत्वम्

इदानीं प्रसङ्गप्राप्तम् अन्यथासिद्धत्वम् अत्र विचार्यते। न अन्यथासिद्धः=अनन्यथासिद्धः अर्थात् अन्यथासिद्धभिन्नः। भेदयुक्तं भिन्नम् इत्युच्यते। भेदः अपि कश्चन अभावविशेषः अस्ति। अभावः सर्वदा प्रतियोगिनम् अपेक्ष्यते। अतः अन्यथासिद्धभेदस्य प्रतियोगी अन्यथासिद्धः एव भवति। यस्य अभावः उच्यते सः 'प्रतियोगी' कथ्यते। एवञ्च अभावज्ञाने प्रतियोगिज्ञानस्य अपेक्षा भवति। अतः प्रतियोगिभूतस्य अन्यथासिद्धस्य ज्ञानं विना 'अन्यथासिद्धभेदः' ज्ञातुं न शक्यते। अतः इदानीम् अत्र अन्यथासिद्धविषये किञ्चित् उच्यते।

न्यायसिद्धान्तमुक्तावल्यां पञ्चविधः अन्यथासिद्धाः उक्ताः, तद्यथा -

**"येन सह पूर्वभावः कारणमादाय वा यस्य।**
**अन्यं प्रति पूर्वभावे ज्ञाते यत्पूर्वभावविज्ञानम्॥**

जनकं प्रति पूर्ववृत्तितामपरिज्ञाय न यस्य गृह्यते।
अतिरिक्तमथापि यद् भवेत् नियतावश्यकपूर्वभाविनः॥

एते पञ्चाऽन्यथासिद्धा दण्डत्वादिकमादिमम्।
घटादौ दण्डरूपादि द्वितीयमपि दर्शितम्॥

तृतीयन्तु भवेद् व्योम कुलालजनकोऽपरः।
पञ्चमो रासभादिः स्यात् एतेष्वावश्यकस्त्वसौ॥

(न्यायसिद्धान्तमुक्तावली १९-२२)

(१) **"येन सह पूर्वभावः"** अर्थात् येन धर्मेण सह कारणस्य कार्यं प्रति पूर्वभावः गृहीतो भवति, सः 'धर्मः' तत् कार्यं प्रति अन्यथासिद्धः भवति। यथा दण्डः घटकार्यं प्रति कारणम् अस्ति। तस्य दण्डस्य कारणता, दण्डत्वधर्मविशिष्टे दण्डे गृहीता भवति। एवञ्च दण्डत्वधर्मेण सह दण्डस्य पूर्वभावः घटकार्यं प्रति गृह्यते, अतः 'दण्डत्वम्' इति धर्मः घटकार्यं प्रति अन्यथासिद्धम् उच्यते।

(२) **"कारणमादाय वा यस्य"** अर्थात् कार्यं प्रति यस्य पदार्थस्य नियतपूर्वभावित्वज्ञानं, तत्कारणेन गृह्यते, सः पदार्थः तत् कार्यं प्रति अन्यथासिद्धं भवति। यथा घटकार्यं प्रति दण्डे विद्यमानस्य रूप-पदार्थस्य

नियतपूर्वभावित्वस्य ज्ञानम्, घटकार्यस्य कारणभूतेन दण्डेन भवति अर्थात् रूपम् स्वाश्रभूतदण्डज्ञानेन स्वस्य नियतपूर्वभावित्वस्य ज्ञानं कारयति। अतः दण्डस्य रूपं घटकार्यं प्रति अन्यथासिद्धम् उच्यते।

(३) "**अन्यं प्रति पूर्वभावे ज्ञाते यत्पूर्वभावविज्ञानम्**" अर्थात् प्रकृतकार्याजनकम् अन्यं प्रति पूर्ववर्तित्वं गृहीत्वा एव यस्य यत् कार्यं प्रति पूर्ववर्तित्वम्, तस्य तत्कार्यं प्रति अन्यथासिद्धत्वम्। यथा घटं प्रति आकाशस्य अन्यथासिद्धत्वम्। आकाशस्य हि घटाटिकं प्रति कारणत्वम्। एवञ्च आकाशस्य शब्दं प्रति कारणत्वं गृहीत्वा एव घटादिकं प्रति जनकत्वं ग्राह्यम्। अतः घटकार्यं प्रति आकाशः अन्यथासिद्धः भवति।

(४) "**जनकं प्रति पूर्ववृत्तितामपरिज्ञाय न यस्य गृह्यते**" जनकं प्रति=कारणं प्रति, पूर्ववृत्तितां (कारणत्वम्) अपरिज्ञाय, यस्य कार्यं प्रति पूर्ववृत्तिता गृहीता न भवति अर्थात् कारणस्य यत् कारणं भवति तत् अन्यथासिद्धं भवति। यथा कुलालस्य पिता घटकार्यं प्रति अन्यथासिद्धः उच्यते।

(५) "**अतिरिक्तमथापि यद् भवेन्नियतावश्यकपूर्वभाविनः**" अर्थात् नियतावश्यकपूर्वभाविभिन्नं यत् किमपि भवति तदपि अन्यथासिद्धम् उच्यते। यथा घटोत्पत्तिं प्रति दैववशात् आगतः रासभः अन्यथासिद्धः उच्यते। एतेषु पञ्चसु अन्यथासिद्धेषु पञ्चमः अन्यथासिद्धः आवश्यकः,

तत्रैव अन्येषाम् अन्यथासिद्धानाम् अन्तर्भावः भवितुम् अर्हति तथापि अन्यथासिद्धस्य पञ्चभेदप्रदर्शनं तु शिष्यबुद्धिवैशद्यार्थम्। एवं न्यायसिद्धान्तमुक्तावल्यां पञ्चविधाः अन्यथासिद्धाः उक्ताः सन्ति, येषां प्रकृतोपयोगाय किञ्चित् विवरणं कृतम् अस्ति। इदानीं प्रकृतम् अनुसरामः।

### ३.६ कारणान्तरलक्षणस्य निराकरणम्

अत्र केचित् कारणस्य अन्वयव्यतिरेकबलात् किञ्चित् भिन्नं लक्षणं वदन्ति। तेषां लक्षणस्य निराकरणं ग्रन्थकारेण क्रियते -

(मूलम्)

**यत्तु कश्चिदाह कार्यानुकृतान्वयव्यतिरेकि कारणमिति, तदयुक्तम्। नित्यविभूनां व्योमादीनां कालतो देशतश्च व्यतिरेकासम्भवेन अकारणत्वप्रसङ्गात्।**

अत्र कश्चन कारणस्य लक्षणम् इत्थं वक्ति "कार्यानुकृतान्वयव्यतिरेकि कारणम्" इति। अर्थात् कार्येण अनुकृतौ अन्वय-व्यतिरेकौ यस्य तत् कारणम्। अन्वयो नाम "तत्सत्त्वे तत्सत्त्वम्" अर्थात् कारणसत्त्वे कार्यसत्त्वम्, यथा मृत्सत्त्वे घटसत्त्वम् इति वा।

व्यतिरेको नाम "तदभावे तदभावः" अर्थात् कारणाभावे कार्याभावः, यथा मृदभावे घटाभावः इत्यर्थः। अत्र एतादृशोः अन्वयव्यतिरेकिणोः अनुकरणस्य यदि भङ्गः न भवति तर्हि एतादृशम् अनुकरणं कारणस्य लक्षणं भवितुम् अर्हति। सामान्यतया वयं पश्यामः यत् कारणत्वस्य निश्चयः प्रायः अन्वय-व्यतिरेकाभ्याम् एव क्रियते। यथा अग्नेः दाहं प्रति कारणत्वम् अन्वय-व्यतिरेकाभ्याम् अवगम्यते। यथा "अग्निसत्त्वे दाहसत्त्वम्" इति अन्यवः, "अग्न्यभावे दाहाभावः" इति व्यतिरेकः। अतः अन्वय-व्यतिरेकयोः एतादृशानुकरणबलात् केचित् कारणस्य लक्षणम् "कार्यानुकृतान्वयव्यतिरेकि कारणम्" इति वदन्ति।

अत्र तर्कभाषाकारः वदति यत् एतादृशं लक्षणम् अयुक्तम् अस्ति। किमर्थम् इदं लक्षणम् अयुक्तम् इति विचारयामः। अत्र ग्रन्थकारः वदति यत् एतादृशलक्षणे अन्वयस्य अनुकरणं तु कर्तुं शक्यते यथा ईश्वरसत्त्वे, कालसत्त्वे, आकाशसत्त्वे वा घटसत्त्वम् इति। परम् अत्र नित्य-विभूनाम् आकाशादीनां कालतः देशतः वा व्यतिरेकस्य अनुकरणं कर्तुं न शक्यते। यथा आकाशाभावे कालाभावे ईश्वराभावे वा घटाभावः इति। यतो हि एतादृशः न कोऽपि कालः, न वा देशः विद्यते यत्र आकाशस्य, ईश्वरस्य, कालस्य वा व्यतिरेकः=अभावः भवेत्। अत एव ईश्वराकाशकालादयः नित्याः व्यापकाः च कथ्यन्ते। ईश्वर-आकाश-कालादयः कार्यमात्रं प्रति कारणं भवन्ति। परं

“कार्यानुकृतान्वयव्यतिरेकि कारणम्” इति कारणलक्षणे व्यतिरेकव्याप्तेः असम्भवात् ईश्वराकाशादीनां नित्यविभुपदार्थानां कार्यं प्रति कारणत्वम् एवं न सिद्ध्यति। तेन एतादृशलक्षणम् अव्याप्तिदोषग्रस्तम् अस्ति। अतः इदं लक्षणं न युक्तम्।

**३.७ समवायिकारणम्**

कार्यस्य उत्पत्तौ बहूनि कारणानि भवन्ति। तेषां कारणानां साधारण-असाधारणभेदेन पूर्वं निरूपणं कृतम्। इदानीं समवायि-असमवायि-निमित्तभेदेन कारणस्य त्रैविध्यं प्रदर्श्यते -

(मूलम्)

**तच्च कारणं त्रिविधम्। समवायि-असमवायि-निमित्त-भेदात्। तत्र यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम्। यथा तन्तवः पटस्य समवायिकारणम्। यतः तन्तुष्वेव पटः समवेतो जायते, न तुर्यादिषु।**

**ननु तन्तुसम्बन्ध इव तुर्यादिसम्बन्धोऽपि पटस्य विद्यते, तत्कथं तन्तुष्वेव पटः समवेतो जायते न, तुर्यादिषु?**

**सत्यम्। द्विविधः सम्बन्धः संयोगः समवायश्चेति। तत्रायुतसिद्धयोः सम्बन्धः समवायः। अन्ययोस्तु संयोग एव।**

कारणं त्रिविधं भवति – समवायिकारणम्, असमवायिकारणं, निमित्तकारणं चेति। तत्र समवायिकारणस्य लक्षणम् अस्ति “यत् समवेतं कार्यमुत्पद्यते तत्=समवायिकारणम्” इति। समवेतम् इति पदस्य अर्थो भवति समवायसम्बन्धेन सम्बद्धम्। समवायः (नित्यसम्बन्धः) अस्यास्तीति समवायि। समवायि च तत्कारणं समवायिकारणम्। अतः यस्मिन् द्रव्ये समवेतं=समवायसम्बन्धेन सम्बद्धं सत् कार्यम् उत्पद्यते तत् द्रव्यं समवायिकारणम् उच्यते। यथा तन्तवः पटस्य समवायिकारणं भवन्ति। यतः पटः स्वोत्पत्तिकाले त्रिभिः कारणैः सह सम्बद्धः भवति, परम् उत्पत्तिकाले सः पटः कस्मिँश्चित् एकस्मिन् कारणे समवायसम्बन्धेन सम्बद्धः भवति। अतः यस्मिन् तन्तुद्रव्ये (येषु तन्तुषु) पटः समवायसम्बन्धेन स्वोत्पत्तिकाले सम्बद्धः भवति, तत् तन्तुद्रव्यं (ते तन्तवः) तस्य समवायिकारणम् उच्यते।

अत्र किञ्चिदधिकं वक्तव्यम् - धर्मो धर्मिणि विशेषणतया तिष्ठति। यथा “अयं घटः” इत्यत्र घटत्वं धर्मः, घटः धर्मी। अतः घटत्वधर्मः घटधर्मिणि विशेषणतया तिष्ठति। एवं च पदार्थोऽपि अन्यपदार्थे विशेषणतया स्थातुं शक्नोति। यथा “दण्डी पुरुषः” इत्यत्र दण्डः विशेषणं पुरुषश्च विशेष्यः। अतः दण्डादिपदार्थः पुरुषादौ अन्यपदार्थे विशेषणतया तिष्ठति। एवञ्च विशेषणविशेष्ययोर्मध्ये यः सम्बन्धः स त्रिधा भवति - संयोगः, समवायः, स्वरूपं च। यथा द्रव्ययोः

सयोगः इति नियमेन द्रव्यस्य अन्यद्रव्येण सह संयोगः सम्बन्धः भवति। तत्र (१) संयोगसम्बन्धः यथा भूतले घटः। अत्र भूतलमपि द्रव्यम्, घटः अपि द्रव्यम्। द्रव्यत्वात् उभयोः सम्बन्धः संयोगः एव। (२) रूपादीनां गुणानाम्, चलनादीनां क्रियाणाम्, गोत्वादेः जातेश्च स्वस्वाधिकरणेषु (आधारेषु) यः सम्बन्धः स समवायः सम्बन्धः। एवं घटादयः

स्वस्वावयवेषु कपालप्रभृतिषु समवायसम्बन्धेनैव वर्तन्ते। समवायः नित्यसम्बन्धः इति अग्रे वक्ष्यते। अभावादयः स्वस्वाधिकरणेषु स्वरूपसम्बन्धेन तिष्ठन्ति इति दिक्।

अत्र एकः प्रश्नः समुद्भवति यत् पटः स्वोत्पत्तिकाले त्रिभिः कारणैः सम्बद्धः भवति। यथा पटस्य सम्बन्धः तन्तुभिः सह वर्तते तथैव पटस्य तुर्यादिसम्बन्धोऽपि वर्तते। तर्हि कथम् एवमुक्तं यत् तन्तुषु एव पटः समवेतः उत्पद्यते, न तुर्यादिषु? इति।

प्रश्नकर्तुः अर्थाभिप्रायम् अङ्गीकृत्य ग्रन्थकारेण अत्र समाधानं दीयते "सत्यम्" इति। पटस्य सम्बन्धः यथा तन्तुभिः सह अस्ति तथैव तुर्यादिभिः सह अपि वर्तते। परं सः सम्बन्धः द्विविधः भवति (१)




संयोगः, (२) समवायश्च। तत्र अयुतसिद्धयोः सम्बन्धः समवायः, अन्ययोस्तु सम्बन्धः संयोगः एव। तन्तुपटौ तु अयुतसिद्धौ स्तः, अतः तयोः सम्बन्धः समवायः एव। तुरीपटौ तु न अयुतसिद्धौ, अतः तयोः सम्बन्धः अपि समवायः न, किन्तु संयोगः एव। एवञ्च पटस्य समवायिकारणं तन्तवः एव, न तुर्यादि। तुर्यादि तु निमित्तकारणं भवति तदग्रे ग्रन्थकारेण वक्ष्यते।

## ३.८ अयुतसिद्धत्वम्

इदानीं प्रश्नः भवति यत् कौ द्वौ पदार्थौ अयुतसिद्धौ उच्येते? अत्र ग्रन्थकारः उदाहरणपूर्वकम् अयुतसिद्धत्वं वर्णयति -

(मूलम्)

कौ पुनरयुतसिद्धौ? ययोर्मध्ये एकमविनश्यदपराश्रितमेवावतिष्ठते तावयुतसिद्धौ। तदुक्तम् —

तावेवायुतसिद्धौ द्वौ विज्ञातव्यो ययोर्द्वयोः।
अनश्यदेकमपराश्रितमेवावतिष्ठते॥

यथा अवयवावयविनौ, गुणगुणिनौ, क्रियाक्रियावन्तौ, जातिव्यक्ती, विशेषनित्यद्रव्ये चेति। अवयव्यादयो हि यथाक्रममवयवाद्याश्रिता एवावतिष्ठन्तेऽविनश्यन्तः। विनश्यदवस्थास्वनाश्रिता एवावतिष्ठन्तेऽवयव्यादयः। यथा तन्तुनाशे सति पटः। यथा वा आश्रयनाशे सति गुणः। विनश्यत्ता तु विनाशकारणसामग्रीसान्निध्यम्।

तन्तुपटावप्यवयवावयविनौ, तेन तयोः सम्बन्धः समवायोऽयुतसिद्धत्वात्। तुरीपटयोस्तु न समवायोऽयुतसिद्धत्वाभावात्। न हि तुरी पटाश्रितैवावतिष्ठते, नापि पटस्तुर्याश्रितः। अतस्तयोः सम्बन्धः संयोग एव। तदेवं तन्तुसमवेतः पटः।

यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम्। अतस्तन्तुरेव समवायिकारणं पटस्य न तु तुर्यादि।

पटश्च स्वगतरूपादेः समवायिकारणम्। एवं मृत्पिण्डोऽपि घटस्य समवायिकारणं, घटश्च स्वगतरूपादेः समवायिकारणम्।

"अयुतसिद्धः" इति पदस्य शाब्दिकः अर्थः भवति – युतसिद्धभिन्नः इति। 'युत'शब्दः 'यु-मिश्रणामिश्रणयोः' इति धातोः 'क्त'-प्रत्ययेन निष्पद्यते। अत्र धात्वर्थः अमिश्रणम्=पृथक्त्वम् इति स्वीक्रियते। अतः यौ द्वौ पदार्थौ युतसिद्धौ=पृथक्सिद्धौ भवतः अर्थात् पृथक्-पृथक् निष्पद्यते, तौ युतसिद्धौ। यथा गजः अश्वश्च। एतौ उभावपि परस्परम् अनाश्रितौ सन्तौ युतसिद्धौ स्तः। अतस्तयोः सम्बन्धः 'संयोगः' भवति। यौ द्वौ युतसिद्धौ न भवतः, तौ अयुतसिद्धौ उच्येते।

अतः अत्र ग्रन्थकारः अयुतसिद्धस्य लक्षणम् इत्थं वदति - "ययोर्मध्ये एकमविनश्यदपराश्रितमेवावतिष्ठते तावयुतसिद्धौ" इति। अर्थात् ययोः द्वयोः पदार्थयोर्मध्ये कश्चन एकः पदार्थः स्वाविनश्यदवस्थायाम्=विनाशसामग्र्याः अनुपस्थितावस्थायाम् अपरपदार्थाश्रितः सन् तिष्ठति, तौ पदार्थौ अयुतसिद्धौ इत्युच्येते। अत्र द्वयोः पदार्थयोः साहचर्यम् आवश्यक नास्ति, केवलं एकस्य पदार्थस्य

अपरपदार्थाश्रितत्वमेव आवश्यकम्। एते अयुतसिद्धाः पञ्च भवन्ति। तद्यथा -

(i.) **अवयवावयविनौ** – यथा तन्तुः अवयवः, पटश्च अवयवी। तन्तुभ्यः पटः पृथक्कर्तुं न शक्यते। अतः तौ अयुतसिद्धौ वर्तेते। तयोः सम्बन्धः ‘समवायः’ भवति। अयमभिप्रायः - यावत्पर्यन्तम् अवयवाः तन्तवः अवयवी च पटः तिष्ठतः अर्थात् विनाशस्य अन्तिमकारणतन्तुनाशस्य सन्निधानात् पूर्वं पटः (अवयवी), तन्तुषु (अवयवेषु) एव आश्रितः भवति। अतः तन्तुपटयो अयुतसिद्धसिद्धत्वात् तयोः सम्बन्धः समवायः।

(ii.) **गुणगुणिनौ** - यथा घटः घटरूपं च, पुष्पं गन्धश्च, जलं तद्गतः रसश्च। अनयोः गुणगुणिनोः सम्बन्धः समवायः। घटरूपं घटात् पृथक् न तिष्ठति, गन्धः पुष्पात् पृथक् न तिष्ठति, न वा जलरसः जलात् पृथक् तिष्ठति। अतः एतेषाम् अयुतसिद्धत्वात् समवायसम्बन्धः।

(iii.) **क्रियाक्रियावन्तौ** - उत्क्षेपण-अपक्षेपण-आकुञ्चन-प्रसारण-गमनानि कर्माणि क्रिया इति उच्यते। एषा क्रिया यस्मिन् भवति सः क्रियावान् उच्यते। क्रियावतः क्रिया पृथक्कर्तुं न शक्यते।

अतः एतौ क्रिया-क्रियावन्तौ अयुतसिद्धौ। तस्मात् तयोः सम्बन्धः समवायः।

(iv.) **जातिव्यक्ती** - जातिः नाम सामान्यम्। "नित्यमेकानुगतं सामान्यम्" इति सामान्यस्य लक्षणम्। यथा भिन्नेषु सर्वेषु घटेषु "अयं घटः", "अयं घटः" इति एका समानाकारिका प्रतीतिः भवति। एषा प्रतीतिः येन भवति, तत् "घटत्वम्" इति सामान्यम् उच्यते। एतत् घटत्वं सर्वदा घटव्यक्तिषु एव तिष्ठति। अतः जातिव्यक्ती अयुतसिद्धपदार्थौ स्तः, अतस्तयोः सम्बन्धः समवायः एव।

(v.) **विशेषनित्यद्रव्ये** – न्यायवैशेषिकदर्शने नित्यद्रव्याणि नव स्वीक्रियन्ते। तद्यथा आकाशः, कालः, दिक्, आत्मा, मनः, पृथ्व्यप्तेजोवायूनां परमाणवः इति। एतेषु नित्यद्रव्येषु कश्चन 'विशेष'-संज्ञकः पदार्थः स्वीक्रियते। सः सर्वदा नित्यद्रव्याश्रितः एव तिष्ठति। अतः विशेष-नित्यद्रव्ये अयुतसिद्धपदार्थौ स्तः, तेन तयोः सम्बन्धः समवायः एव भवति।

एवञ्च तन्तुपटयोः अयुतसिद्धत्वात् तयोः सम्बन्धः समवायः एव। अतः तन्तुष एव समवेतः पटः जायते न तुर्यादिषु। तन्तुपटोदाहरणे 'अविनश्यत्' इति पदम् अपि आवश्यकम् अस्ति। एतद् दलं न दीयते

तर्हि लक्षणे अतिव्याप्तिः स्यात्। न्याय-वैशेषिकशास्त्रानुसारम् एकं क्षणं तादृशमपि भवति यदा पटः निराश्रितः तिष्ठति अर्थात् तन्तुषु आश्रितः न तिष्ठति। न्याय-वैशेषिकदर्शने कार्यद्रव्यस्य नाशः त्रेधा अभ्युपगम्यते। तद्यथा - (१) समवायिकारणनाशात् 'कार्यद्रव्यं' नश्यति, (२) असमवायिकारणनाशात् 'कार्यद्रव्यं' नश्यति, (३) समवायि-असमवायिकारणनाशात् 'कार्यद्रव्यं' नश्यति इति। पटस्य समवायिकारणं "तन्तवः", असमवायिकारणं तु "तन्तुसंयोगः" अस्ति। कारणं सर्वदा कार्यस्य पूर्ववर्ति भवति। अतः पटनाशे कारणभूतः यः तन्तुनाशः अस्ति, सः अवश्यं पटनाशात् पूर्वक्षणे भवति। एवञ्च तन्तुनाशात् पटनाशस्य क्रमः इत्थं भवति -

- पटनाशस्य कारणम् → तन्तुनाशः – पूर्वक्षणे भवति।
- तन्तुनाशस्य कार्यम् → पटनाशः - उत्तरक्षणे भवति।

अतः पूर्वक्षणे यदा तन्तुनाशः जात, तदा एकं क्षणं यावत् पटः निराश्रितः एव तिष्ठति। तेन "ययोर्मध्ये एकम् अपराश्रितमेव अवतिष्ठते" इति कथनम् सङ्गतं भवति। किन्तु यदा तु लक्षणे "अविनश्यत्" इति पदं निवेश्यते तदा एतद् लक्षणं सुसङ्गतं भवति। अतः ययोः द्वयोः मध्ये

एकं [=पटकार्यम्] यावत् विनश्यतायाः अवस्थां न प्राप्नोति तावत् पर्यन्तं तत् [=पटकार्यम्] अपराश्रितम् [=तन्त्वाश्रितम्] एव तिष्ठति। तां विनश्यदवस्थां विना तन्तुपटयोः मध्ये पटः अपराश्रितः एव तिष्ठति। अतः तन्तुपटौ अयुतसिद्धौ स्तः। तेन तयोः सम्बन्धः समवायः एव, न तु संयोगः।

यथा अवयव-अवयविनौ अयुतसिद्धौ भवतः, तथैव गुण-गुणिनौ अपि अयुतसिद्धौ भवतः। अयुतसिद्धत्वात् तयोः सम्बन्धस्तु समवाय एव। यथा पटस्य समवायिकारणं तन्तुः, पटगतरूपस्य समवायिकारणं पटः भवति। अत्र पटः पटगतरूपम् - अनयोर्मध्ये गुण-गुणिभावः विद्यते। पटरूपं गुणः अस्ति, पटः गुणी अस्ति। अतः पटः स्वगतरूपादिगुणानां (पटगतानां शुक्ल-नील-पीतादिगुणानां) समवायिकारणं भवति। एवमेव घटस्य समवायिकारणं मृत्पिण्डः भवति, घटगतरूपस्य समवायिकारणं घटः एव भवति। एवम् अन्यानि अपि उदाहरणानि द्रष्टव्यानि।

## ३.९ निर्गुणद्रव्योत्पत्तिः

न्याय-वैशेषिकदर्शनरीत्या द्रव्यं स्वोत्पत्तिक्षणे निर्गुणं निष्क्रियं च भवति इति प्रसङ्गप्राप्तं सिद्धान्तं ग्रन्थकारः प्रश्नमाध्यमेन उत्थाय स्पष्टीकरोति -

(मूलम्)

**ननु यदैव घटादयो जायन्ते तदैव तद्गतरूपादयोऽपि, अतः समानकालीनत्वाद् गुणगुणिनोः सव्येतरविषाणवत् कार्यकारणभाव एव नास्ति पौर्वापर्याभावात्। अतो न समवायिकारणं घटादयः स्वगतरूपादीनाम्। कारणविशेषत्वात् समवायिकारणस्य।**

घटगतरूपस्य समवायिकारणं घटः इति पूर्वमुक्तम्। अत्र पूर्वपक्षी प्रश्नं करोति यत् घटादिद्रव्यं यदा उत्पद्यते, तदा घटगतरूपादीनां गुणानाम् अपि उत्पत्तिः भवतीति स्वीकरणीयं भवेत्। यतो हि घटादिद्रव्यं क्षणमपि रूपादिगुणहीनं न दृश्यते। अपि च कार्यकारणभावस्य कृते पौर्वापर्यम् आवश्यकम् अस्ति। "अनन्यथासिद्धनियतपश्चाद्भावित्वं कार्यत्वम्", "अनन्यथासिद्धनियतपूर्वभावित्वं कारणत्वम्" इति कार्यकारणलक्षणयोः पौर्वापर्यभावः उक्तः अस्ति। यदि घटस्य उत्पत्तेः अनन्तरं घटगतरूपादयो जायन्ते इति स्वीक्रियते तर्हि द्वितीये क्षणे घटगतरूपादीनां चाक्षुषप्रत्यक्षं न भविष्यति। अपि च यदि प्रथमे क्षणे घटः गुणाभावात् 'निर्गुणः' भविष्यति तर्हि घटः 'द्रव्यम्' एव न भवितुम् अर्हति। यतो हि "गुणाश्रयत्वं द्रव्यत्वम्" इति द्रव्यस्य लक्षणं प्रसिद्धम्। अतः समानकाले उत्पत्तिकारणात् पौर्वापर्याभावात् यथा कस्यचन पशोः

सव्येतरविषाणयोः (=वाम-दक्षिणश्रृङ्गयोः) मध्ये कार्यकारणभावो न भवति, तथैव घटादयः अपि स्वगतरूपादिगुणानां समवायिकारणं न भवितुम् अर्हन्ति। अतः घटगतरूपादिगुणानां घटादिद्रव्याणां च मध्ये कार्यकारणभावः एव नास्ति अर्थात् घटादिद्रव्येषु स्वगतरूपादिगुणं प्रति कारणत्वम् एव नास्ति, तर्हि घटादयः स्वगतरूपादिगुणानां समवायिकारणं कथं भवितुम् अर्हन्ति? अर्थात् न भवितुम् अर्हन्ति।

एतस्याः शङ्कायाः समाधानं ग्रन्थकारेण क्रियते -

(मूलम्)

**अत्रोच्यते — न गुणगुणिनोः समानकालीनं जन्म, किन्तु द्रव्यं निर्गुणमेव प्रथममुत्पद्यते पश्चात् तत्समवेता गुणा उत्पद्यन्ते। समानकालोत्पत्तौ तु गुणगुणिनोः समानसामग्रीकत्वाद् भेदो न स्यात्। कारणभेदनियतत्वात् कार्यभेदस्य। तस्मात् प्रथमे क्षणे निर्गुण एव घट उत्पद्यते गुणेभ्यः पूर्वभावीति भवति गुणानां समवायिकारणम्।**

**तदा कारणभेदोऽप्यस्ति। घटो हि घटं प्रति न कारणमेकस्यैव पौर्वापर्याभावात्। न हि स एव तमेव प्रति पूर्वभावी पश्चाद्भावी चेति। स्वगुणान् प्रति पूर्वभावित्वाद् भवति गुणानां समवायिकारणम्।**

गुणगुणिनोः उत्पत्तिः समानकालीना न भवति। प्रथमतः द्रव्यं निर्गुणमेव उत्पद्यते। तत्पश्चात् तस्मिन् द्रव्ये समवायसम्बन्धेन विद्यमानाः गुणाः उत्पद्यन्ते। यदि गुण-गुणिनोः उभयोः उत्पत्तिः समानकाले स्वीक्रियते तर्हि तयोः कारणसामग्री अपि एका एव स्यात्। तर्हि तयोर्मध्ये घटः 'गुणी', घटगतरूपं 'गुणः' इत्याकारकः भेदव्यवहारः न स्यात्। यतो हि "कारणभेदनियतत्वात् कार्यस्य" इति नियमः अस्ति अर्थात् कार्यस्य भेदः कारणभेदात् नियतः [=व्याप्तः] भवति। कार्ये भेदः तदा एव भवति यदा तस्य कारणं भिन्नं स्यात्। अतः प्रथमे क्षणे निर्गुणः एव घटः उत्पद्यते, तत्पश्चात् तस्मिन् घटे रूपादिगुणानाम् उत्पत्तिः भवति। तथा सति घट-तद्गतरूपयोः मध्ये पौर्वापर्यभावः अपि भवति, तेन घटः स्वगतरूपादिगुणानां समवयिकारणं भविष्यति।

अपि च घट-तद्गतरूपयोः मध्ये कारणभेदोऽपि अस्ति। एकः घटः अपरस्य घटस्य कारणं न भवति, यतो हि तयोः कारणसामग्री एका एव अस्ति। न वा एकस्मिन् घटे स्वस्य पौर्वापर्यभावो विद्यते। अतः एकः घटः स्वं प्रति पूर्वभावी पश्चाद्भावी वा न भवति। किन्तु स घटः स्वगुणान् प्रति तु पूर्वभावी अवश्यं भवति, तेन स घटः स्वगुणान् प्रति समवायिकारणं भवितुम् अर्हति।

## (मूलम्)

नन्वेवं सति प्रथमे क्षणे घटोऽचाक्षुषः स्याद्, अरूपिद्रव्यत्वाद् वायुवत्। तदेव हि द्रव्यं चाक्षुषं, यन्महत्त्वे सत्युद्भूतरूपवत्। अद्रव्यं च स्याद् गुणाश्रयत्वाभावात्, गुणाश्रयो द्रव्यमिति हि द्रव्य लक्षणम्।

**सत्यम्। प्रथमे क्षणे घटो यदि चक्षुषा न गृह्यते का नो हानिः। न हि सगुणोत्पत्तिपक्षेऽपि निमेषावसरे घटो गृह्यते। तेन वस्थितमेतन्निर्गुण एव प्रथमं घट उत्पद्यते। द्वितीयादिक्षणेषु चक्षुषा गृह्यते।**

**न च प्रथमे क्षणे गुणाश्रयत्वाभावाद् अद्रव्यत्वापत्तिः। समवायिकारणं द्रव्यमिति द्रव्यलक्षणयोगात्। योग्यतया गुणाश्रयत्वाच्च। योग्यता च गुणानामत्यन्ताभावाभावः।**

अत्र पूर्वपक्षी आशङ्कते यत् प्रथमे क्षणे निर्गुणमेव घट उत्पद्यते तर्हि अत्र दोषद्वयम् आपतति। तत्र प्रथमः दोषस्तावत् अयम् अस्ति यत् प्रथमे क्षणे घटद्रव्यस्य चाक्षुषप्रत्यक्षं न भविष्यति। यतो हि यस्मिन् द्रव्ये ‘महत्परिमाणम्’ ‘उद्भूतरूपम्’ इति गुणद्वयं भवति तस्यैव द्रव्यस्य चाक्षुषप्रत्यक्षं भवति। प्रथमे क्षणे घटस्य निर्गुणत्वात् तस्मिन् रूपादिगुणाः न तिष्ठन्ति, अतः रूपरहितवायुवत् घटस्य चाक्षुषप्रत्यक्षं न भविष्यति। द्वितीयः दोषः अयम् अस्ति यत् न्यायदर्शने “गुणाश्रयो

द्रव्यम्” इति द्रव्यस्य लक्षणम् उक्तम् अस्ति। इदानीं प्रथमे क्षणे निर्गुणत्वात् घटः ‘द्रव्यम्’ इति संज्ञां न प्राप्नोति अर्थात् घटः ‘द्रव्यम्’ एव न भविष्यतीति।

अत्र ग्रन्थकारः समाधानं वदति “सत्यम्” इति। यदि प्रथमे क्षणे निर्गुणत्वात् घटादिद्रव्यस्य चाक्षुषं प्रत्यक्षं न भवति तर्हि अस्माकं का हानिः? भवतः सगुणोत्पत्तिपक्षेऽपि नेत्रनिमीलनकाले पुरतः विद्यमानस्य घटस्य चाक्षुषं प्रत्यक्षं न भवति। अतः घटादिद्रव्यं स्वोत्पत्तिके प्रथमे क्षणे यदि चक्षुषा न गृह्यते तर्हि अस्माकं सिद्धान्तस्य काऽपि हानिः न भवति। न च प्रथमे क्षणे घटादिद्रव्यस्य चाक्षुषं प्रत्यक्षं स्यात् इति कश्चन अनिवार्यः नियमः अस्ति। द्वितीयादिक्षणेषु तु घटादिद्रव्येषु रूपादिगुणानाम् उत्पत्तिकारणात् तेषां चाक्षुषं प्रत्यक्षं भवत्येव।

न वा पूर्वपक्षिणा एवं वक्तव्य यत् घटादिद्रव्यं निर्गुणमेव उत्पद्यते तर्हि प्रथमे क्षणे निर्गुणत्वात् तत्र द्रव्यलक्षणं न स्यात्। “गुणाश्रयो द्रव्यम्” इति द्रव्यलक्षणम् अस्माभिः न अङ्गीक्रियते। अस्माकं सिद्धान्ते तु “समवायिकारणत्वं द्रव्यत्वम्” इति द्रव्यलक्षणं सिद्धान्तितम् अस्ति। अर्थात् यत् कस्यापि कार्यस्य समवायिकारणं भवितुम् अर्हति (समवायिकारणयोग्यत्वम्), तत् द्रव्यम्। स्वविनाशक्षणात्

अव्यवहितपूर्वक्षणे अर्थात् विनश्यदवस्थायां द्रव्ये समवायिकारणत्वं न भवति चेदपि तस्मिन् समवायकारणयोग्यता [=द्रव्यत्वजातिः] तु भवत्येव। अत्र योग्यता नाम गुणानाम् अत्यन्ताभावाभावः अर्थात् यत् गुणानाम् अत्यन्ताभावस्य अधिकरणं न स्यात्। घटः गुणानाम् अत्यन्ताभावस्य अधिकरणं न भवति। यद्यपि प्रथमे क्षणे घटे गुणानाम् अभावः अस्ति तथापि तत्समनन्तरक्षणे तस्मिन् गुणाः जायन्ते। अतः घटः गुणानाम् अत्यन्ताभावस्य अधिकरणं न भवति। एवञ्च प्रथमे क्षणे उत्पन्नः निर्गुणः घटः द्वितीये क्षणे उत्पन्नानां रूपादिगुणानां समवायिकारणं भवत्येव। अतः घटादिद्रव्यस्य प्रथमे क्षणे अद्रव्यत्वशङ्का उचिता नास्ति। एतेन "द्रव्यं निर्गुणमेव प्रथमम् उत्पद्यते, पश्चात् तत्समवेता गुणा उत्पद्यन्ते इति निर्गुणोत्पत्तिसिद्धान्तः सर्वथा उचितः अस्ति।

## ३.१० असमवायिकारणम्

(मूलम्)

**असमवायिकारणं तदुच्यते यत्समवायिकारणप्रत्यासन्नमवधृत-सामर्थ्यं तदसमवायिकारणम्। यथा तन्तुसंयोगः पटस्यासमवायिकारणम्। तन्तुसंयोगस्य गुणस्य, पटसमवायिकारणेषु**

तन्तुषु गुणिषु, समवेतत्वेन समवायिकारणे प्रत्यासन्नत्वात्, अन्यथासिद्धनियतपूर्वभावित्वेन पटं प्रति कारणत्वाच्च।

एवं तन्तुरूपं पटरूपस्य असमवायिकारणम्।

इदानीम् असमवायिकारणस्य लक्षणम् उच्यते - “यत्समवायिकारणप्रत्यासन्नम् अवधृतसामर्थ्य तत् असमवायिकारणम्” इति। अयमभिप्रायः यत् समवायिकारणप्रत्यासन्नं (समवायिकारणे तिष्ठति) भवति तथा च यस्मिन् कार्यम् उत्पादयितुं सामर्थ्यं निश्चितं भवति अर्थात् यस्मिन् ‘अनन्यथासिद्धनियतपूर्वभावित्वरूपं कारणलक्षणं समन्वितं स्यात्, तत् असमवायिकारणम् उच्यते। यथा ‘तन्तुसंयोगः’ ‘पटः’ इति कार्यस्य असमवायिकारणं भवति। तन्तुसंयोगः कश्चन गुणपदार्थः अस्ति, स च पटस्य समवायिकारण-तन्तुसंज्ञकगुणिषु ‘समवेतः’=समवायसम्बन्धेन तिष्ठति। अतः तन्तुसंयोगः पटसमवायिकारणतन्तुषु प्रत्यासन्नः भवति। तथा च अयं तन्तुसंयोगः पटात्मककार्यं प्रति ‘अनन्यथासिद्धनियतपूर्वभावित्वम्’ इति कारणलक्षणेन समन्वितम् अपि अस्ति अर्थात् ‘समवायिकारणप्रत्यासन्नमवधृतसामर्थ्यम्’ इति दलं तन्तुसंयोगे समन्वितं भवति। अतः तन्तुसंयोगः पटस्य असमवायिकारणम् अस्ति। एवमेव तन्तुरूपं पटरूपस्य असमवायिकारणम्। तन्तुरूपम्=तन्तुषु विद्यमानं

शुक्लनीलपीतादिरूपम्, पटरूपम्=पटे विद्यमानं शुक्लनीलपीतादिरूपम्। पटरूपस्य समवायिकारणं तु पटः भवति, परं तस्य असमवायिकारणं तन्तुरूपं भवति।

(मूलम्)

**ननु पटरूपस्य पटः समवायिकारणं, तेन तद्गतस्यैव कस्यचिद्धर्मस्य पटरूपं प्रत्यसमवायिकारणत्वमुचितम्। तस्यैव समवायिकारणप्रत्यासन्नत्वात्। न तु तन्तुरूपस्य। तस्य समवायिकारणप्रत्यासत्त्यभावात्।**

**मैवम्। समवायिकारणसमवायिकारणप्रत्यासन्नस्यापि परम्परया समवायिकारणप्रत्यासन्नत्वात्।**

पूर्वं तन्तुरूपं पटरूपस्य असमवायिकारणम् इति उक्तम्। अत्र एका शङ्का भवति यत् समवायिकारणे प्रत्यासन्नः अनन्यथासिद्धनियतपूर्वभावी च कश्चन धर्मः असमवायिकारणं भवति। इदानीं पश्यामः यत् एतादृशः धर्मः कः भवितुम् अर्हति। पटरूपं 'गुणः' अस्ति, तस्य समवायिकारणं पटः 'गुणी' अस्ति। अतः पटगतः कश्चन धर्मः पटरूपस्य असमवायिकारणं भवेत्। तन्तुरूपं तु पटाद्भिन्नेषु तन्तुषु विद्यमानः कश्चन 'गुणः' अस्ति अर्थात् तन्तुरूपं तन्तुषु भवति, न पटे।

तन्तुरूपस्य समवायिकारणे पटे प्रत्यासत्तिः नास्ति, अतः तन्तुरूपं पटरूपस्य असमवायिकारणं कथम् भवितुम् अर्हति?

अत्र समाधीयते - समवायिकारणे प्रत्यासत्तिः (=निकटसम्बन्धः) द्विविधा भवति साक्षात् परम्परया च। साक्षात् प्रत्यासत्तिः कार्यैकार्थप्रत्यासत्तिः, परम्परया प्रत्यासत्तिः च कारणैकार्थप्रत्यासत्तिः उच्यते। यद्यपि पटरूपस्य साक्षात् प्रत्यासत्तिः पटे अस्ति न तन्तुषु, तथापि परम्परया पटरूपस्य तन्तुषु प्रत्यासत्तिः अस्त्येव। पटः समवायसम्बन्धेन येषु तन्तुषु तिष्ठति, तेषु एव तन्तुषु तन्तुसंयोगाख्यः गुणः अपि तिष्ठति। अतः कार्येण=पटेन सह, कारणस्य=तन्तुसंयोगस्य एकस्मिन् अर्थे=तन्तुषु प्रत्यासत्तिः अस्ति। एतादृशी प्रत्यासत्तिः 'साक्षात् प्रत्यासत्तिः'=कार्यैकार्थप्रत्यासत्तिः उच्यते।

यत्र कश्चन धर्मः कार्येण सह न, परं कारणेन सह एकस्मिन् अर्थे प्रत्यासन्नः भवति, सः परम्परया प्रत्यासन्नः भवति। यद्यपि तन्तुरूपं न स्वकार्यभूतेन=पटेन सह, न वा पटरूपसमवायिकारणेन=पटेन सह एकस्मिन् अर्थे=तन्तुषु प्रत्यासन्नम् अस्ति तथापि इदं पटरूपासमवायिकारणं=तन्तुरूपम्, पटरूपस्य यत् समवायिकारणम्=पटः, तस्य यत् समवायिकारणं=तन्तवः, तेषु तिष्ठति। एतादृशी प्रत्यासत्तिः 'परम्परया प्रत्यासत्तिः'=कारणैकार्थप्रत्यासत्तिः

उच्यते। अतः समवायिकारणस्य समवायिकारणे प्रत्यासन्नः धर्मः अपि परम्परया समवायिकारणे प्रत्यासन्नः अस्ति इति मत्त्वा तन्तुरूपं पटरूपस्य असमवायिकारणं वक्तुं शक्यते।

### ३.११ निमित्तकारणम्

(मूलम्)

**निमित्तकारणं तदुच्यते। यन्न समवायिकारणं, नाप्यसमवायिकारणम्। अथ च कारणं तन्निमित्तकारणम्। यथा वेमादिकं पटस्य निमित्तकारणम्।**

**तदेतत् भावानामेव त्रिविधं कारणम्। अभावस्य तु निमित्तमात्रं, तस्य क्वचिदप्यसमवायात्। समवायस्य भावद्वयधर्मत्वात्।**

**तदेतस्य त्रिविधस्य कारणस्य मध्ये यदेव कथमपि सातिशयं तदेव करणम्। तेन व्यवस्थितमेतल्लक्षणं प्रमाकरणं प्रमाणमिति।**

इदानीं निमित्तकारणस्य लक्षणम् उच्यते। यत् न समवायिकारणम्, न वा असमवायिकारणम्, तथापि कस्यचित् कार्यस्य कारणम् (=अनन्यथासिद्धनियतपूर्वभावित्वम्) भवति, तत् 'असमवायिकारणम्' उच्यते। यथा 'पट'-कार्यस्य वेमादिकं

निमित्तकारणम्। तुरी, वेमा इत्यादीनि पटनिर्माणे तन्तुवायेन प्रयुज्यमानानि कतिपयानि उपकरणानि भवन्ति। आदिपदेन कर्मकरादीनां परिग्रहः। अयमभिप्रायः सर्वस्यापि कार्यस्य बहूनि कारणानि भवन्ति। तत्र किञ्चित् समवायिकारणम्, किञ्चिच्च असमवायिकारणं भवति। तदुभयकारणभिन्नानि सर्वाणि अपि कारणानि निमित्तकारणानि भवन्ति। यथा पटं प्रति तन्तवः समवायिकारणम्, तन्तुसंयोगः असमवायिकारणम्, अन्यानि तुरीवेमादीनि सर्वाणि निमित्तकारणानि भवन्ति।

अत्रायं विशेषः - समवायि, असमवायि निमित्तं चेति त्रिविधानि कारणानि केवलं भावकार्याणां (सत्पदार्थानाम्) एव भवन्ति। 'अभाव'-पदार्थस्य केवलं निमित्तकारणं भवति। यतः समवायः द्वयोः भावपदार्थयोः मध्ये भवति, अतः अभावस्य केनापि पदार्थेन सह समवायसम्बन्धः न भवति। समवायिकारणं केवलम् 'द्रव्यम्' भवति। असमवायिकारणं 'गुणः', 'कर्म' (क्रिया) भवितुम् अर्हति। निमित्तकारणं तु द्रव्यम्, गुणः, कर्म च भवितुम् अर्हति।

एतेषु त्रिविधकारणेषु यत् कारणम् अन्येभ्यः कारणेभ्यः उत्कृष्टं=सातिशयं भवति, तत् 'करणम्' भवति। अयमभिप्रायः यत् प्रमाता, प्रमेयः इत्यादीनि यं पदार्थं विना स्वकार्यं=प्रमाम् उत्पादयितुं न

शक्नुवन्ति, स एव ‘सातिशयः’ पदार्थः भवति। अतः “सातिशयं कारणं करणम्” इति करणस्य वास्तविकं लक्षणं सम्पद्यते। करणस्य व्यावहारिकं लक्षणं तु “व्यापारवत् असाधारणकारणं कारणं करणम्” इति बोध्यम्। अतः प्रमाकरणं प्रमाणम् इति प्रमाणं व्यवस्थितम् अस्ति।

### ३.११ धारावाहिकं ज्ञानम्

इदानीं ग्रन्थकारः मीमांसकैः बौद्धदार्शनिकैश्च प्रोक्तस्य प्रमाणलक्षणस्य खण्डनं करोति -

(मूलम्)

यत्तु, अनधिगतार्थगन्तृ प्रमाणमिति लक्षणम्, तन्न। एकस्मिन्नेव घटे घटोऽयं घटोऽयमिति धारावाहिकज्ञानानां गृहीतग्राहिणामप्रामाण्यप्रसङ्गात्।

न चान्यान्यक्षणविशिष्टविषयीकरणाद् अनधिगतार्थगन्तृता। प्रत्यक्षेण सूक्ष्मकालभेदानाकलनात्। कालभेदग्रहे हि क्रियादिसंयोगान्तानां चतुर्णां यौगपद्याभिमानो न स्यात्। क्रिया, क्रियातो विभागो, विभागात् पूर्वसंयोगनाशः, ततश्चोत्तरदेशसंयोगोत्पत्तिरिति।

कुमारिलभट्टानुयायिभिः मीमांसकैः दिङ्नागादिबौद्धमतावलम्बिभिः च आचार्यैः "अनधिगतार्थगन्तृ प्रमाणम्" इति प्रमाणलक्षणं प्रोक्तम्। अर्थात् यत् अनधिगतस्य (अज्ञातस्य) अर्थस्य ज्ञापकं भवति, तत् 'प्रमाणम्' इति। तद्यथा - कश्चन जनः यदा घटं पश्यति तदा यत् प्रथमं ज्ञानम् उत्पद्यते, तत् अनधिगतम् अर्थं गृह्णाति। प्रथमज्ञानेन गृहीतः घटः, प्रथमज्ञानस्य उत्पत्तेः प्राक् अज्ञातः भवति। अतः 'अयं घटः' इति प्रथमं ज्ञानं 'प्रमा' उच्यते। एतादृशस्य ज्ञानस्य उत्पादकं चक्षुः प्रमाणम् उच्यते। अयमभिप्रायो वर्तते यत् कस्यापि प्रमाणस्य प्रमाणत्वं तदानीमेव अस्ति यदा तत् प्रमाणं नवीनविषयस्य ज्ञापकं भवेत्। "प्रमाकरणं प्रमाणम्" इति लक्षणलक्षितं प्रमाणं तु सर्वदा अनधिगतस्य अर्थस्य एव ग्रहणं करोति इति वक्तुं न शक्यते। द्वितीयादिक्षणेषु यत् ज्ञानं जायते तत् प्रथमादिक्षणेषु अधिगतस्य अर्थस्य एव ग्रहणं करोति। अतः "प्रमाकरणं प्रमाणम्" इति लक्षणं दोषसहितम् अस्ति। तत्स्थाने "अनधिगतार्थगन्तृ प्रमाणम्" इति लक्षणं भवेत् इति अभिसन्धिः।

अत्र ग्रन्थकारः "अनधिगतार्थगन्तृ प्रमाणम्" इति लक्षणस्य निराकरणं करोति। यतः प्रथमं ज्ञानम् 'अयं घटः', द्वितीयं ज्ञानम् 'अयं घटः' इतिरूपेण यत् धारावाहिकं ज्ञानं जायते तत् यथार्थज्ञानं (प्रमात्मकं) भवति। किन्तु यदि "अनधिगतार्थगन्तृ" इति प्रमाणं भवेत्

तर्हि द्वितीयादिबुद्धिः (द्वितीयादिज्ञानं) गृहीतग्राहिकारणात् अप्रमात्मकं भवति, तच्च न सङ्गच्छते। अतः "अनधिगतार्थगन्तृ" इति प्रमाणलक्षणं सम्यक् नास्ति।

अत्र पूर्वपक्षी एवं वदति - भिन्नेषु क्षणेषु 'अयं घटः', 'अयं घटः' इति यत् धारावाहिकं ज्ञानं जायते, तत्र कालभेदेन घटः तत्तत्क्षणविशिष्टः भवति। यथा 'प्रथमक्षणविशिष्टः घटः', 'द्वितीयक्षणविशिष्टः घटः', 'तृतीयक्षणविशिष्टः घटः' इत्यादिरूपेण। धारावाहिके ज्ञानेऽपि प्रमाणम् अज्ञातार्थस्य घटादेः एव ग्राहकं भवति। अतः "अनधिगतार्थगन्तृ" इति लक्षणलक्षितेन प्रमाणेन उत्पन्नं धारावाहिकं ज्ञानं प्रमा भवत्येव।

पूर्वपक्षस्य एतादृशं समाधानं ग्रन्थकारेण निराक्रियते। यतः 'कालभेदः' अत्यन्तं सूक्ष्मः अस्ति, तस्य प्रत्यक्षेण ग्रहणं कर्तुं न शक्यते। यदि कालस्य सूक्ष्मभेदस्य ग्रहणं भवेत् तर्हि क्रियातः संयोगान्तानां चतुर्णां कार्याणां यौगपद्यस्य भ्रमः न स्यात्, किन्तु जनानां भ्रमः भवति। अतः एतादृशस्य सूक्ष्मस्य कालस्य प्रत्यक्षेण ग्रहणं न भवति। वस्तुतः यत्र ज्ञानं भवति तत्र चत्वारि कार्याणि भवन्ति (१) क्रिया, (२) क्रियातः विभागः, (३) विभागात् पूर्वसंयोगनाशः, (४) ततश्च उत्तरदेशे संयोगोत्पत्तिः इति। एतानि चत्वारि कार्याणि युगपत् न भवन्ति, क्रमशः भवन्ति। परन्तु कालभेदः अत्यन्तं सूक्ष्मः अस्ति, प्रत्यक्षेण सर्वोऽपि

कालभेदः ग्रहीतुं न शक्यते। अतः प्रत्यक्षेण तु एतानि चत्वारि कार्याणि युगपत् एव भवन्ति इति प्रतीतिः भवति, सा च भ्रमः इति ज्ञेयम्।

### ३.१२ प्रमाणलक्षणस्य उपसंहारः

इत्थं प्रमायाः करणत्वेन प्रमाणं विचारितम्। इदानीं किं तत् प्रमाणं येन प्रमायाः उत्पत्तिः जायते इति उच्यते -

(मूलम्)

**ननु प्रमायाः कारणानि बहूनि सन्ति प्रमातृप्रमेयादीनि। तान्यपि किं करणानि उत नेति?**

**उच्यते। सत्यपि प्रमातरि प्रमेये च, प्रमानुत्पत्तेरिन्द्रियसंयोगादौ सति, अविलम्बेन प्रमोत्पत्तेः अत इन्द्रियसंयोगादिरेव करणम्। प्रमायाः साधकत्वाविशेषेऽप्यनेनवोत्कर्षेणास्य प्रमात्रादिभ्योऽतिशयितत्वाद् अतिशयितं साधकं साधकतमं तदेव करणमित्युक्तम्। अत इन्द्रियसंयोगादिरेव प्रमाकरणत्वात् प्रमाणं न प्रमात्रादि।**

**तानि च प्रमाणानि चत्वारि। तथा च न्यायसूत्रम् — "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" इति।**

प्रमातृप्रमेयादिभेदेन प्रमायाः कारणानि बहूनि भवन्ति। यथा यस्य कृते ज्ञानं जायते स ‘प्रमाता’, यस्य विषयस्य ज्ञानं भवति स ‘प्रमेयः’, विषयज्ञानाय यत् साधनं तत् ‘प्रमाणम्’ इत्यादीनि। किं तानि सर्वाणि अपि कारणानि ‘करणानि’ भवन्ति उत न?

अत्रोच्यते सत्यपि प्रमातरि प्रमेये च इन्द्रियसंयोगादेः अभावे प्रमायाः अनुत्पत्तिः दृश्यते। इन्द्रियसंयोगादेः सत्त्वे तु अविलम्बेन प्रमायाः उत्पत्तिः भवति। अतः इन्द्रियसंयोगादिरेव ‘करणम्’। अत्रायम् अभिसन्धिः - लोके वयं पश्यामः यत् कदाचित् पुरतः आलोके विद्यमानः ‘घटः’ इति विषयः अस्ति, तत्र कश्चन सम्यग्दृष्टिसम्पन्नः पुरुषः अपि अस्ति, परन्तु तस्य पुरुषस्य चक्षुरिन्द्रियस्य यदि घटेन सह सन्निकर्षः (सम्बन्धः) न भवति तर्हि ‘अयं घटः’ इति ज्ञानं नोत्पद्यते। यदा तु चक्षुरिन्द्रियस्य घटेन सह सन्निकर्षः जायते तदा तु अविलम्बेन ‘अयं घटः’ इति प्रमायाः उत्पत्तिः भवति। प्रमां प्रति प्रमाता, प्रमेयः, प्रमाणम् इत्यादीनि कारणानि तु भवन्ति, किन्तु ‘करणानि’ न भवन्ति। येन विना प्रमा नोत्पद्यते, यस्मिन् सत्त्वे तु अविलम्बेन उत्पद्यते, तादृशः ‘इन्द्रियसंयोगादिः’ एव ‘करणम्’ भवति। इन्द्रियसंयोगादिषु प्रमां प्रति प्रकृष्टसाधकत्वम् अस्ति। अतः अतिशयेन साधकत्वात् तदेव इन्द्रियसंयोगादि प्रमां प्रति ‘करणम्’ उच्यते। एतदेव अभिसन्धाय ग्रन्थकारेण ‘अत इन्द्रियसंयोगादिरेव प्रमाकरणत्वात् प्रमाणं न प्रमात्रादि’

इत्युक्तम्। इन्द्रियसंयोगादिः इत्यत्र 'इन्द्रियं च संयोगश्च तौ आदी यस्य स तथोक्तः' इति विग्रहः करणीयः। अत्र आदिपदेन निर्विकल्पकज्ञानादि गृह्यते। प्रत्यक्षप्रमायाः करणम् 'इन्द्रियार्थसन्निकर्षः' अस्ति, एष एव 'प्रत्यक्षप्रमाणम्' इति शब्देन अभिधीयते।

इदानीम् अयं प्रश्नः समुदेति यत् एतानि प्रमाणानि कति सन्ति? इति जिज्ञासायां ग्रन्थकारः न्यायसूत्रम् उदाहरति -




"प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" इति। प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दः चेति न्यायसम्मतानि चत्वारि प्रमाणानि सन्ति, नाधिकानि न वा न्यूनानि इत्यर्थः। एतेषां प्रमाणादिषोडशपदार्थानां तत्त्वज्ञानात् मोक्षप्राप्तिः भवति इति प्रागेव उक्तम् इति दिक्।

## प्रकृतपाठस्य सारः

- न्यायदर्शनरीत्या प्रमाणादिषोडशपदार्थानां तत्त्वज्ञानात् मोक्षप्राप्तिः भवति।
- न्यायशास्त्रस्य प्रवृतिः उद्देशः लक्षणं परीक्षा चेति त्रिप्रकारिका भवति।
- प्र-उपसर्गपूर्वकं मा-धातोः करणार्थे 'ल्युट्'-प्रत्यये कृते सति 'प्रमाणम्' इति शब्दः निष्पद्यते। "प्रमाकरणं प्रमाणम्" इति। यस्य च अर्थो भवति प्रमीयते ज्ञायते येन तत् प्रमाणम्।
- यत् करणम् भवति तस्य फलम् अवश्यं भवति। "यद्यत् करणम्, तत्तद् फलवत्" इति व्याप्तिः।
- "यथार्थानुभवः प्रमा" इति। यथार्थश्चासौ अनुभवश्च इति कर्मधारयसमासः।
- यथार्थानुभवः प्रत्यक्षम्, अनुमितिः, उपमितिः शाब्दश्चेति भेदेन चतुर्विधः भवति, अयथार्थानुभवः त्रिविधः भवति - संशयः विपर्ययः तर्कश्च।
- साधकतमं करणम्। अतिशयितं साधकं साधकतमं प्रकृष्टं कारणमित्यर्थः।

- यस्य कार्यात् पूर्वभावो नियतोऽनन्यथासिद्धश्च तत्कारणम्, अनन्यथासिद्धनियतपश्चाद्भावित्वं कार्यत्वं चेति कार्यकारणयोः लक्षणे।
- कारणं त्रिविधं भवति - समवायिकारणम्, असमवायिकारणं, निमित्तकारणं चेति।
- यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम्। यत्समवायिकारणे प्रत्यासन्नम् अवधृतसामर्थ्यं च तदसमवायिकारणम्। यन्न समवायिकारणं, नाप्यसमवायिकारणम्, अथ च कारणं तन्निमित्तकारणम्।
- ययोर्मध्ये एकमविनश्यदपराश्रितमेवावतिष्ठते तावयुतसिद्धौ उच्येते। यथा गुणगुणिनौ।
- द्रव्यं निर्गुणमेव प्रथमम् उत्पद्यते, पश्चात् तत्समवेताः गुणाः उत्पद्यन्ते इति निर्गुणद्रव्योत्पत्तिसिद्धान्तः।
- न्यायसम्मतानि प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दः चेति चत्वारि प्रमाणानि सन्ति।

* * *

## अभ्यासः

(अ) एकेन वाक्येन समाधानं लिखत।

१. न्यायदर्शने कति पदार्थाः स्वीकृताः सन्ति?

२. न्यायदर्शनस्य प्रवृत्तिः कतिविधा भवति?

३. को नाम उद्देशः?

४. न्यायदर्शनस्य आदिमं सूत्रं किम्?

५. का नाम प्रमा?

६. कारणं कतिविधम्?

७. गुणगुणिनौ कः सम्बन्धः भवति?

८. न्यायदर्शनरीत्या कति प्रमाणानि सन्ति?

९. अयथार्थानुभवः कतिविधः?

१०. तन्तुसंयोगः पटस्य कीदृशं कारणम्?

११. अभावकार्यस्य कारणं कतिविधम् भवति?

१२. यथार्थानुभवः कतिविधः?

१३. द्रव्यं प्रथमं निर्गुणम् उत्पद्यते उत सगुणम्?

१४. पटगतरूपादेः समवायिकारणं किम्?

१५. सम्बन्धः कतिविधः कश्च सः?

(आ) योग्यं विकल्पं योजयत।

| | |
|---|---|
| १ न्यायभाष्यकारः | (क) मोक्षप्राप्तिः |
| २ स्मृतिव्यतिरिक्तं ज्ञानम् | (ख) अन्यथासिद्धः |
| ३ घटं प्रति रासभः | (ग) केशवमिश्रः |
| ४ षोडशपदार्थतत्त्वज्ञानात् | (घ) वात्स्यायनः |
| ५ तर्कभाषाकारः | (ङ) अनुभवः |

(इ) व्याख्यात्मकरूपेण उत्तरं लिखत।

१. त्रिविधा शास्त्रप्रवृत्तिः।
२. करणलक्षणम्।
३. अयुतसिद्धत्वम्।
४. प्रमालक्षणम्।
५. इन्द्रियसन्निकर्षादेः करणत्वम्।

(ई) निबन्धात्मकरूपेण उत्तरं लिखत।

१. त्रिविधं कारणं सोदाहरणं प्रतिपादयत।

२. यथासिद्धान्तं निर्गुणद्रव्योत्पत्तिं साधयत।

### (उ) परियोजनाकार्यम्

१. भारतीयास्तिकदर्शनेषु कस्मिन् दर्शने कति प्रमाणानि स्वीक्रियन्ते, तेषां नामानि लक्षणानि उदाहरणानि च सङ्गृह्णीत।

* * *

## उत्तराणि – पाठः – ३

### (अ) एकेन वाक्येन समाधानं लिखत।

१. १६

२. त्रिविधा

३. नाममात्रेणवस्तुसङ्कीर्तनम्

४. "प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः" इति न्यायस्यादिमं सूत्रम्।

५. यथार्थानुभवः

६. त्रिविधम्

७. समवायः

८. चत्वारि

९. त्रिविधः

१०. असमवायिकारणम्

११. एकविधम्

१२. चतुर्विधम्

१३. निर्गुणम्

१४. पटः

१५. द्विविधः - संयोगः समवायश्च।

(आ) योग्यं विकल्पं योजयत।

१. (घ)

२. (ङ)

३. (ख)

४. (क)

५. (ग)

# पाठः – ४

## प्रत्यक्ष-प्रमाणम्

### ४.१ प्रत्यक्षलक्षणम्

न्यायदर्शने प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दः इति चतुर्विधानि प्रमाणानि। तत्र प्रत्यक्षप्रमाणम् इन्द्रियम्, अनुमानप्रमाणं व्याप्तिज्ञानम्, उपमानप्रमाणं सादृश्यज्ञानम्, शब्दप्रमाणं पदज्ञानं चेति अवगन्तव्यम्। चतुर्विधप्रमाणेषु प्रथमतः प्रत्यक्षप्रमाणस्य निरूपणं क्रियते ग्रन्थकारेण। इदं प्रत्यक्षप्रमाणम् अन्येषाम् अनुमानादिप्रमाणानाम् अपि मूलभूतत्वात् ज्येष्ठम् अस्ति। एतस्य प्रमाणस्य अन्यप्रमाणनिरपेक्षरूपेण प्रसिद्धिः वर्तते। सर्वेषु दार्शनिकेषु एतस्य प्रत्यक्षप्रमाणस्य अस्तित्वविषये शङ्का नास्ति। अतः ज्येष्ठत्वात् अन्यप्रमाणप्रधानत्वात् च सर्वादौ प्रत्यक्षप्रमाणं निरूप्यते-

(मूलम्)

**कि पुनः प्रत्यक्षम्?**

**साक्षात्कारिप्रमाकरणं प्रत्यक्षम्। साक्षात्कारिणी च प्रमा सैवोच्यते या इन्द्रियजा। सा च द्विधा सविकल्पकनिर्विकल्पकभेदात्।**

**तस्याः करणं त्रिविधम्। कदाचिद् इन्द्रियं, कदाचिद् इन्द्रियार्थसन्निकर्षः, कदाचित् ज्ञानम्।**

इदानीं प्रश्नः भवति यत् किं पुनः एतत् प्रत्यक्षम्? अत्र 'प्रत्यक्षम्' इति शब्दः 'प्रत्यक्षप्रमाणम्' इति अर्थं बोधयति। वस्तुतः 'प्रत्यक्षम्' इति पदं 'प्रत्यक्षप्रमाणम्', 'प्रत्यक्षज्ञानम्', 'प्रत्यक्षज्ञानविषयः' इत्यर्थेषु प्रयुज्यते। 'प्रतिगतम् अक्षम्' अर्थात् विषयं प्रति गतम् अक्षम् इति तत्पुरुषसमासेन 'प्रत्यक्षम्' इति शब्दः प्रत्यक्षप्रमाणस्य वाचकः भवति। यदा तु 'अक्षम् अक्षं प्रति वर्तते' इति अव्ययीभावसमासेन अर्थात् 'अक्षम् अक्षं प्रतीत्य उत्पद्यते इति प्रत्यक्षम्' इति व्युत्पत्त्या प्रत्यक्षशब्दः प्रत्यक्षप्रमायाः वाचकः भवति। यदा तु पुनः 'प्रत्यक्षम् अस्य अस्ति' इति व्युत्पत्त्या प्रत्यक्षशब्दः प्रत्यक्षविषयस्य वाचकः भवति। प्रथमद्वितीयार्थयोः प्रत्यक्षशब्दस्य प्रयोगः नपुंसकलिङ्गे भवति, तृतीये अर्थे तु अभिधेयानुसारेण त्रिषु लिङ्गेषु एतस्य प्रयोगः भवति यथा प्रत्यक्षः आत्मा, प्रत्यक्षा पृथिवी, प्रत्यक्षं रूपम् इत्यादि।

अत्र प्रश्नः अस्ति यत् किं पुनः प्रत्यक्षप्रमाणम्? तदा उत्तरं दीयते यत् "साक्षात्कारिप्रमाकरणम्" प्रत्यक्षम् इति। अर्थात् या प्रमा साक्षात्कारिणी भवति, तस्याः यत् करणम् अस्ति, तत् प्रत्यक्षप्रमाणम् उच्यते। साक्षात्कारिणी प्रमा इन्द्रियजन्या प्रमा उच्यते। या तु प्रमा

इन्द्रियजन्या न भवति, सा प्रमा साक्षात्कारिणी प्रमा नोच्यते यथा अनुमितिः, उपमितिः, शाब्दबोधः इति। इन्द्रियजन्या प्रमा एव वस्तुनः साक्षात्कारं कारयति। वस्तुनः साक्षात्कारो नाम वस्तुनः साक्षात् सद्भावे तस्य ग्रहणम्। इन्द्रियजन्या प्रमा वस्तुनः साक्षात् स्वरूपं ग्रहीतुम् इन्द्रियार्थसम्बन्धम् अपेक्षते। प्रमायाः तादृशः इन्द्रियार्थसन्निकर्षः तस्या इन्द्रियजन्यत्वेन एव सम्भवति।

अयम् अभिप्रायो वर्तते यत् प्रमायाः उत्पत्तिः आत्मनि भवति। आत्मगतप्रमायाः वस्तुना साकं सम्बन्धः परम्परया भवति। तत्र प्रत्यक्षक्रमः तु एवम् अस्ति-आत्मा पूर्वं मनसा संयुज्यते, आत्मसंयुक्तं मनः इन्द्रियेण, इन्द्रियं वस्तुना (अर्थेन) सह। ततः प्रत्यक्षम्। इत्थम् आत्मगतप्रमायाः वस्तुना साकं सम्बन्धः जायते तदा सा साक्षात्कारिणी प्रमा वस्तुनः यथार्थस्वरूपं गृह्णाति। इयम् इन्द्रियजा अर्थात् साक्षात्कारिणीप्रमा एव 'प्रत्यक्षप्रमा' उच्यते। प्रत्येकम् इन्द्रियस्य कश्चन विशिष्टः अर्थः (विषयः) भवति। यथा -

| इन्द्रियाणि | अर्थाः (विषयाः) |
|---|---|
| घ्राणः | गन्धः |
| रसना | रसः |
| चक्षुः | रूपम् |

| | |
|---|---|
| त्वक् | स्पर्शः |
| श्रोत्रम् | शब्दः |
| मनः | सुखदुःखादयः |

इयं प्रत्यक्षप्रमा निर्विकल्पक-सविकल्पकभेदात् द्विविधा भवति। अस्माकं सर्वोऽपि व्यवहारः सविकल्पकज्ञानेन भवति। तथापि तस्य उत्पत्तिः निर्विकल्पज्ञानस्य आधारेण भवति। अतः सविकल्पकज्ञानात् पूर्वं निर्विकल्पकज्ञानम् अवश्यम् अभ्युपेतव्यम्। एतादृशप्रत्यक्षप्रमायाः करणं त्रिविधं भवितुमर्हति। तद्यथा (१) इन्द्रियम्, (२) इन्द्रियार्थसन्निकर्षः, (३) निर्विकल्पकं ज्ञानं चेति। करणं त्रिविधम् अस्ति तर्हि तस्य फलमपि त्रिविधं भवति, अवान्तरव्यापारश्च तथैव। एतत् इदानीं रेखाचित्रमाध्यमेन पश्यामः -

| *करणम्* | *अवान्तरव्यापारः* | *फलम्* |
|---|---|---|
| १. इन्द्रियम् | इन्द्रियार्थसन्निकर्षः | निर्विकल्पकज्ञानम् |
| २. इन्द्रियार्थसन्निकर्षः | निर्विकल्पकज्ञानम् | सविकल्पकज्ञानम् |
| ३. निर्विकल्पकज्ञानम् | सविकल्पकज्ञानम् | हानोपादानोपेक्षाबुद्धिः |

(मूलम्)

**कदा पुनरिन्द्रियं करणम्?**

यदा निर्विकल्पकरूपा प्रमा फलम्। तथा हि, आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्दियमर्थेन। इन्द्रियाणां वस्तुप्राप्यप्रकाशकारित्वनियमात्। ततोऽर्थसन्निकृष्टेनेन्द्रियेण निर्विकल्पकं नामजात्यादियोजनाहीनं वस्तुमात्रावगाहि किञ्चिदिदमिति ज्ञानं जन्यते। तस्य ज्ञानस्येन्द्रियं करणं, छिदाया इव परशुः। इन्द्रियार्थसन्निकर्षोऽवान्तरव्यापारः, छिदाकारणस्य परशोरिव दारुसंयोगः। निर्विकल्पकं ज्ञानं फलं, परशोरिव छिदा।

इदानीं जिज्ञासा समुदेति यत् प्रत्यक्षप्रमायाः करणम् 'इन्द्रियम्' कदा भवति? अत्रोच्यते यदा निर्विकल्पकप्रमा फलं भवति तदा। विकल्पो नाम विशेषणविशेष्यभावः, तस्माद् विकल्पात् निर्गतं निर्विकल्पकम्। सह विकल्पेन वर्तते इति सविकल्पकम्। यथा दूरात् आलोचिते वस्तुनि यद् 'इदं किञ्चित्' इत्याकारकं नामजात्यादियोजनाहीनं ज्ञानं जायते तत् निर्विकल्पकम्। इदं किं वर्तते इति निश्चयः न क्रियते परन्तु किमपि इदं वर्तते इति ज्ञानं भवति। एतादृशं ज्ञानं निर्विकल्पकं ज्ञानम्। एतादृशं ज्ञानं यदा फलं भवति तदा तस्य करणम् 'इन्द्रियम्' भवति। तथा हि अत्र पूर्वोक्तरीत्या कश्चन क्रमः भवति। निर्विकल्पकं ज्ञानं तु आत्मनि जायते। तत्र जायमानस्य निर्विकल्पकज्ञानस्य बाह्यवस्तुना सह सन्निकर्षः साक्षात् न भवति, किन्तु परम्परया जायते। तद्यथा सर्वादौ आत्मनः मनसा सह सन्निकर्षो भवति,

ततः मनसः इन्द्रियेण सह, तदनु इन्द्रियस्य अर्थेन सह। यदा तु इन्द्रियार्थयोः सन्निकर्षः भवति तदा नामजात्यादियोजनाहीनं वस्तुमात्रावगाहि 'इदं किञ्चित्' इति निर्विकल्पकं ज्ञानं जन्यते। इन्द्रियाणां हि अयं स्वभावो वर्तते यत् इन्द्रियं यदा वस्तुना सह सम्बद्धं भवति तदा तद् वस्तु प्रकाशयति अर्थात् तस्य वस्तुनः ज्ञानं कारयति।




एतादृशं निर्विकल्पकज्ञानस्य करणम् 'इन्द्रियम्' भवति। यथा छेदनक्रियायाः करणं परशुः। निर्विकल्पकज्ञानं प्रति इन्द्रियार्थसन्निकर्षः तथैव अवान्तरव्यापारः भवति यथा छेदनक्रियां प्रति परशोः दारुसंयोगः। एतादृशस्य इन्द्रियकरणस्य फलं तु निर्विकल्पकज्ञानं भवति यथा परशुदारुसंयोगरूप-अवान्तरव्यापारद्वारा परशुरूपस्य करणस्य फलम् 'छेदनम्' भवति। अयमभिप्रायः यत् इन्द्रियम् 'करणम्', निर्विकल्पकज्ञानम् 'फलम्' तथा च तन्मध्यवर्ती जायमानः इन्द्रियार्थसन्निकर्षः 'अवान्तरव्यापारः' उच्यते। अवान्तरव्यापारस्य लक्षणं तु स्वयं ग्रन्थकारः अग्रे "तज्जन्यस्तज्जन्यजनकोऽवान्तरव्यापारः" इति वक्ष्यति।

(मूलम्)

**कदा पुनः इन्द्रियार्थसन्निकर्षः करणम्?**

**यदा निर्विकल्पकानन्तरं सविकल्पकं नामजात्यादियोजनात्मकं डित्थोऽयं, ब्राह्मणोऽयं, श्यामोऽयमिति विशेषणविशेष्यावगाहि ज्ञानमुत्पद्यते, तदा इन्द्रियार्थसन्निकर्षः करणम्। निर्विकल्पकं ज्ञानमवान्तरव्यापारः, सविकल्पकं ज्ञानं फलम्।**

प्रत्यक्षप्रमां प्रति इन्द्रियार्थसन्निकर्षः करणं कदा भवति? इति जिज्ञासायाम् उच्यते - यदा निर्विकल्पकज्ञानान्तरं संज्ञाजातिगुणक्रियाविशिष्टं सविकल्पकं ज्ञानं जायते तदा तत्र इन्द्रियार्थसन्निकर्षः करणम्। निर्विकल्पकं ज्ञानमवान्तरव्यापारः, सविकल्पकं ज्ञानं फलम्। विकल्पो नाम नामजात्यादिरूपो विशेषः, तेन सह वर्तते इति सविकल्पकम्। यथा 'डित्थोऽयम्', 'ब्राह्मणोऽयम्', 'श्यामोऽयम्' इति विशेषणविशेष्यावगाहि ज्ञानं सविकल्पम् उच्यते। काष्ठमयहस्तिनः डित्थसंज्ञा। 'डित्थोऽयम्' इत्यत्र डित्थेति नामवान् इति। 'ब्राह्मणोऽयम्' इत्यत्र ब्राह्मणत्वजातिमान् इति। 'श्यामोऽयम्' इत्यत्र श्यामरूपवान् इति। अत्र डित्थत्वब्राह्मणत्वश्यामत्वादयः प्रकारतया, तद्विशिष्टाः डित्थब्राह्मणश्यामाः विशेष्यतया च प्रत्यक्षविषयाः भवन्ति।




(मूलम्)

**कदा पुनर्ज्ञानं करणम्?**

**यदा उक्तसविकल्पकानन्तरं हानोपादानोपेक्षाबुद्धयो जायन्ते तदा निर्विकल्पकं ज्ञानं करणम्, सविकल्पकं ज्ञानम् अवान्तरव्यापारः, हानादिबुद्धयः फलम्।**

तर्हि ज्ञानं करणं कदा भवति? अत्र ज्ञानमिति पदेन निर्विकल्पकज्ञानं विवक्षितम्। उच्यते यदा उक्तसविकल्पकानन्तरं ज्ञातवस्तुनः विषये हानबुद्धिः (परित्यागबुद्धिः), ग्रहणबुद्धिः (उपादानबुद्धिः) अथवा उपेक्षाबुद्धिः (न हेयम् न उपादेयम् इति) जायते तदा तत् हानोपादानोपेक्षाबुद्धिरूपफलं प्रति निर्विकल्पकं ज्ञानं करणम्, सविकल्पकं ज्ञानम् अवान्तरव्यापारः, हानादिबुद्धयः फलं भवति।

कस्यापि वस्तुनः यदा प्रत्यक्षज्ञानं क्रियते तदा तद् वस्तु हेयम्, उपादेयम्, उपेक्षणीयं वा इति अवगम्यते, एतदेव प्रत्यक्षज्ञानं फलम् अस्ति।

### ४.२ अवान्तरव्यापारः

(मूलम्)

**तज्जन्यस्तज्जन्यजनकोऽवान्तरव्यापारः। यथा कुठारजन्यः कुठारदारुसंयोगः कुठारजन्यच्छिदाजनकः। अत्र कश्चिदाह — सविकल्पकादीनामपीन्द्रियमेव करणम्। यावन्ति त्वान्तरालिकानि सन्निकर्षादीनि तानि सर्वाण्यवान्तरव्यापार इति।**

इदानीं त्रिविधकरणनिरूपणे प्रसङ्गात् प्राप्तस्य अवान्तरव्यापारस्य लक्षणं विचार्यते। “तज्जन्यस्तज्जन्यजनकः” इति अवान्तरव्यापारस्य लक्षणम्। अर्थात् यः तज्जन्यः=करणजन्यः, तज्जन्यजनकः=करणजन्यस्य कार्यस्य जनकः भवति, सः अवान्तरव्यापारः भवति। यथा परशुः छिदां (छेदनक्रियां) प्रति करणम् इति पूर्वमुक्तम्। अत्र ‘कुठारदारुसंयोगः’ अवान्तरव्यापारः अस्ति। तथा हि तज्जन्यः=कुठारजन्यः, तज्जन्यजनकः= कुठारजन्या या छिदा (छेदनक्रिया), तस्या जनकः अस्ति उद्यमननिपतनरूपः ‘कुठारदारुसंयोगः’। अतः अयं कुठारदारुसंयोगः अत्र अवान्तरव्यापारः

उच्यते। एषः अवान्तरव्यापारः सर्वत्र करणफलयोः मध्ये भवति, अतः एव एतस्य संज्ञा ‘अवान्तर’व्यापारः इति।

प्रत्यक्षप्रमां प्रति ‘इन्द्रियम्’ एव करणम्, अन्यानि तु सर्वाणि अवान्तरव्यापाराणि इति इत्यपि कश्चन पक्षः वर्तते। तं पक्षं ग्रन्थकारः इदानीं किञ्चित् स्फोरयति - “सविकल्पकादीनामपीन्द्रियमेव करणम्” इत्यादिना। ‘प्रतिगतम् अक्षम्’ इति व्युत्पत्त्या ‘प्रत्यक्ष’शब्दस्य मुख्यार्थः इन्द्रियसम्बद्धमेव अस्ति। अतः त्रिविधप्रत्यक्षप्रमां प्रति करणम् ‘इन्द्रियम्’ एव। एतस्मिन् पक्षे करणस्य लक्षणम् ‘व्यापारवत् असाधारणं कारणम्’ करणम् इति ज्ञेयम्। अयं पक्षः सङ्क्षेपेण अधश्चित्रमाध्यमेन ज्ञातुं शक्यः -

<table>
<tr><th>करणम्</th><th>अवान्तरव्यापारः</th><th>फलम्</th></tr>
<tr><td>१. इन्द्रियम्</td><td>इन्द्रियार्थसन्निकर्षः</td><td>निर्विकल्पकज्ञानम्</td></tr>
<tr><td>२. इन्द्रियम्</td><td>(अ) इन्द्रियार्थसन्निकर्षः<br>(ब) निर्विकल्पकज्ञानम्</td><td>सविकल्पकज्ञानम्</td></tr>
<tr><td>३. इन्द्रियम्</td><td>(अ) इन्द्रियार्थसन्निकर्षः<br>(ब) निर्विकल्पकज्ञानम्<br>(स) सविकल्पकज्ञानम्</td><td>हानोपादानोपेक्षाबुद्धिः</td></tr>
</table>

## ४.३ इन्द्रियार्थसन्निकर्षः

(मूलम्)

**इन्द्रियार्थयोस्तु यः सन्निकर्षः, साक्षात्कारिप्रमाहेतुः स षड्विध एव। तद्यथा – संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः विशेष्यविशेषणभावश्चेति।**

प्रत्यक्षप्रमायाः करणभूतः यः इन्द्रियार्थसन्निकर्षः अस्ति संयोगादिभेदेन षड्विधः अस्ति। सन्निकर्षो नाम प्रत्यक्षकारणीभूतः सम्बन्धविशेषः। तत्र द्रव्येण सह इन्द्रियस्य सन्निकर्षः 'संयोगः' एव। द्रव्यं सर्वपदार्थानाम् आश्रयत्वात् प्रधानम् अस्ति। अतः षड्विधसन्निकर्षेषु द्रव्यसम्बन्धरूपः (१) संयोगसन्निकर्षः सर्वादौ निरूप्यते। तदनु द्रव्याश्रितानां गुणानां सन्निकर्षः (२) संयुक्तसमवायः सन्निकर्षः भवति, अतः तस्य निरूपणं कृतम्। तदनन्तरं गुणादिषु यत् 'सामान्यम्' विद्यते तस्य सन्निकर्षस्य नाम (३) संयुक्तसमवेतसमवायः अस्ति। तदनु श्रोत्रेण शब्दस्य ग्राहकः (४) समवायः सन्निकर्षः निरूपितः। एतस्य अनन्तरं समवेतपदार्थे समवायसम्बन्धेन स्थितः सन्निकर्षः यः 'सामान्यम्' इत्यस्य ग्राहकः भवति, सः (५) समवेतसमवायः सन्निकर्षः निरूपितः। अन्ते च अभावादेः ग्राहकः (६) विशेष्य-विशेषणभावः सन्निकर्षः ग्रन्थकारेण सोदाहरणं प्रतिपादितः अस्ति। एषः षड्विधः अपि सन्निकर्षः 'लौकिकः'

भवति। अलौकिकसन्निकर्षस्तु पुनः त्रिविधः भवति। (१) सामान्यलक्षणा प्रत्यासत्तिः, (२) ज्ञानलक्षणा प्रत्यासत्तिः, (३) योगज-प्रत्यासत्तिः चेति। तस्य अत्र विशिष्टप्रयोजनाभावात् निरूपणं न क्रियते। अस्तु प्रकृतम् अनुसरामः।

### ४.४ षड्विधः सन्निकर्षः




(मूलम्)

**तत्र यदा चक्षुषा घटविषयं ज्ञानं जन्यते तदा चक्षुरिन्द्रियं, घटोऽर्थः। अनयोः सन्निकर्षः संयोग एव, अयुतसिद्ध्यभावात्। एवं मनसाऽन्तरिन्द्रियेण यदा आत्मविषयकं ज्ञानं जन्यते अहमिति, तदा मनः इन्द्रियम्, आत्माऽर्थः, अनयोः सन्निकर्षः संयोग एव।**

षड्विधसन्निकर्षेषु प्रथमः सन्निकर्षः अस्ति 'संयोगः'। अत्र ग्रन्थकारः आदौ बहिरिन्द्रयस्य उदाहरणं ददाति। यदा चक्षुरिन्द्रियेण 'अयः घटः' इति घटविषयकं ज्ञानं जन्यते तदा चक्षुः 'इन्द्रियम्', घटः च 'अर्थः' अस्ति। अनयोः सन्निकर्षः 'संयोगः' एव भवति। यतो हि

अत्र इन्द्रियम् अर्थः च अयुतसिद्धौ न स्तः। चक्षुः विनापि घटः भवितुम् अर्हति। यदि चक्षुर्घटौ अयुतसिद्धौ स्याताम्, तदा तु तयोः अयुतसिद्धत्वात् 'समवायसम्बन्धः' स्यात्। किन्तु अनयोः युतसिद्धत्वात् अर्थात् अयुतसिद्ध्यभावात् संयोगसन्निकर्षः एव भवति।

एवमेव यदा अन्तरिन्द्रियेण मनसा 'अहं विद्यार्थी अस्मि' इत्याकारकम् आत्मविषयकं ज्ञानं जन्यते, तदा मनः 'इन्द्रियम्', आत्मा 'अर्थः', अनयोः सन्निकर्षः संयोगः एव। संयोगसन्निकर्षः सर्वदा द्वयोः द्रव्ययोः मध्ये एव भवति। न्याय-वैशेषिकदर्शनरीत्या चक्षुः, त्वक्, मनः चेति त्रीणि इन्द्रियाणि संयोगसन्निकर्षेण स्वार्थस्य प्रत्यक्षं कारयति।

(मूलम्)

**कदा पुनः संयुक्तसमवायः सन्निकर्षः?**

**यदा चक्षुरादिना घटगतरूपादिकं गृह्यते घटे श्यामं रूपमस्तीति, तदा चक्षुरिन्द्रियं, घटरूपमर्थः, अनयोः सन्निकर्षः संयुक्तसमवाय एव। चक्षुःसंयुक्ते घटे रूपस्य समवायात्। एवं मनसाऽऽत्मसमवेते सुखादौ गृह्यमाणे, अयमेव सन्निकर्षः।**

घटगतपरिमाणादिग्रहे चतुष्टयसन्निकर्षोऽप्यधिकं कारणमिष्यते। सत्यपि संयुक्तसमवाये तदभावे दूरे परिमाणाद्यग्रहणात्। चतुष्टयसन्निकर्षो यथा –

१. इन्द्रियावयवैरर्थावयविनाम्। २. इन्द्रियावयविनामर्थावयवानाम्। ३. इन्द्रियावयवैर्थावयवानाम्। ४. अर्थावयविनामिन्द्रियावयविनां सन्निकर्षः इति।

तर्हि संयुक्तसमवायः सन्निकर्षः कदा भवति? उच्यते - यदा चक्षुरादिना इन्द्रियेण सम्बद्धेषु घटादिषु रूपादिकं गृह्यते तदा चक्षुः इन्द्रियम्, घटरूपम् अर्थः, अनयोः सन्निकर्षः संयुक्तसमवायः एव। तत्र चक्षुषा संयुक्तः घटः गुणी द्रव्यम्, घटे च रूपं गुणः, स च समवायेन घटे वर्तते। अतः गुणगुणिनोः समवायसम्बन्धः भवत्येव। "संयुक्तसमवायः" इति शब्दस्य अर्थः अस्ति "संयुक्ते समवायः"। अनेन संयुक्तसमवायसन्निकर्षेण इन्द्रियसंयुक्ते द्रव्ये गुण-कर्म-जातीनां ग्रहणं भवति। यतः द्रव्ये गुणः कर्म जातिः च समवायसम्बन्धेन तिष्ठति। 'घटे रूपम्' इत्यत्र गुणस्य प्रत्यक्षम्, 'घटः कम्पते' इत्यत्र कर्मणः (क्रियायाः) प्रत्यक्षम्, 'घटो द्रव्यम्' अर्थात् द्रव्यत्वजात्याश्रयो घटः इत्यत्र घटगतद्रव्यत्वजातेः प्रत्यक्षं संयुक्तसमवायसन्निकर्षेण भवति इति भावः।

चक्षुषा यदा घटद्रव्यं गृह्यते तदा तु संयोगसन्निकर्षः भवति, परन्तु यदा तस्मिन् चक्षुःसंयुक्ते घटे रूपादिकं गृह्यते, तदा तु तत्र संयुक्तसमवायसन्निकर्षः एव भवति। एवमेव त्वगिन्द्रियेण घटस्पर्शस्य ज्ञानम्, रसनेन्द्रियेण जलादिरसस्य ज्ञानम्, घ्राणेन्द्रियेण पुष्पादिगन्धस्य ज्ञानम् अनेनैव संयुक्तसमवायसन्निकर्षेण भवति। पञ्चज्ञानेन्द्रियेषु श्रोत्रेन्द्रियं विहाय अन्येभ्यः चतुर्भ्यः ज्ञानेन्द्रियेभ्यः संयुक्तसमवायसन्निकर्षेण गुण-कर्म-जातीनां ग्रहणं भवतीति भावः।




उक्तं च न्यायदर्शने यत् "येनेन्द्रियेण यद् गृह्यते तनैव इन्द्रियेण तनिष्ठा जातिः (सामान्यम्), तत्समवायः, तदभावश्च गृह्यते" इति। एवमेव अन्तरिन्द्रियेण मनसा आत्मनि समवायसम्बन्धेन स्थिताः सुख-दुःख-ज्ञान-इच्छा-द्वेष-प्रयत्नाः यदा गृह्यन्ते, तदा एतेषां गुणानां तथा च 'आत्मत्वम्', 'द्रव्यत्वम्', 'सत्ताजातिः' च अमीषां ग्रहणं संयुक्तसमवायसन्निकर्षेण भवति।

अत्रायं विशेषः - द्रव्ये स्थितानां गुण-कर्म-जातीनां ग्रहणं तु अनेन सन्निकर्षेण भवति, परन्तु द्रव्ये स्थितस्य ‘परिमाणम्’ इत्यादीनां कतिपयगुणानां प्रत्यक्षे संयुक्तसमवायसन्निकर्षातिरिक्तानां चतुर्णां सन्निकर्षाणाम् आवश्यकता भवति। यतः घटगतपरिमाणादिगुणैः सह चक्षुरादेः सन्निकर्षे सत्यपि दूरत्वात् तेषां गुणानां प्रत्यक्षं न भवति। अतः ग्रन्थकारः वदति यत् “घटगतपरिमाणादिग्रहे चतुष्टयसन्निकर्षोऽप्यधिकं कारणमिष्यते” इति। इदम् अधिकं सन्निकर्षचतुष्टयं तु इत्थम् अस्ति -

| *क्रमः* | *सन्निकर्षनाम* | *सन्निकर्षस्य अर्थः* | *कयोः सन्निकर्षः?* |
|---|---|---|---|
| १. | इन्द्रियावयवैरर्थावयविनाम् | इन्द्रियावयवैः सह अर्थ-अवयवानां सन्निकर्षः | अवयव-अवयवि-सन्निकर्षः |
| २. | इन्द्रियावयविनाम् अर्थावयवानाम् | इन्द्रियावयविनाम् अर्थ-अवयवैः सह सन्निकर्षः | अवयवि-अवयव-सन्निकर्षः |
| ३. | इन्द्रियावयवैर्थावयवानाम् | इन्द्रियावयवैः सह अर्थ-अवयवानां सन्निकर्षः | अवयव-अवयव-सन्निकर्षः |

| | | | |
|---|---|---|---|
| ४. | अर्थावयविनामि-न्द्रियावयविनाम् | इन्द्रियावयविभिः अर्थ-अवयविनां सन्निकर्षः | अवयवि-अवयवि-सन्निकर्षः |

कस्यापि द्रव्यस्य रूपज्ञाने परिमाणज्ञाने च किञ्चन वैलक्षण्यम् अस्ति। “अयं कृष्णः घटः”, “अयं शुक्लः घटः” इत्याकारके प्रत्यक्षे घटस्य सर्वेषाम् अवयवानां प्रत्यक्षस्य आवश्यकता नास्ति। परं यदा तु “अयं बृहद्घटः”, “अयं लघुः घटः” इत्याकारकं प्रत्यक्षं जायते, तदा तु घटस्य अधिकावयवानां प्रत्यक्षम् आवश्यकं भवति। अतः अनेन अतिरिक्तसन्निकर्षचतुष्टयेन घटावयवावयविभिः इन्द्रियावयवावयविनां सन्निकर्षः जायते। तस्मात् अधिकावयवानां ग्रहणत्वात् घटगतपरिमाणस्यापि प्रत्यक्षं सुलभं भवत्येव।

(मूलम्)

**कदा पुनः संयुक्तसमवेतसमवायः सन्निकर्षः?**

**यदा पुनश्चक्षुषा घटरूपसमवेतं रूपत्वादिसामान्यं गृह्यते, तदा चक्षुरिन्द्रियं, रूपत्वादिसामान्यमर्थः, अनयोः सन्निकर्षः संयुक्तसमवेतसमवाय एव। चक्षुःसंयुक्त घटे रूपं समवेतं, तत्र रूपत्वस्य समवायात्।**

तर्हि अयं तृतीयः संयुक्तसमवेतसमवायः सन्निकर्षः कदा भवति? उच्यते यदा पुनः चक्षुरिन्द्रियेण घटरूपे समवेतम् अर्थात् समवायसम्बन्धेन विद्यमानं रूपत्वादिसामान्यं गृह्यते, तदा चक्षुः




इन्द्रियम्, रूपत्वादिसामान्यम् अर्थः। रूपे विद्यमानं रूपत्वम्=रूपत्वजातिः। रूपत्वस्य चक्षुषा परम्परासम्बन्धः संयुक्तसमवेतसमवायः। एतादृशरूपत्वादिसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षो भवति। अर्थात् घटादिद्रव्यगत-गुणक्रियादिषु

समवायसम्बन्धेन विद्यमानानां जात्यादीनां तु इन्द्रियैः सह यः सन्निकर्षः स संयुक्तसमवेतसमवायः इति।

(मूलम्)

**कदा पुनः समवायः सन्निकर्षः?**

**यदा श्रोत्रेन्द्रियेण शब्दो गृह्यते तदा श्रोत्रमिन्द्रियं शब्दोऽर्थः, अनयोः सन्निकर्षः समवाय एव। कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रम्। श्रोत्रस्याकाशात्मकत्वाच्छब्दस्य चाकाशगुणत्वात् गुणगुणिनोश्च समवायात्।**

कदा पुनः 'समवायः' सन्निकर्षः भवति? उच्यते - यदा श्रोत्रेन्द्रियेण 'शब्दः' गृह्यते, तदा श्रोत्रम् इन्द्रियम्, शब्दः अर्थः। तयोः




सन्निकर्षः समवायः एव। कर्णशष्कुल्या अवच्छिन्नं नभः श्रोत्रेन्द्रियम् उच्यते। श्रोत्रेन्द्रियेण शब्दस्य प्रत्यक्षे समवायनामकः सन्निकर्षः भवति। अत्र इदम् अवधेयं यत् यदिः विषयः तस्येन्द्रियस्य गुणरूपः भवति, तर्हि गुणगुणिनोः समवायः इति नियमात् इन्द्रियार्थयोः समवायः सन्निकर्षः।

अत्र युक्तरपि अस्ति। तथा हि प्रागुक्तरीया श्रोत्रेन्द्रियं नाम कर्णशष्कुल्या अवच्छिन्नम् आकाशरूपम्। आकाशं हि शब्दगुणकम्। 'श्रोत्रम्', 'आकाशम्' इत्यनयोः यः भेदव्यवहारः दृश्यते, स औपाधिकः एव। अतः शब्दः 'गुणः', आकाशं च 'गुणि'। इत्थं गुणगुणिनोः समवायः सन्निकर्षः भवत्येव। दूरस्थशब्दस्य ग्रहणं तु वीचीतरङ्गन्यायेन

कदम्बमुकुलन्यायेन भवतीति तु न्यायदर्शनस्य तर्कसङ्ग्रहादिग्रन्थेभ्यः ज्ञातव्यम्।

(मूलम्)

**कदा पुनः समवेतसमवायः सन्निकर्षः?**

**यदा पुनः शब्दसमवेतं शब्दत्वादिकं सामान्यं श्रोत्रेन्द्रियेण गृह्यते, तदा श्रोत्रमिन्द्रियं, शब्दत्वादि सामान्यमर्थः। अनयोः सन्निकर्षः समवेतसमवाय एव। श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात्।**

इदानीं क्रमप्राप्तः समवेतसमवायः सन्निकर्षो निरूप्यते यत् कदा पुनः समवेतसमवायः सन्निकर्षः भवति? उच्यते यदा शब्दे




समवायसम्बन्धेन विद्यमानायाः शब्दत्वादिजातेः श्रोत्रेन्द्रियेण प्रत्यक्षं क्रियते तदा श्रोत्रम् इन्द्रियम्, शब्दत्वादिजातिः अर्थः। अनयोः सन्निकर्षः

'समवेतसमवायः' एव। अत्र कारणम् एतत् अस्ति यत् श्रोत्रे समवेतः भवति 'शब्दः', तस्मिन् च शब्दे समवेता भवति 'शब्दत्वजातिः'। अतः शब्दत्वस्य श्रोत्रेण सह समवेतसमवायः सन्निकर्षः भवति।

(मूलम्)

**कदा पुनर्विशेष्यविशेषणभाव इन्द्रियार्थसन्निकर्षो भवति?**

**यदा चक्षुषा संयुक्ते भूतले घटाभावो गृह्यते "इह भूतले घटो नास्ति" इति, तदा विशेष्यविशेषणभावः सम्बन्धः। तदा चक्षुःसंयुक्तस्य भूतलस्य घटाद्यभावो विशेषणं, भूतलं विशेष्यम्। यदा च मनःसंयुक्त आत्मनि सुखाद्यभावो गृहते "अहं सुखरहितः" इति तदा मनःसंयुक्तस्यात्मनः सुखाद्यभावो विशेषणम्। यदा श्रोत्रसमवेते गकारे घत्वाभावो गृह्यते तदा श्रोत्रसमवेतस्य गकारस्य घत्वाभावो विशेषणम्।**

सम्प्रति अन्तिमसन्निकर्षविषये विचारः क्रियते यत् कदा पुनः विशेष्य-विशेषणभावः इन्द्रियार्थसन्निकर्षो भवति इति। अत्रोच्यते - यदा



चक्षुषा संयुक्ते भूतले घटाभावो गृह्यते 'इह भूतले घटो नास्ति' इति, तदा विशेष्यविशेषणभावः सन्निकर्षः। तथा हि घटाद्यभावानां चक्षुषा "घटाभाववत् भूतलम्" इति प्रत्यक्षप्रतीतिः भवति। अर्थात् अभावस्यापि प्रत्यक्षं भवत्येव। तादृशाभावप्रत्यक्षे विशेष्यभावः विशेषणभावश्चेति सन्निकर्षो भवति। इन्द्रियसम्बद्धविशेष्यत्वम् इन्द्रियसम्बद्धविशेषणत्वम् इति भावः।

यथा एकेन उदाहरणेन पश्यामः। कस्मिँश्चित् भूतले घटः नास्ति। तर्हि तस्मिन् भूतले घटस्य अभावः 'घटाभावः', घटाभावोऽस्यास्तीति तद्='घटाभाववत्'। तादृशम् 'भूतलम्' अस्ति इत्यर्थः। अत्र चक्षुरिन्द्रियं भूतलेन संयुक्तम्, तस्मिन् च भूतले घटाभावो विशेषणम् इति संयुक्तविशेषणता चक्षुरभावयोः सन्निकर्षः। विशेषणविशेष्यभावो नाम विशेषणभावः=विशेषणता, विशेष्यभावः=विशेष्यता। 'घटाभाववत् भूतलम्' इत्यत्र विशेषणभावः सन्निकर्षः। एवञ्च "इह भूतले घटो नास्ति" इत्यादौ विशेष्यभावः सन्निकर्षः ज्ञातव्यः। अभिप्रायोऽयम् अस्ति यत् यदा 'घटाभाववद् भूतलम्' इति प्रतीतिः जायते, तदा घटाभावो विशेषणम्, भूतलं च विशेष्यम्। यदा तु 'भूतले घटो नास्ति' इति प्रतीतिः जायते तदा तु भूतलं विशेषणं घटाभावो विशेष्यः इति।

विशेष्यविशेषणभावसन्निकर्षस्य द्वितीयम् उदाहरणं ग्रन्थकारेण दीयते यत् - यदा मनःसंयुक्ते आत्मनि 'अहं सुखरहितः' इत्याकारकः




सुखाद्यभावो गृह्यते, तदा मनःसंयुक्तस्य आत्मनः सुखाद्यभावो विशेषणम्, आत्मा च विशेष्यः। अनयोः सन्निकर्षः विशेष्यविशेषणभावसन्निकर्षः एव।

विशेष्यविशेषणभावसन्निकर्षस्य तृतीयम् उदाहरणं ग्रन्थकारः वदति यत् यदा श्रोत्रे समवेते गकारे 'घत्वाभावः' प्रत्यक्षीक्रियते, तदा श्रोत्रसमवेते गकारे घत्वाभावः समवेतसमवायसम्बन्धेन विशेषणं भवति। तयोः गकार-घत्वाभावयोः ग्रहणं 'विशेष्यविशेषणभावसन्निकर्षः' करोति। अर्थात् गकारे घत्वाभावस्य प्रत्यक्षम्, विशेष्यविशेषणभाव-सन्निकर्षेण=श्रोत्रसमवेत-विशेषणतासन्निकर्षेण भवति इत्यर्थः।

अत्र इदं बोधव्यम् - घटादिग्रहणम् यदा संयोगसम्बन्धेन चक्षुरादिना जायते तदा घटाद्यभावग्रहणम् अपि चक्षुरादिना संयोगसम्बन्धेनैव कुतो न जायते? इति न वाच्यम्। यतो हि संयोगस्तु द्रव्ययोः एव भवतीति सिद्धान्तः। अभावस्तु न द्रव्यम्। न च समवायेन अभावग्रहणं स्यात्। अवयवादीनामेव समवायो भवति। अतः अभावग्रहणाय कश्चन सन्निकर्षः आवश्यकः अस्ति। तर्हि कः स सन्निकर्षः इति चेत् 'विशेष्यविशेषणभावः सन्निकर्षः' इति। 'भूतले घटो नास्ति' इत्यत्र 'भूतले घटाभावो वर्तते' इति आशयः। अतः यत् किञ्चित् कुत्रचित् वर्तते चेत् तद् विशेषणम् इति वक्तुं शक्यते। यत्र च वर्तते तत् विशेष्यम् इति। विशेषणे विशेषणता, विशेष्ये च विशेष्यता भवति। 'ता' इत्यनेन भावो बोध्यते। तमेव भावं सम्बन्धं मत्त्वा अभावस्य ग्रहणं भवतीति भावः।

(मूलम्)

**तदेवं संक्षेपतः पञ्चविधसम्बन्धान्यतमसम्बन्धसम्बद्धविशेषण-विशेष्यभावलक्षणेनेन्द्रियार्थसन्निकर्षेण अभाव इन्द्रियेण गृह्यते।**

**एवं समवायोऽपि। चक्षुःसम्बद्धस्य तन्तोर्विशेषणभूतः पटसमवायो गृह्यते "इह तन्तुषु पटसमवाय" इति।**

निष्कर्षोऽयम् अस्ति यत् संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः इति पञ्चविधसन्निकर्षेषु केनचित् एकेन सन्निकर्षेण सम्बद्ध-विशेषणविशेष्यभावसन्निकर्षेण अभावप्रत्यक्षम् इन्द्रियेण एव भवति। केवलं विशेष्य-विशेषणसन्निकर्षेण न कस्यापि अभावस्य ग्रहणं भवति। उक्तेषु पञ्चविध-सन्निकर्षेषु कश्चन सन्निकर्षः अवश्यं विशेष्य-विशेषणसन्निकर्षेण सह भवत्येव।

अनेनैव विशेषणविशेष्यभावसन्निकर्षेण 'समवायः' अपि प्रत्यक्षीक्रियते। यदा चक्षुःसंयुक्तानां विशेषणीभूतः पटसमवायः 'इह तन्तुषु पटसमवायः' इत्याकारकत्वेन गृह्यते, तदा 'पटसमवेताः' इति दलं विशेषणम्, 'तन्तवः' इति दलं विशेष्यम्। अतः विशेषणविशेष्यभावसन्निकर्षेण अस्य समवायस्य ग्रहणं भवति।

समवायसम्बन्धस्य प्रत्यक्षत्वे न्याय-वैशेषिकदर्शनयोः मतैक्यं नास्ति। तत्र तावत् नैयायिकाः समवायसम्बन्धस्य प्रत्यक्षत्वम् अङ्गीकुर्वन्ति, परं वैशेषिकाः भाट्टमीमांसकाश्च समवायस्य प्रत्यक्षत्वं न स्वीकृत्य तस्य अनुमानगम्यत्वं वदन्ति। अत्र ग्रन्थकारेण न्यायदर्शनानुसारं समवायस्य प्रत्यक्षत्वं निरूपितम्। निष्कर्षोऽयं विद्यते यत् 'अभावः',

‘समवायसम्बन्धश्च’ उभयोः प्रत्यक्षम् इन्द्रियद्वारा विशेषणविशेष्यभावसन्निकर्षेण क्रियते।

अत्र तु इदमपि बोधव्यं यत् अभावस्य समवायस्य च प्रत्यक्षे किञ्चित् वैलक्षण्यम् अस्ति। विशेषणविशेष्यभावसन्निकर्षस्तु पञ्चविधसन्निकर्षेषु केनचित् एकेन सम्बद्धो भूत्वा अभावग्राहकः भवति। परं समवायसम्बन्धस्य ग्रहणं तु केवलं सयोगः, संयुक्तसमवायः, समवायः चेति त्रिषु एकेन सम्बद्धेन विशेषणविशेष्यभावसन्निकर्षेण भवति। यतः समवायसम्बन्धः केवलं द्रव्यम्, गुणः, कर्म - एतेषु त्रिषु एव भवति।

(मूलम्)

**तदेवं षोढा सन्निकर्षो वर्णितः संग्रहश्च –**

**अक्षजा प्रमितिर्द्वेधा सविकल्पाविकल्पिका।**
**करणं त्रिविधं तस्याः सन्निकर्षश्च षड्विधः॥**

**घट-तन्नील-नीलत्व-शब्द-शब्दत्वजातयः।**
**अभावसमवायौ च ग्राह्याः सम्बन्धषट्कतः॥**

एवंरूपेण षड्विधः सन्निकर्षः सोदाहरणं निरूपितः। इदानीं प्रत्यक्षप्रमाणनिरूपणरूपविषयस्य सङ्ग्रहः ग्रन्थकारेण अत्र उच्यते। इन्द्रियार्थयोः सन्निकर्षात् उत्पन्ना अक्षजा प्रमितिः=प्रमा सविकल्पक-निर्विकल्पकभेदात् द्विविधा भवति। तस्याः करणं प्रागुक्तरीत्या त्रिविधः भवति। कदाचित् इन्द्रियम्, कदाचित् इन्द्रियार्थसन्निकर्षः, कदाचित् ज्ञानं च। संयोग-संयुक्तसमवाय-संयुक्तसमवेतसमवाय-समवाय-समवेतसमवाय-विशेषणविशेष्य-भावभेदात् इन्द्रियार्थयोः सन्निकर्षः षड्विधः भवति। तत्र घटस्य संयोगसम्बन्धेन, घटगतनीलत्वगुणस्य संयुक्तसमवायसम्बन्धेन, घटगतनीलगुणे समवेतस्य नीलत्वस्य संयुक्तसमवेतसमवायसम्बन्धेन, शब्दस्य समवायसम्बन्धेन, शब्दत्वजातेः समवेतसमवायसम्बन्धेन, अभावसमवाययोः विशेष्य-विशेषणभावसन्निकर्षेण क्रमशः प्रत्यक्षं भवति।

| *क्रमः* | *सन्निकर्षनाम* | *ग्राह्याः अर्थाः* |
|---|---|---|
| १. | संयोगः | घटादिद्रव्याणि |
| २. | संयुक्तसमवायः | घटादिद्रव्यसमवेताः नीलादिगुणाः |
| ३. | संयुक्तसमवेतसमवायः | नीलादिगुणसमवेतं नीलत्वादिसामान्यम् (जातिः) |

| | | |
|---|---|---|
| ४. | समवायः | गकारादिशब्दाः |
| ५. | समवेतसमवायः | गकारादिशब्दसमवेतं गत्वादिसामान्यम् |
| ६. | विशेष्यविशेषणभावः | अभावः समवायश्च |

## ४.५ केवलनिर्विकल्पप्रत्यक्षस्य निराकरणम्

(मूलम्)

**ननु निर्विकल्पकं परमार्थतः स्वलक्षणविषयं भवतु प्रत्यक्षम्। सविकल्पकं तु शब्दलिङ्गवदनुगताकारावगाहित्वात् सामान्यविषयं कथं प्रत्यक्षमर्थजस्यैव प्रत्यक्षत्वात् अर्थस्य च परमार्थतः सत एव तज्जनकत्वात्। स्वलक्षणन्तु परमार्थतः सत्, न तु सामान्यम् तस्य प्रमाणनिरस्तविधिभावस्य अन्यव्यावृत्त्यात्मनस्तुच्छत्वात्।**

**मैवम्। सामान्यस्यापि वस्तुभूतत्वात्।**

प्रत्यक्षस्य सविकल्पक-निर्विकल्पकभेदद्वये बौद्धदार्शनिकाः केवलं निर्विकल्पकम् एव प्रत्यक्षम् इति वदन्ति। तेषाम् अयम् आशयः। निर्विकल्पकप्रत्यक्षं तु स्वलक्षणविषयकम् अर्थात् वस्तुमात्रविषयकं

भवति। अतः वस्तुमात्रोत्पत्तिकत्वात् निर्विकल्पकं प्रत्यक्षं तु 'अर्थजम्' भवति। तथा च अर्थजत्वात् तत् 'प्रमाणम्' भवितुम् अर्हति। परं सविकल्पकज्ञानं तु नामजात्यायोजनायुक्तं भवति, तस्मिन् जातेः अपि ज्ञानं भवति। किन्तु बौद्धमते सामान्यं (जातिः) न अङ्गीक्रियते। बौद्धमते सामान्यस्य अनङ्गीकारकारणं तु तेषां 'क्षणिकवादः' अस्ति। 'नित्यत्वे सति अनेकसमवतत्वम्' इति लक्षणलक्षितस्य सामान्यस्य स्वीकारे तेषां क्षणिकवादः भज्येत। अतः सामान्यतः (जातितः) उत्पन्नं सविकल्पकं ज्ञानम् 'अर्थजम्' न भवति इति कृत्वा तेषां मते सविकल्पकं ज्ञानं 'प्रत्यक्षम्' न स्वीक्रियते। निर्विकल्पकप्रत्यक्षद्वारा ज्ञातं वस्तु सविकल्पकप्रत्यक्षं 'नाम', 'जातिः' इत्यादिकल्पितपदार्थैः (असत्यपदार्थैः) सह योजयति, अतः तत् सविकल्पकं प्रमाणसिद्धवस्त्वजन्यत्वात् 'प्रमाणम्' भवितुं न अर्हति।

अत्र नैयायिकः पृच्छति - यदि 'सामान्यम्' न स्वीक्रियते तर्हि अनेकेषु सजातीयपदार्थेषु एकाकाराः अनुगता प्रतीतिः कथं भविष्यति? लोके हि दृश्यते यत् विभिन्नेषु पटेषु 'पटत्वम्' इति सामान्यम्, विभिन्नेषु तन्तुषु 'तन्तुत्वम्' इति सामान्यम्। तथा च 'पटसामान्यम्' प्रति 'तन्तुसामान्यम्' कारणम् इति कार्य-कारणभावः कथम् उपपद्यते?

अत्र बौद्धाः वदन्ति - न्यायमते 'सामान्येन' यत् कार्यं क्रियते, तत् कार्यम् अस्माकं दर्शने 'अपोहः' इति पदार्थेन कर्तुं शक्यते। 'अपगतः विनिवृत्तः ऊहः उक्तविधो विविधो वितर्को यस्मात् सः अपोहः' इति अपोहस्य अर्थः। नैयायिकप्रोक्तं 'घटत्वम्' इति 'असामान्यम्' अपि 'अपोह' स्वरूपम् एव अस्ति। अतः अनुगताकारप्रतीतेः तथा च विभिन्नकार्यकारणव्यक्तिषु अनुगतकार्यकारणभावप्रतीतेः निर्वाहकः 'जाति'-पदार्थः नास्ति, परम् 'अपोहः' एव अस्ति। 'अपोहः' इति शब्दस्य अर्थस्तु 'अतद्व्यावृत्तिः' अर्थात् 'तद्भिन्न-भिन्नत्वम्' इति अस्ति। यथा तद्=घटः, अतद्=अघटः (यत् घटः नास्ति) अर्थात् घटभिन्नं सम्पूर्णं जगत्। तद्व्यावृत्तः (=भिन्नः)=घटः एव। अतः प्रत्येकं घटः 'अतद्व्यावृत्तः' अर्थात् 'तद्भिन्नभिन्नः' अस्ति। अयमेव 'अपोहः' उच्यते। अनेनैव सर्वेषु घटेषु अनुगता एकाकारप्रतीतिः कार्यकारणभावप्रतीतिः च भवति। अतः अस्माकं बौद्धमते जातेः (सामान्यस्य) कार्यम् 'अपोहः' एव करोति, तेन अतिरिक्तस्य जातिपदार्थस्य कल्पना अन्याय्या। अयम् अपोहः अर्थात् घटत्व-पटत्व-गोत्वादिपदार्थः भावरूपः अभावरूपः क्षणिकः स्थायी इत्यादिभेदात् पृथक् अस्ति। अतः एव सः 'अपोहः' इति उच्यते।

बौद्धमते 'स्वलक्षणम्' एव परमार्थसत् अस्ति। बौद्धमते पदार्थः द्विविधः (१) स्वलक्षणम्, (२) सामान्यलक्षणं च। 'स्वं सर्वतो व्यावृत्तं

लक्षणं वस्तुस्वरूपं यस्य तत्=स्वलक्षणम्’। इदं स्वलक्षणमेव प्रवृत्तिनिवृत्तिविषयः अर्थक्रियाकारि च भवति। अतः ‘स्वलक्षणम्’ एव परमार्थसत् अस्ति। यत्तु सामान्यलक्षणं भवति तत् अर्थक्रियारित्वाभावात् न परमार्थ-सत्, किन्तु कल्पितम् एव। अयम् अभिप्रायः ग्रन्थकारेण “स्वलक्षणन्तु परमार्थतः सत्, न तु सामान्यम्” इति वाक्येन उक्तम्। सामान्यं ‘संवृत्तिसत्’ भवति, अतः सामान्यम् अभावरूपम् (तुच्छम्) भवति, भावपदार्थः नास्तीत्यर्थः।

अत्र बौद्धवादिनाम् आक्षेपस्य समाधानं नैयायिकैः इत्थं क्रियते - “मैवम्। सामान्यस्यापि वस्तुभूतत्वात्” इति। अनेकघटेषु या समानाकारक-अनुगताप्रतीतिः भवति, तस्याः एकमात्रं कारणम् ‘सामान्यम्’ एव। “अनुवृत्तिप्रत्ययहेतुः सामान्यम्” इति। इदं च सामान्यं भावरूपम् अस्ति। सर्वेषु घटेषु ‘अयं घटः’, ‘अयं घटः’, ‘अयं घटः’, इत्याकारिका या अनुगताप्रतीतिः भवति, तत्र अनुभवः अपि प्रमाणम् अस्ति। अतः प्रमाणसिद्धं ‘सामान्यम्’ इति कश्चन भावपदार्थः अस्त्येव।

इत्थम् अत्र सविकल्पक-निर्विकल्पकभेदेन प्रत्यक्षप्रमाणस्य निरूपणम् उपसंह्रियते।

## प्रकृतपाठस्य सारः

- साक्षात्कारिप्रमाकरणं प्रत्यक्षम्। साक्षात्कारिणी च प्रमा इन्द्रियजा भवति।

- साक्षात्कारिण्याः प्रमायाः करणं त्रिविधम् - इन्द्रियम्, इन्द्रियार्थसन्निकर्षः, ज्ञानं च।

- प्रत्यक्षं द्विविधम् अस्ति - सविकल्पकम्, निर्विकल्पकं च।

- नामजात्यादियोजनाहीनं वस्तुमात्रावगाहि 'किञ्चित् इदम्' इति ज्ञानं 'निर्विकल्पकम्'।

- नामजात्यादियोजनात्मकं डित्थोऽयं, ब्राह्मणोऽयं, श्यामोऽयमिति विशेषणविशेष्यावगाहि ज्ञानम् 'सविकल्पकम्'।

- तज्जन्यस्तज्जन्यजनकोऽवान्तरव्यापारः। यथा कुठारजन्यः कुठारदारसंयोगः कुठारजन्यच्छिदाजनकः।

- इन्द्रियार्थयोः सन्निकर्षः षड्विधः – संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः विशेष्यविशेषणभावः चेति।

- घटादिद्रव्यप्रत्यक्षे संयोगः सन्निकर्षः, घटादिद्रव्यसमवेत-नीलादिगुणप्रत्यक्षे संयुक्तसमवायः सन्निकर्षः, नीलादिगुणसमवेत-नीलत्वादिसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षः, श्रोत्रेन्द्रियेण गकारादिशब्दप्रत्यक्षे समवायः सन्निकर्षः, गकारादिशब्दसमवेत-गत्वादिसामान्यप्रत्यक्षे समवेतसमवायः सन्निकर्षः, अभावसमवायप्रत्यक्षे च विशेष्य-विशेषणभावः सन्निकर्षः।

- सविकल्पक-निर्विकल्पकभेदेन प्रत्यक्षप्रमाणस्य द्वैविध्यम्।

* * *

## अभ्यासः

### (अ) एकेन वाक्येन समाधानं लिखत।

१. साक्षात्कारिणी प्रमा का अस्ति?

२. छिदायाः करणं किम्?

३. नामजात्यादियोजनात्मकं ज्ञानं सविकल्पकम् उत निर्विकल्पकम्?

४. को नाम अवान्तरव्यापारः?

५. द्रव्यसमवेतगुणप्रत्यक्षे कः सन्निकर्षः?

६. रूपस्य ग्रहणं केन इन्द्रियेण भवति?

७. शब्दत्वप्रत्यक्षे कः सन्निकर्षः?

८. क्षणिकवादिनः के सन्ति?

९. सामान्यम् इत्यस्य अपरं नाम किम्?

१०. समवायस्य ग्रहणं केन सन्निकर्षेण भवति?

११. बौद्धमते स्वलक्षणविषयं किं ज्ञानम् अस्ति?

१२. कस्मिन् सन्निकर्षे परिमाणादिग्रहणार्थं सन्निकर्षचतुष्टयम् अधिकम् अपेक्ष्यते?

१३. न्यायदर्शने कति प्रमाणानि स्वीकृतानि?

१४. 'षोढा' इति पदस्य कः अर्थः?

१५. 'अपोहः' इति पदार्थः कस्मिन् दर्शने स्वीक्रियते?

१६. 'घटाभाववद् भूतलम्' इत्यत्र विशेषणं किम् अस्ति?

१७. गकारे घत्वाभावो केन सन्निकर्षेण गृह्यते?

१८. सुखदुःखादीनाम् अधिष्ठानम् कः अस्ति?

१९. रूपप्रत्यक्षे कः सन्निकर्षः?

२०. हानोपादानोपेक्षाबुद्धिं प्रति करणं किम्?

(आ) योग्यं विकल्पं योजयत।

| | | | |
|---|---|---|---|
| १. | आत्मविषयकज्ञानकरणम् | (क) | संयुक्तसमवेतसमवायः सन्नकर्षः |
| २. | इन्द्रियम् | (ख) | सामान्यम् |
| ३. | समवायप्रत्यक्षम् | (ग) | मनः |
| ४. | घटरूपसमवेतं रूपत्वादिक् | (घ) | वस्तुप्राप्यप्रकाशकारि |
| ५. | घटत्वम् | (ङ) | विशेषणविशेष्यभावसन्निकर्षः |

(इ) व्याख्यात्मकरूपेण उत्तरं लिखत।

१. सविकल्पकं प्रत्यक्षं व्याख्यात।
२. अवान्तरव्यापारं सोदाहरणं व्याख्यात।
३. निर्विकल्पकं प्रत्यक्षं स्पष्टयत।
४. सामान्यस्य वस्तुभूतत्वं प्रतिपादयत।
५. विशेषणविशेष्यभावसन्निकर्षं स्पष्टयत।

**(ई) निबन्धात्मकरूपेण उत्तरं लिखत।**

१. षड्विधसन्निकर्षं सोदाहरणं प्रतिपादयत।
२. प्रत्यक्षं प्रति करणस्य त्रैविध्यं सोदाहरणम् उपापादयत।

**(उ) परियोजनाकार्यम्**

१. न्यायेतरदर्शनेषु प्रत्यक्षप्रमाणं स्वरूपं कथं चिन्तितम् अस्ति, अस्मिन् विषये एकं परियोजनात्मकं सर्वेक्षणं कुरुत।

* * *

## उत्तराणि – पाठः – ४

(अ) एकेन वाक्येन समाधानं लिखत।

१. इन्द्रियजा
२. परशुः
३. सविकल्पकम्
४. तज्जन्यत्वे सति तज्जन्यजनकः
५. समवायसन्निकर्षः
६. चक्षुरिन्द्रियेण
७. समवायः
८. बौद्धाः
९. जातिः
१०. विशेषणविशेष्यभावसन्निकर्षेण
११. निर्विकल्पकम्
१२. संयुक्तसमवायसन्निकर्षे
१३. चत्वारि
१४. षट्
१५. बौद्धदर्शने
१६. घटाभावः

१७. विशेषणविशेष्यभावसन्निकर्षण

१८. आत्मा

१९. संयुक्तसमवायसन्निकर्षः

२०. निर्विकल्पकज्ञानम्

## (आ) योग्यं विकल्पं योजयत।

१. (ग)

२. (घ)

३. (ङ)

४. (क)

५. (ख)

# पाठः – ५

## अलौकिकसन्निकर्षनिरूपणम्

**प्रस्तावना –**

पूर्वपाठे इन्द्रियेन गृह्यमानषड्विधलौकिकसन्निकर्षाणां विषये क्रमशः संयोगः संयुक्तसमवायः संयुक्तसमवेत-समवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावानां कस्य प्रत्यक्षे कः सन्निकर्षेति ज्ञानं प्राप्तम्। तर्कभाषाकारेण पण्डितवर्येण केशवमिश्रेण तर्कभाषाग्रन्थे केवलं षड्विधलौकिकसन्निकर्षाणामेव प्रतिपादनं कृतम्। अधिकक्लिष्टवशात् त्रिविधानाम् अलौकिकसन्निकर्षाणां प्रतिपादनं न कृतम्। तथापि तेषां सामान्यज्ञानं सर्वेभ्यः न्यायजिज्ञासुभ्य आवश्यकमिति मत्त्वा सम्प्रति लौकिकसन्निकर्षेभ्यः अतिरिक्त-अलौकिकसन्निकर्षाणाम् विषये चर्चा विधीयते।

**अलौकिकसन्निकर्षस्य तात्पर्यम् –**

न्यायादिशास्त्रेषु वस्तुप्राप्यकारित्वम् इन्द्रियेभ्य इष्टत्वात् इन्द्रियाणां विषयेभ्यः सम्बन्धे सति जायमानप्रत्यासत्तिः व्यापार एव सन्निकर्षशब्देन व्यपदिश्यते। तत् चक्षुरादीन्द्रियेभ्यः सन्निकृष्टे सति

संयोगादयः लौकिकेत्यभिधीयते। अपि तु लोके प्रसिद्धसंयोगादिसन्निकर्षेभ्यः भिन्नाः ये च शास्त्रगम्याः सन्निकर्षाः ते एव अलौकिकसन्निकर्षाः। अलौकिकस्तु व्यापारः नैयायिकैः त्रिविधः प्रतिपादितः। व्यापारश्चात्र ‘तत्सत्तातिरिक्तसत्ताकशून्यत्वे सति तज्जन्यजनकत्वमिति व्यापारलक्षणम्। तच्च जात्यादिषु वर्ततेत्यतः व्यापारोप्यत्रोक्तः।

**अलौकिकसन्निकर्षस्य त्रैविध्यम् –**

अलौकिकसन्निकर्षः अर्थात् लौकिकेन्द्रियार्थसम्बन्धरहितत्वेऽपि प्रत्यक्षकारणं यो भवति सः। स च त्रिविधः, सामान्यलक्षणो ज्ञानलक्षणो योगजलक्षणश्चेति।

**ज्ञानलक्षणसम्बन्धस्तथा सामान्यलक्षणः।**
**योगजश्चेति विज्ञेयस्त्रिविधोऽयमलौकिकः॥**



१. **सामान्यलक्षणो नाम सामान्यं लक्षणं यस्येति अर्थात् सामान्यं जातिः घटादिव्यक्तिश्च**, तदेव लक्षणं स्वरूपं यस्येति व्युत्पत्त्या जात्यात्मको व्यक्त्यात्मकश्च सन्निकर्षः एकः। यथा महानसे वह्निधूमयोः दर्शनं जातम्, तत्र वह्नित्वधर्मेण सकलवह्नीनां धूमत्वधर्मेण सकलधूमानां च प्रत्यक्षं भवति। तदा एव धूमसामान्येन वह्निसामान्यस्य व्याप्तिः गृह्यते। एकत्र गृहीतधूमेन सकलधूमानां ज्ञानं प्रति कारणं सामान्यलक्षणा प्रत्यासत्तिः सन्निकर्ष एव। अयं कश्चन भिन्नः अलौकिकः सन्निकर्षः। कालान्तर-देशान्तरस्थ धूमस्य ग्रहणाय 'सामान्यलक्षणा प्रत्यासत्ति'रेव आवश्यकीति।

**"धूमादिसहचारोऽयं सर्वधूमादिगोचरः।**
**सन्,व्याप्तिं ग्राह्यते तस्मान्मता सामान्यलक्षणा॥**

**सर्वाग्निसहचारोऽयं धूमेष्वखिलेषु च।**
**कथं गृह्येत सामान्यलक्षणा चेन्न मन्यते" ॥**

२. ज्ञानलक्षणो नाम ज्ञानमेव लक्षणं स्वरूपं यस्य सः ज्ञानात्मकः सन्निकर्षः द्वितीयः। यथा सुरभि चन्दनम्। सौरभस्य सुगन्धस्य ज्ञानं सौरभादेव, सन्निकर्षः ज्ञानस्वरूपः बोध्यः। यः पुरुषः प्रथमदिने चन्दनं घ्रात्वा 'सुरभि चन्दनम्' इति निश्चित्य दिवसान्तरे अघ्रात्वैव दूरतः चन्दनदर्शनमात्रेण 'सुरभि

चन्दन'मिति अन्यस्मै बोधयति। तादृशबोधकारणं दिवसान्तरीये 'सुरभि चन्दन'मिति ज्ञाने सौरभं चन्दनम्, चन्दनत्वञ्चेति गृहीतज्ञानमेवेति ज्ञायते।

तत्र चक्षुः संयोगेन चन्दनज्ञानं, चक्षुःसंयुक्तसमवायेन चन्दनत्वज्ञानं च लौकिकसन्निकर्षजन्यत्वात् लौकिकप्रत्यक्षमुच्यते। किन्तु घ्राणसम्बन्धं विनापि सौरभज्ञानं यत् जातं तत्तु संस्कारद्वारा उत्पन्नमलौकिकमेव प्रत्यक्षम् इति तत्प्रत्यक्षं ज्ञान लक्षणाप्रत्त्यासत्त्या भवतीत्यर्थः

**"चन्दनग्रहणे दूरात् सौरभं यत्तु गृह्यते।**
**ज्ञानलक्षणसम्बन्धजन्यं तच्चाक्षुषं मतम्॥**

**ज्ञानं गुणो निरंशोऽतो नांशभेदोऽत्र विद्यते।**
**सौरभांशे स्मृतिर्नातो चाक्षुषं ज्ञानलक्षणम्" ॥**

३. **योगजो** नाम योगः चित्तवृत्तिनिरोधः तज्जन्यः संयमः ध्यान-धारणात्मकः सन्निकर्षः तृतीयः। अर्थात् योगाभ्यासद्वारा 'यम-नियमासन-प्राणायाम-प्रत्याहारेषु' कृताभ्यासवशाद्वा ईश्वरप्रणिधानाभ्यासात् उत्पन्नधर्मविशेषः उत्कृष्टपुण्यविशेषः सन्निकर्षः। तेन भूत-भविष्यद्वर्तमान-सूक्ष्म-व्यवहित-विप्रकृष्टादि

सर्ववस्तूनि योगी साक्षात्करोति। व्यवहित-भूत-भविष्यदादिवस्तुभिः सह लौकिक इन्द्रियार्थसन्निकर्षः नैव सम्भवति। अतः योगजसामर्थ्यात् अलौकिकसन्निकर्षो भवति। स च योगजालौकिकः सन्निकर्षः द्विविधः भवति। युक्तयोगजः युञ्जानयोगज इति। पूर्वोक्त भूत-भविष्यद्व्यवहितादि ज्ञानं युक्तयोगिनः सर्वदा भासते। तथा युञ्जानयोगिनः चिन्ताकृते सति भासते। 'युक्तस्य सर्वदा भानं चिन्तासहकृतोऽपरः' इति भाषापरिच्छेदे।

**"सूक्ष्मे व्यवहिते दूरेऽतीतेऽर्थेऽनागते।**
**प्रत्यक्षं योगिनां ज्ञेयं सन्निकर्षात्तु योगजात्" ॥**

**चाक्षुषप्रत्यक्षविषये मतान्तरवर्णनम् –**

सांख्य-योग-वेदान्तदर्शनेषु प्रत्यक्षज्ञानप्रक्रिया न्यायप्रक्रियातः काचित् भिन्ना एव। एतेषु त्रिषु दर्शनेषु अन्तःकरणस्य मनसः 'वस्तुप्राप्य प्रकाशकारित्वम्' अभिमतम्। तथा न्याय-वैशेषिक-बौद्धादिदर्शनेषु मनसः "वस्तुप्राप्य प्रकाशकारित्वम्' सुतरां विरुद्धमस्ति। एवं योगदर्शनस्य व्यासभाष्ये प्रत्यक्षज्ञानप्रक्रिया इत्थं वर्णितमस्ति – 'इन्द्रियप्रणालिकया चित्तस्य बाह्यवस्तूपरागात् तद्विषया सामान्य-

विशेषात्मनोऽर्थस्य विशेषावधारण-प्रधाना वृत्तिः प्रत्यक्षं प्रमाणम्। फलमविशिष्टः पौरुषेयश्चित्तवृत्तिबोधः' इति।

सांख्यदर्शने बुद्धिवृत्तेः पुरुषेण सह सम्बन्धः केन प्रकारेण भवतीत्यत्र सांख्याचार्याणां मतद्वयं द्रष्टुं शक्येते। तत्र बुद्धिवृत्तौ पुरुषस्य प्रतिबिम्बो भवति इति वाचस्पतिमिश्रः, पुरुषे चित्तवृत्तेः प्रतिबिम्बो भवतीति सांख्यप्रवचनभाष्यकर्ता विज्ञानभिक्षुः। स्वस्वमतपुष्ट्यर्थं तैः पुराणादिसन्दर्भमपि दर्शितवन्तः।

'तस्मिंश्चिद्दर्पणे स्फारे समस्ता वस्तुदृष्टयः।
इमास्ताः प्रतिबिम्बन्ति सरसीवतटद्रुमाः'॥

इति विज्ञानभिक्षुना उल्लिखितम्।

(मूलम्)

ननु निर्विकल्पकं परमार्थतः स्वलक्षणविषयं भवतु प्रत्यक्षम्। सविकल्पकं तु शब्दलिङ्गवदनुगताकारावगाहित्वात् सामान्यविषयं कथं प्रत्यक्षमक्षजस्यैव प्रत्यक्षत्वात्। अर्थस्य च परमार्थतः सत एव तज्जनकत्वात्। स्वलक्षणन्तु परमार्थतः सत् न तु सामान्यम्। तस्य प्रमाणनिरस्तविधिभावस्य अन्यव्यावृत्यात्मनस्तुच्छत्वात्।

सरलव्याख्या –

बौद्धमते केवलं निर्विकल्पकप्रत्यक्षमेवाङ्गीक्रियते। एतेषां मते निर्विकल्पकप्रत्यक्षं वस्तुमात्रविषयकं भवति, अतः अर्थजो भवति, अर्थजत्वात् निर्विकल्पकं प्रत्यक्षमिति मन्यते। सविकल्पके तु अनुमानशब्दयोरिव समानाकारस्य सामान्यस्य गृह्यमानत्वात् जातियुक्तत्वात् बौद्धौ जातेः भावभूतपदार्थत्वेन अस्वीकारात् तत् अर्थजं न भवतीति तस्य प्रत्यक्षमपि न स्वीक्रियते। स्वलक्षणविषयं तु परमार्थतः सत् वर्तते न तु सामान्यम् इति।

"वस्तुमात्रावगाहि यत् प्रत्यक्षं निर्विकल्पकम्।
तत्तु बौद्धमते सिद्धं सविकल्पं न सम्मतम्॥

सामान्यं तुच्छरूपत्वादर्थो नैव यतो भवेत्।
तद्विषयमतो ज्ञेयं सविकल्पं न चार्थजम्"॥

## मूलम्

मैवम्। सामान्यस्यापि वस्तुभूतत्वात्। तदेवं व्याख्यातं प्रत्यक्षम्॥

सरलव्याख्या –

सामान्यं भावभूतपदार्थो नास्तीति यद्बौद्धैः प्रतिपादितं तत्खण्डयति मैवमिति। अर्थात् सामान्यमपि भावभूतपदार्थः अर्थात् घटादिषु यत् घटत्वानुगतज्ञानं प्रतीयते तस्योपपादनम् अवश्यं कर्तव्यम्। घटादिषु अनुगतज्ञानप्रतिपादनाय अतद्व्यावृत्तिरूप- अपोहस्यावलम्बनं यद्बौद्धैः कृतं तत् अत्यन्तवक्रमार्गो वर्तते। दशघटव्यक्तीनां दर्शने सति सामान्यतः मनसि समानता एवोत्पद्यते, न तु अतद्व्यावृत्तिज्ञानम्, अतद्व्यावृत्तिज्ञानमर्थात् तद्भिन्नभिन्नज्ञानम् (पटादिज्ञानम्)। अतः ईदृशसमानप्रतीतेः कारणं भावभूतसामान्यज्ञानमेवेति वक्तव्यम्, न तु अपोहस्येति।

**प्रत्यक्षप्रमाणस्य उपसंहारः –**

इत्थं लौकिकसन्निकर्षाणाम् अलौकिकसन्निकर्षाणां च स्वरूपं तद्भेदाः तादृशसम्बन्धकारणानि, कारणैः जायमानप्रत्यक्षज्ञानादिकञ्च स्पष्टं प्रतिपादितम्। अलौकिकसन्निकर्षाणां सामान्यलक्षण-ज्ञानलक्षण-योगजलक्षणानां सरलतया सङ्क्षेपेण उदाहरणैः स्पष्टीकृतः। तत्रापि चाक्षुषप्रत्यक्षविषये मतमतान्तरेषु भेदाः तेषां खण्डनमण्डनपूर्वकं त्रिविधालौकिकप्रत्त्यासत्तीनां प्रतिपादनं कृत्वा प्रत्यक्षप्रमाणं अभिवर्णितम्।

## अभ्यासः

## (अ) लघूत्तरप्रश्नाः समाधानानि

| क्रमः | प्रश्नः | समाधानम् |
|---|---|---|
| १ | कः व्यापारः? | तत्सत्तातिरिक्तसत्ताकशून्यत्वे सति तज्जन्यजनकः। |
| २ | अलौकिकसन्निकर्षः कतिविधः? | त्रिविधः |
| ३ | अलौकिकसन्निकर्षाः के? | सामान्यलक्षणो ज्ञानलक्षणो योगजलक्षणश्चेति। |
| ४ | 'सामान्यलक्षणः' अस्य का व्युत्पत्तिः? | सामान्यं लक्षणं यस्येति |
| ५ | एकत्र गृहीतधूमेन सकलधूमानां ज्ञानं प्रति कारणं किम्? | सामान्यलक्षणा प्रत्यासत्तिः |
| ६ | चन्दनग्रहणे दूरात् सौरभं यत्तु गृह्यते तस्य कारणं किम्? | ज्ञानलक्षणाप्रत्यासत्तिः। |
| ७ | योगजो नाम किम्? | योगजन्यः। |
| ८ | योगजसन्निकर्षः कतिविधः? किञ्च तत्? | द्विविधः, युक्तयुञ्जानेति। |

| | | |
|---|---|---|
| ९ | सूक्ष्मे व्यवहिते दूरेऽतीतेऽर्थेऽनागते प्रत्यक्षं केषां भवति? | योगिनाम् |
| १० | सांख्य-योग-वेदान्तदर्शनेषु प्रत्यक्षं कथं स्वीकृतम्? | मनसः वस्तुप्राप्यकारित्वेन |
| ११ | बुद्धिवृत्तौ पुरुषस्य प्रतिबिम्बो भवति इति केषामभिप्रायः? | वाचस्पतिमिणाम् |
| १२ | विज्ञानभिक्षोः मते बुद्धिवृत्तेः पुरुषेण सह सम्बन्धः केन प्रकारेण भवति? | पुरुषे चित्तवृत्तेः प्रतिबिम्बो भवतीति |
| १३ | निर्विकल्पकं परमार्थतः स्वलक्षणविषयं भवतु इति के वदन्ति? | बौद्धाः |
| १४ | बौद्धमते सविकल्पकं प्रत्यक्षं न वा? | न |
| १५ | बौद्धमते जातिः भावभूतपदार्थो न वा? | न |
| १६ | वस्तुमात्रावगाहि यत् प्रत्यक्षं तत् किम्? | निर्विकल्पकम् |
| १७ | स्वलक्षणविषयं परमार्थतः किमस्ति? | सदस्ति |

| | | |
|---|---|---|
| १८ | सामान्यस्य वस्तुभूतत्वं कैरङ्गीक्रियते? | नैयायिकैः |
| १९ | किं नाम अतद्व्यावृत्तिज्ञानम्? | तद्भिन्नभिन्नज्ञानम् |
| २० | घ्राणसम्बन्धं विनापि सौरभज्ञानं यत् जातं तत् कीदृशम्? | संस्कारद्वारा उत्पन्नमलौकिकमेव प्रत्यक्षम् |
| २१ | धूमसहचारी कः? | वह्निः |
| २२ | सकलधूमेषु सामान्यं किम्? | धूमत्वम् |
| २३ | कः योगः? | चित्तवृत्तिनिरोधः |
| २४ | भूतभविष्यद्वर्तमानज्ञानं सर्वदा कस्य योगिनः भासते? | युक्तयोगिनः |
| २५ | युञ्जानयोगिनः भूतभविष्यद्ज्ञानं कदा जायते? | चिन्ता कृते सति |

(आ) योग्यं विकल्पं योजयत।

| | | | |
|---|---|---|---|
| १. | युक्तयोगिज्ञानं | (क) चिन्ताकृते सति | २ |
| २. | युञ्जानयोगिज्ञानं | (ख) ज्ञानलक्षणा | ३ |
| ३. | सुरभि चन्दनम् | (ग) सर्वदा ज्ञानम् | १ |

४. धूमत्वेन सकलधूमज्ञानकारणं (घ) द्विविधम् ५

५. प्रत्यक्षं (ङ) सामान्यलक्षणा ४

(इ) **व्याख्यात्मकाः प्रश्नाः।**

१. सामान्यलक्षणाप्रत्त्यासत्तिं सोदाहरणं व्याख्यात।

२. योगजलक्षणाप्रत्त्यासत्तिं व्याख्यात।

३. ज्ञानलक्षणाप्रत्त्यासत्तिं व्याख्यात।

४. प्रत्यक्षविषये मतान्तराणि व्याख्यात।

५. प्रत्यक्षविषये बौद्धमतं खण्डयत।

(ई) **निबन्धात्मकाः प्रश्नाः।**

१. अलौकिकसन्निकर्षाः सोदाहरणं प्रतिपादनीयाः।

२. प्रत्यक्षविषये मतान्तराणि प्रतिपाद्य निराकुरुत।

## पाठः – ६

# अनुमानप्रमाणम्

**प्रस्तावना –**

पूर्वस्मिन् ग्रन्थे करणनिरूपणावसरे भेदसहितं करणं निरूप्य इन्द्रियसंयोगादेः प्रमायाः करणत्वात् प्रमाणम्, तानि च प्रमाणानि चत्वारि, प्रत्यक्ष-अनुमान-उपमान-शब्दाः इति प्रस्थाप्य ततः प्रत्यक्षप्रमाणं सोदाहरणैः भेदसहितं सविस्तरं निरूपितम्। तत्पश्चात् क्रमप्राप्तम् अनुमानप्रमाणं लक्षण-भेद-उदाहरणैः क्रमशः निरूप्यते। यतो हि नैयायिकानां मते अनुमानप्रमाणं मुख्यत्वेन स्वीक्रियते। तत्र उक्तिरपि अस्ति यत् प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिका इति। अर्थात् प्रत्यक्षदृष्टवस्तु अपि यावदनुमानेन न प्राप्नुवन्ति तावन्न निश्चिन्वन्तीति कारणात् न्यायशास्त्रस्य मुख्यं प्रमाणं सम्प्रति विमृश्यते।

## ६.१ अनुमानशब्दार्थः

(मूलम्)

**लिङ्गपरामर्शोऽनुमानम्। येन हि अनुमीयते तदनुमानम्। लिङ्गपरामर्शेण चानुमीयते अतो लिङ्गपरामर्शोऽनुमानम्। तच्च धूमादिज्ञानमनुमितिं प्रति कारणत्वात्। अग्न्यादिज्ञानमनुमितिः। तत्कारणं धूमादिज्ञानम्।**

**सरलव्याख्या**

अनुमित्युत्पत्तिक्रमः - प्रत्यक्षप्रमाणनिरूपणानन्तरम् अनुमानप्रमाणं निरूपयितुम् आरभते लिङ्गपरामर्शोऽनुमानमिति। लिङ्गं नाम लीनमर्थं गमयति बोधयति प्रत्यक्षशब्दादिना जायमानज्ञानस्य अविषयीभूतमर्थं गमयतीति लिङ्गम्। **लिङ्ग्यते अनुमीयते अनेनेति लिङ्गम्,** अत्र हेतुवाचकम्। येन हि अनुमीयते तदनुमानम्। अत्र लिङ्गपरामर्शेन अनुमीयते इत्यतः लिङ्गपरामर्शोऽनुमानम्। तच्च धूमादिज्ञानम् अनुमितिं प्रति कारणम्। वह्न्यादि ज्ञानम् अनुमितिः कार्यम्। वह्न्यादिज्ञानस्य धूमादिज्ञानं करणम्।

## ६.२ व्याप्तिनिरूपणम्

(मूलम्)

किं पुनर्लिङ्गं कश्च तस्य परामर्शः? उच्यते, व्याप्तिबलेन अर्थगमकं लिङ्गम्। यथा धूमो अग्नेर्लिङ्गम्। तथा हि यत्र धूमस्तत्राग्निरिति साहचर्यनियमो व्याप्तिः। तस्यां गृहीतायामेव व्याप्तौ धूमे अग्निं गमयति। अतो व्याप्तिबलेनाग्न्यनुमापकत्वात् धूमोऽग्नेर्लिङ्गम्। तस्य तृतीयं ज्ञानं परामर्शः। तथाहि प्रथमं तावन्महानसादौ भूयो भूयो धूमं पश्यन् वह्निं पश्यति। तेन भूयो दर्शनेन धूमाग्न्योः स्वाभाविकं संबन्धमवधारयति, यत्र धूमस्तत्राग्निरिति।

**सरलव्याख्या-**

ग्रन्थदिशा लिङ्गपरामर्शयोः स्वरूपं वक्ति। किं पुनर्लिङ्गमिति चेत्, व्याप्तेः बलेन अर्थगमकं बोधकं लिङ्गम्, यथा धूमो अग्नेर्लिङ्गमिति। व्याप्तिर्नाम 'यत्र यत्र धूमस्तत्र तत्र अग्निरि'ति साहचर्यनियमः। तादृशव्याप्तेः गृहीतायाम् एव धूमः अग्निं बोधयितुं समर्थो भवति। व्याप्तिबलेन अग्निः बुध्यमानत्वात् धूमोऽग्नेः लिङ्गम्। तस्य लिङ्गस्य तृतीयं ज्ञानं परामर्श इत्युच्यते। तथा हि प्रथमं गृहे महानसादौ वारं वारं धूमं पश्यन् वह्निं पश्यति। तेन भूयो दर्शनेन धूमाग्न्योः विद्यमानं स्वाभाविकं

सम्बन्धम् अवगच्छति यत्, यत्र यत्र धूमः भवति तत्र तत्र अग्निः भवतीति।



चित्रम्-१

(मूलम्)

**यद्यपि यत्र यत्र मैत्रीतनयत्वं तत्र तत्र श्यामत्वमिति भूयो दर्शनं सामान्यमवगम्यते, तथापि मैत्रीतनयत्वश्यामत्वयोः न स्वाभाविकः संबन्धः किन्त्वौपाधिक एव। शाकाद्यन्नपरिणामस्योपाधेर्विद्यमानत्वात्। तथा हि श्यामत्वे मैत्रीतनयत्वं न प्रयोजकं किन्तु शाकाद्यन्नपरिणतिभेद एव प्रयोजकः। प्रयोजकश्च उपाधिरित्युच्यते।**

**सरलव्याख्या -**

तत्र शङ्का जायते दर्शित(यत्र यत्र धूमः तत्र तत्र वह्निरीति)युक्त्यनुसारं यत्र यत्र मैत्रीतनयत्वं तत्र तत्र श्यामत्वम् इत्यपि समानमवगम्यते खलु? इति चेत्, उक्तः यथा धूमाग्न्योः संबन्धः

स्वाभाविकः तथा मैत्रीतनयत्व-श्यामत्वयोः सम्बन्धः न स्वाभाविकः, अपि तु अत्र उपाधिकृतः सम्बन्धः। अर्थात् शाकाद्यन्नपरिणामस्य उपाधेः विद्यमानत्वात् अत्र न तादृशदोष इति। तथैव श्यामत्वे न मैत्रीतनयत्वं प्रयोजकम्। किन्तु शाकाद्यन्नपरिणतिभेद एव प्रयोजकः। स च प्रयोजको उपधिरित्युच्यत इति।

## ६.३ उपाधिनिरूपणम्

(मूलम्)

**न च धूमाग्न्योः सम्बन्धे कश्चिदुपाधिरस्ति। अस्ति चेत् योग्योऽयोग्यो वा। अयोग्यश्च शङ्कितुमशक्यत्वात्, योग्यस्य चाऽनुपलभ्यमानत्वात्। यत्रोपाधिरस्ति तत्रोपलभ्यते। यथाग्नेर्धूमसंबन्धे आर्द्रेन्धनसंयोगः। हिंसात्वस्य च अधर्मसाधनत्वेन सह संबन्धे निषिद्धत्वमुपाधिः। मैत्रीतनयत्वस्य च श्यामत्वेन सह संबन्धे शाकाद्यन्नपरिणतिभेदः।**

**न चेह धूमस्याग्निसाहचर्ये कश्चिदुपाधिरस्ति। यद्यभविष्यत्ततो अद्रक्ष्यत्, ततो दर्शनाभावान्नास्ति इति तर्कसहकारेणानुपलम्भसनाथेन। प्रत्यक्षेणैव उपाध्यभावो अवधार्यते। तथा च उपाध्यभावग्रहणजनितसंस्कारसहकृतेन साहचर्यग्राहिणा प्रत्यक्षेणैव**

**धूमाग्न्योर्व्याप्तिरवधार्यते। तेन धूमाग्न्योः स्वाभाविक एव संबन्धो न त्वौपाधिकः। स्वाभाविकश्च संबन्धो व्याप्तिः।**

**सरलव्याख्या-** पुनः शङ्का भवति यत्, धूमाग्न्योः सम्बन्धे उपाधिरस्ति उत न? यदि अस्ति तर्हि योग्योऽस्ति उत अयोग्योऽस्ति? अयोग्यस्य शङ्का कर्तुं न शक्यते, योग्योपाधिर्यदि अस्ति तर्हि उपलभ्येत किन्तु नोपलभ्यते। यत्रोपाधिरस्ति तत्र उपलभ्यते। यथा अग्नेः धूमेन सह सम्बन्धे उपाधिर्लभ्यते आर्द्रेन्धनसंयोगः। एवमेव हिंसायाः अधर्मसाधनत्वेन सह सम्बन्धे निषिद्धत्वम् उपाधिः। तथा मैत्रीतनयत्वस्यापि श्यामत्वेन सह सम्बन्धे शाकाद्यन्नपरिणतिभेद उपाधिर्वतते। किन्तु धूमस्य अग्निना सह सम्बन्धे न कश्चिदुपाधिरस्ति। धूमाग्न्योः उपाधिर्यदि अभविष्यत् तर्हि दृश्येत। दर्शनाभावात् नास्तीति व्यतिरेकव्याप्त्या अनुलब्धिसहकारेण च प्रत्यक्षेणैव धूमाग्न्योः उपाधिर्नास्तीति निश्चयो भवति। ततश्च स्वाभाविकश्च सम्बन्धो व्याप्तिरिति निश्चितो भवति।

## ६.४ अनुमानप्रक्रिया

(मूलम्)

**तदनेन न्यायेन धूमाग्न्योर्व्याप्तौ गृह्यमाणायां महानसे यद्धूमज्ञानं तत्प्रथमम्। पर्वतादौ पक्षे यद्धूमज्ञानं तद्द्वितीयम्। ततः पूर्वगृहीतां**

धूमाग्न्योर्व्याप्तिं स्मृत्वा यत्र धूमस्तत्राग्निरिति तत्रैव पर्वते पुनर्धूमं परामृशति। अस्त्यत्र पर्वते वह्निना व्याप्तो धूम इति। तदिदं धूमज्ञानं तृतीयम्। एतच्चावश्यमभ्युपेतव्यम्। अन्यथा यत्र धूमस्तत्राग्निरित्येव स्यात्। इह तु कथमग्निना भवितव्यम्। तस्मादिहापि धूमोऽस्ति इति ज्ञानमन्वेषितव्यम्। अयमेव लिङ्गपरामर्शः। अनुमितिं प्रति करणत्वाच्चानुमानम्। तस्मात् अस्त्यत्र पर्वते अग्निरित्यनुमितिज्ञानमुत्पद्यते।

सरलव्याख्या –

एवं सति धूमाग्न्योः व्याप्तेः गृह्यमाणायाम्-

१. महानसे यद्धूमज्ञानं जातं तत्प्रथमम्। (महानसे धूमोऽस्ति वह्निरप्यस्ति)
२. ततः पर्वतादौ पक्षे यद्धूमज्ञानं तद्द्वितीयम्। (पर्वतो धूमवान्)
३. ततः महानसादौ पूर्वगृहीतां धूमाग्न्योः व्याप्तिं स्मृत्वा यत्र धूमस्तत्राग्निरिति पर्वते पुनर्धूमं परामृशति। अस्त्यत्र वह्निव्याप्यो धूम इति। तदिदं ज्ञानं तृतीयम्। (वह्निव्याप्य धूमवानयं पर्वतः इति परामर्शः)







चित्रम्-१ चित्रम्-२ चित्रम्-३

एतद् तृतीयं ज्ञानमवश्यमङ्गीकर्तव्यम्। अन्यथा तृतीयं ज्ञानं विना अनुमित्युत्पत्तेः असम्भवात्। अयमेव लिङ्गपरामर्शः, अनुमितिं प्रति कारणत्वात्, तस्मात् अस्त्यत्र पर्वते वह्निरिति अनुमितिज्ञानम् उत्पद्यते इत्यनुमित्युत्पत्तिक्रमः।

(मूलम्)

**ननु कथं प्रथमं महानसे यद्धूमज्ञानं तन्नाग्निमनुमापयति? सत्यम्। व्याप्तेरगृहीतत्वात्। गृहीतायामेव व्याप्तावनुमित्युदयात्। अथ व्याप्तिनिश्चयोत्तरकालं महानस एवाग्निरनुमीयताम्।**

**सरलव्याख्या-**

प्रश्नः – महानसे यद् धूमज्ञानम् अस्ति तद् अग्निं कुतः अनुमापयितुं न शक्नोति? इति चेत्, प्रथमधूमज्ञानसमये

महानसस्थले व्याप्तिज्ञानं नास्ति। अनुमानस्थले व्याप्तिज्ञानं विना तध्दूमज्ञानेन वह्निः अनुमापयितुं न शक्यते। तर्हि व्याप्तिनिश्चयकालात् अनुक्षणमेव महानस एव अग्निमनुमीयताम् कस्मात् पर्वते? इति चेत्, न, इति समाददति।

## ६.४ लिङ्गपरामर्शः

(मूलम्)

मैवम्। अग्नेर्दृष्टत्वेन सन्देहस्यानुदयात्। सन्दिग्धश्चार्थो अनुमीयते। यथोक्तं भाष्यकृता - `नानुपलब्धे न निर्णीते अर्थे न्यायः प्रवर्तते किन्तु सन्दिग्धे' इति। अथ पर्वतगतमात्रस्य पुंसो यध्दूमज्ञानं, तत् कथं नाग्निमनुमापयति? अस्ति चाग्निसन्देहः। साधकबाधकप्रमाणाभावेन संशयस्य न्यायप्राप्तत्वात्। सत्यम्, अगृहीतव्याप्तेरिव गृहीतविस्मृतव्याप्तेरपि पुंसो अनुमानानुदयेन व्याप्तिस्मृतेरपि अनुमितिहेतुत्वात्। धूमदर्शनाच्चोद्बुद्धसंस्कारो व्याप्तिं स्मरति। यो यो धूमवान् स सोऽग्निमान् यथा महानस इति। तेन धूमदर्शने जाते व्याप्तिस्मृतौ भूतायां यद्धूमज्ञानं तत् तृतीयं `धूमवांश्चायम्' इति। तदेवाग्निमनुमापयति नान्यत्। तदेवानुमानम्। स एव लिङ्गपरामर्शः। तेन व्यवस्थितमेतल्लिङ्गपरामर्शो अनुमानमिति।

सरलव्याख्या –

महानसे अग्निः दृष्टः, अग्नेः दृष्टत्वात् प्रत्यक्षत्वात् प्रत्यक्षे सति अग्निसन्देहो न जायते। अथ च केवलसन्दिग्धा संशयिता एव अर्था अनुमीयन्ते। तत्रैव न्यायः तर्कः उपयुज्यते। तत्र भाष्योक्तं प्रमाणं यथा- “नानुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवर्तते किन्तु सन्दिग्धे” अतः। अर्थात् वस्तु तत्त्वं यदि प्रत्यक्षादिप्रमाणैः निश्चितम् भवति अथवा असत् वस्तुनि न्यायः उपयुज्यते अपि तु यत्र वस्तुनः वास्तविकं ज्ञानं नास्ति अपि तु विरुद्धधर्माणां समावेशः भवति तत्रैव इति।

तर्हि पर्वतसमीपं गतस्य पुरुषस्य यत् पर्वते धूमज्ञानं जातं धूमः प्रत्यक्षीकृतः, तदेव अग्निं कथं नानुमापयति नोत्पादयति? तत्र भवदुक्त अग्निसन्देहोऽप्यस्ति खलु? इति चेत्, सत्यम्। यथा अस्वीकृतव्याप्त्या अनुमितिः नोत्पद्यते तथैव गृहीतविस्मृतव्याप्त्यापि अनुमित्युत्पत्तिः न संभवति। अनुमित्युत्पत्तये व्याप्तिस्मृतेरपि हेतुत्वं कारणत्वं वर्तते। अतः पूर्वं वारं वारम् अनुभूतस्य वह्निधूमयोः साहचार्यवान् पुरुषः पर्वते धूमदर्शनानन्तरं उद्बुद्धसंस्कारो व्याप्तिं स्मरति, यो यो धूमवान् स सोऽग्निमान् यथा महानस इति। तादृशव्याप्तिस्मरणे सति यद्धूमज्ञानं जायते तदेव तृतीयं ज्ञानम्

(पर्वतो धूमवान्, धूमो वह्निव्याप्यः, वह्निव्याप्यधूमवान् पर्वतः) इति ज्ञानम् उत्पद्यते। तदेव वह्निव्याप्यधूमवानयमिति ज्ञानमेव पर्वते अग्निमनुमापयति नान्यत्। अतः वह्निव्याप्यधूमविषयकपरामर्शद्वारा पर्वते वह्निविषयकज्ञानस्य उत्पद्यमानत्वात् कार्यनियतपूर्ववृत्तेः कारणत्वात् च अयं लिङ्गपरामर्श एव अनुमानमिति सिद्धान्तः।

उपसंहारः –

प्रमितेन लिङ्गेन तत्संबन्धिनः पश्चात् प्रमाणमेव अनुमानम्। अनुमाने मुख्यत्वेन व्याप्तिज्ञानमावश्यकम्। सा च व्याप्तिः साहचर्यनियमात्मिका। साहचार्यं नाम सह चरण स्वाभवः, यथा धूमः वह्निं त्यक्त्वा न तिष्ठति, पुरुषेण सह छाया। यत्र कारणं दृश्यते कार्यं न दृश्यते तर्हि तत्र अनुमानं क्रियते। कारणमस्ति तर्हि कार्यं भवेदेवेति, यथा धूमो अस्ति तर्हि तत्कारणं वह्निरपि स्यादेव। एवमेव कार्यं दृष्टं तर्हि तत्कारणमपि अवश्यं अनुमीयते, यथा नद्याः पूर्णत्वं वेगवत्त्वञ्च दृष्ट्वा जाता वृष्टिरिति। क्वचित् अन्यत्र दृष्टस्य देवदत्तस्य पुनरन्यस्मिन्देशे दृष्ट्वा अनुमीयते सः गतिमानिति। इत्थमनुमानं प्राचीनन्याये त्रिप्रकारं प्रतिपादितमस्ति। पूर्ववच्छेशवत्सामान्यतोदृष्टञ्चेति। त्रिष्वपि स्थानेषु लिङ्गमेव करणं

परामर्शो व्यापारः, तज्जन्यं ज्ञानम् अनुमितिः। तस्माल्लिङ्गपरामर्शो अनुमानम्।

## अभ्यासः

### (अ) लघूत्तरप्रश्नाः समाधानानि

| क्रमः | प्रश्नः | समाधानम् |
|---|---|---|
| १ | लिङ्गपरामर्शः कः? | अनुमानम् |
| २ | धूमादिज्ञानं कीदृशानुमितिं प्रति कारणम्? | वह्न्यनुमितिं प्रति |
| ३ | लिङ्गं नाम किम्? | व्याप्तिबलेन अर्थगमकम् |
| ४ | तृतीयं जानं किमुच्यते? | परामर्श उच्यते। |
| ५ | का नाम व्याप्तिः? | साहचर्यनियमो व्याप्तिः |
| ६ | न्यायः कुत्र प्रवर्तते? | संधिग्धे अर्थे |
| ७ | न्यायः कुत्र न प्रवर्तते? | अनुपलब्धे वा निश्चिते अर्थे |
| ८ | धूमाग्न्योः संबन्धः स्वाभाविक उत औपाधिकः? | स्वाभाविकः |

| | | |
|---|---|---|
| ९ | मैत्रीतनयत्व-श्यामत्वयोः संबन्धः कीदृशः? | औपाधिकः |
| १० | श्यामत्वे प्रयोजकः कः? | शाकाद्यन्नपरिणतिभेद एव |
| ११ | अग्नेः धूमसंबन्धे उपाधिः का? | आर्द्रेन्धनसंयोगः |
| १२ | उपाध्यभावः कथमवधार्यते? | प्रत्यक्षेणैव |
| १३ | पर्वतादौ पक्षे यद्धूमज्ञानं तत्कतमम्? | द्वितीयम् |
| १४ | महानसे यद्धूमज्ञानं तत्कतमम्? | प्रथमम् |
| १५ | अगृहीतायां व्याप्तौ अनुमितिर्भवति न वा? | न |
| १६ | गृहीतविस्मृतव्याप्तौ अनुमितिर्भवति न वा? | न |
| १७ | व्याप्तिस्मरणं कीदृशम्? | यो यो धूमवान् स सो अग्निमान् यथा महानस इति |
| १८ | अग्नेर्लिङ्गं किम्? | धूमः |
| १९ | परामर्शः कः? | वह्निव्याप्यधूमवानयं पर्वत इतिज्ञानम् |
| २० | धूमोऽग्निं कस्यां गृहीतायां गमयति? | व्याप्तौ गृहीतायाम् |
| २१ | कयोः संबन्धः स्वाभाविकः? | धूमाग्न्योः |

| | | |
|---|---|---|
| २२ | अनुमितेः करणं किम्? | अनुमानम् |
| २३ | कोऽर्थः अनुमीयते? | संदिग्धश्चार्थः |
| २४ | अग्नेः दृष्टे सति अनुमितिरुदेति न वा? | नोदेति |
| २५ | 'नानुपलब्धे न निर्णीतेर्थे न्यायः प्रवर्तते किन्तु सन्दिग्धे' इति कस्य वचनम्? | भाष्यकार-वात्स्यायानस्य |

(आ) योग्यं विकल्पं योजयत।

| | | | | |
|---|---|---|---|---|
| १ | मैत्रीतनयत्वस्य श्यामत्वेन सह संबन्धे | क | उपाधिर्नास्ति | ४ |
| २ | हिंसात्वस्य अधर्मसाधनत्वेन सह संबन्धे | ख | आर्द्रेन्धनसंयोगः | ३ |
| ३ | अग्नेर्धूमसंबन्धे | ग | न प्रयोजकम् | ५ |
| ४ | धूमेनाग्निसंबन्धे | घ | निषिद्धत्वम् | २ |
| ५ | श्यामत्वे मैत्रीतनयत्वं | ङ | शाकाद्यन्नपरिणतिभेदः | १ |

(इ) **व्याख्यात्मकाः प्रश्नाः।**

१ लिङ्गस्वरूपं सोदाहरणं व्याख्यात।

२ अनुमाने व्याप्तेः प्रयोजनं व्याख्यात।

३ परामर्शं व्याख्यात।

४ अनुमानस्य आवश्यकतां व्याख्यात।

५ कार्यकारणभावं व्याख्यात

(ई) **निबन्धात्मकाः प्रश्नाः।**

१ प्रथम-द्वितीय-तृतीयलिङ्गानां भेदं प्रतिपादयत।

२ उपाधेः स्वरूपं सोदाहरणैः विमृशत।

*****

## पाठ -७

# अनुमानद्वैविध्यम्

**प्रस्तावना –**

अनुमितेः करणम् अनुमानम् इति पूर्वपाठे अनुमानस्वरूपं विज्ञातम्। सम्प्रति तदनुमानस्य भेदाः के इति विचार्यन्ते।

(मूलम्)

**तच्चानुमानं द्विविधम्। स्वार्थं परार्थं च। स्वार्थं स्वानुमितिप्रतिपत्तिहेतुः। तथा हि स्वयमेव महानसादौ विशिष्टेन प्रत्यक्षेण धूमाग्न्योर्व्याप्तिं गृहीत्वा पर्वतसमीपं गतः, तद्गतेचाग्नौ सन्दिहानः पर्वतवर्तिनीम् अविच्छिन्नमूलामभ्रंलिहां धूमरेखां पश्यन् धूमदर्शनाच्च उद्बुद्धसंस्कारो व्याप्तिं स्मरति। यत्र धूमस्तत्राग्निरिति। ततो अत्रापि धूमोऽस्तीति प्रतिपद्यते। तस्मादत्र पर्वते अग्निरप्यस्तीति स्वयमेवप्रतिपद्यते।**

अनुमानम्

↓

| स्वार्थानुमानम् | परार्थानुमानम् |
|---|---|
| ↓ | ↓ |
| स्वानुमिति हेतुः | अन्यं प्रति बोधयितुं हेतुः |

**सरलार्थः** - तच्चानुमानम् द्विप्रकारकम्,

१. स्वार्थानुमानम्, २. परार्थानुमानञ्चेति।

## ७.१ स्वार्थानुमानम् –

स्वस्य उपलब्धिहेतुः स्वार्थम्। यथा- पुरुषः स्वयं महानस-यज्ञशालादौ स्वचक्षुभ्यां धूमाग्न्योः व्याप्तिं (यत्र धूमः तत्र वह्निरिति) गृहीत्वा, ततः क्वचित् पर्वतसमीपं गतः, तत्र दूरात् पर्वतस्य मूलात् आकाशं यावद् अविच्छिन्नतया जायमानां (अभ्रंलिहां)धूमरेखां पश्यन् अग्नौ संशयं प्राप्य, पूर्वं महानसादौ अनुभूतसंस्कारस्य उद्बुद्धे सति व्याप्तिं (यत्र धूमः तत्र वह्निरिति) स्मरति। स्मृत्वा प्रतिपद्यते यत् महानसवदत्रापि धूमोऽस्तीति। यथा महानसे धूमसत्त्वे वह्निर्भवति तथैवात्रापि वह्निः

भवति। तस्माद् अत्र पर्वतेऽपि वह्निरस्ति इति स्वयमेव पर्वते अग्निं प्रतिपद्यते तत् स्वार्थानुमानम्।

(मूलम्)

**यत्तु कश्चित् धूमादग्निमनुमाय परं बोधयितुं पञ्चावयववाक्यं प्रयुङ्क्ते तत्परार्थानुमानम्। तद्यथा पर्वतो वह्निमान्,धूमवत्त्वात्, यो यो धूमवान् सः सो अग्निमान् यथा महानसः, तथा चायम्, तस्मात्तथेति। अनेन वाक्येन प्रतिज्ञादिमता प्रतिपादितात् पञ्चरूपोपपन्नलिङ्गात् परोऽपि अग्निं प्रतिपद्यते। तेनैतत् परार्थानुमानम्।**

७.२ **परार्थानुमानम्** –

परं प्रति बोधयितुं पञ्चावयवमनुमानवाक्यं प्रयुङ्क्ते तत्परार्थम्। अर्थात् कश्चन पुरुषः स्वयं धूमाग्न्योः स्वाभाविकं सम्बन्धं ज्ञात्वा पर्वते अग्निमनुमितः, स अन्यपुरुषं बोधयितुं पञ्चावयवयुक्तस्य अनुमानवाक्यस्य प्रयोगं कृत्वा तस्यापि पर्वते अग्निर्वर्तत इति बोधयति तत्परार्थानुमानम्। तत् कथम् इति चेदुच्यते, ज्ञातः पुरुषः अन्यं पुरुषम् इत्थं बोधयति-

**प्रथमः वदति** – i. **पर्वतो वह्निमानिति।**

**द्वितीयः पृच्छति** - कस्मात्? इति। (हेतुं दर्शयति प्रथमः)

**प्रथमः वदति** –ii. **धूमवत्त्वात्** इति।

**द्वितीयः पृच्छति** - को नियमः? इति। (उदाहरणं दर्शयति)

**प्रथमः वदति** – iii. **यो यो धूमवान् स सोऽग्निमान्, यथामहानसः** इति।

**द्वितीयः पृच्छति** - तर्हि किम्? इति। (उपनयं दर्शयति)

**प्रथमः वदति** –iv. **तथा च अयम्** अर्थात् यथा महानसः धूमवत्त्वात् वह्निमान् तथा अयं पर्वतोऽपि इति। अन्ते (निगमनं दर्शयति)

**प्रथमः वदति** –v. **तस्मात् तथा** अर्थात् धूमवत्त्वात् अयं पर्वतो वह्निमान् इति।

एवं रूपेण पञ्चावयववाक्यप्रयोगेन प्रतिपादिते सति भिन्नोऽपि पुरुषो अग्निं प्रतिपद्यते। तस्मादेतत् परार्थानुमानम्।

## ७.३ पञ्चावयवाः –

परार्थानुमाने परं (अन्यं) बोधयितुं ये अवयवाः प्रयुक्ताः ते पञ्च अवयवाः। ते यथा – प्रतिज्ञा, हेतुः, उदाहरणम्, उपनयः, निगमनञ्चेति। तेषां पञ्चानामप्यवयवानाम् उदाहरणसहितं प्रयोगः इत्थम्- अनुमानम्।

ञपञ्चावयवाः

| प्रतिज्ञा | हेतुः | उदाहरणम् | उपनयः | नियमनम् |
|---|---|---|---|---|
| ↓ | ↓ | ↓ | ↓ | ↓ |
| साध्यनिर्देशः | पञ्चम्यन्त-वचनम् | यत्र यत्र धूमः तत्र तत्र वह्नि यथा महानसम् | तथा चायम् | तस्मात् तथा |
| ↓ | ↓ | ↓ | ↓ | ↓ |
| पर्वतो वह्निमान् | धूमवत्त्वात् | महानसः | वह्निव्याव्य-धूमवानयं | पर्वतो वह्निमान् |

१. पर्वतो वह्निमान् – प्रतिज्ञा।

२. धूमवत्त्वात् – हेतुः।

३. यो यो धूमवान् स सोऽग्निमान् यथा महानसम् – उदाहरणम्।

४. तथा च अयम् – उपनयः।

५. तस्मात् तथा – निगमनम्। यथाक्रमम् एतेषां प्रयोगं कृत्वा परोऽपि पुरुषः पर्वते वह्निं प्रतिपद्यते।

(मूलम्)

पर्वतस्याग्निमत्त्वं साध्यम्, धूमवत्त्वं हेतुः। स च अन्वयव्यतिरेकी, अन्वयेन व्यतिरेकेण च व्याप्तिमत्वात्। तथा हि यत्र यत्र धूमवत्त्वं तत्राग्निमत्त्वं यथा महानसे इत्यन्वयव्याप्तिः। महानसे धूमाग्न्योः अन्वयसद्भावात्। एवं यत्राग्निर्नास्ति तत्र धूमोऽपि नास्ति यथा महाह्रदे इतीयं व्यतिरेकव्याप्तिः। महाह्रदे धूमाग्न्योः व्यतिरेकस्य सद्भावदर्शनात्।

व्यतिरेकव्याप्तेस्त्वयं क्रमः, अन्वयव्याप्तौ यद्व्याप्यं तदभावो अत्र व्यापकः। यच्च व्यापकं तदभावो अत्र व्याप्य इति। तदुक्तम् –

व्याप्यव्यापकभावो हि भावयोर्याद्दृगिष्यते।
तयोरभावयोस्तस्माद् विपरीतः प्रतीयते।।

अन्वये साधनं व्याप्यं साध्यं व्यापकमिष्यते।
तदभावोऽन्यथा व्याप्यो व्यापकः साधनात्ययः।।

व्याप्यस्य वचनं पूर्वं व्यापकस्य ततःपरम्।
एवं परीक्षिता व्याप्तिः स्फुटीभवति तत्त्वतः।।

तदेवं धूमवत्त्वे हेतावन्वयेन व्यतिरेकेण च व्याप्तिरस्ति।

यत्तु वाक्ये केवलमन्वयव्याप्तेरेव प्रदर्शनं तदेकेनापि चरितार्थत्वात्। तत्राप्यन्वयस्य अवक्रत्वात् प्रदर्शनम्। ऋजुमार्गेन सिद्ध्यतो अर्थस्य वक्रेण साधनायोगात्। न तु व्यतिरेकव्याप्तेरभावात्। तदेवं धूमवत्त्वं हेतुरन्वयव्यतिरेकी। एवमन्ये अपि अनित्यत्वादौ साध्ये कृतकत्वादयो हेतवो अन्वयव्यतिरेकिणो द्रष्टव्याः। यथा शब्दो अनित्यः कृतकत्वात् घटवत्। यत्र कृतकत्वं तत्रानित्यत्वम्। यत्रानित्यत्वाभावः तत्र कृतकत्वाभावो यथा गगने।

लिङ्गम्

| | | |
|---|---|---|
| अन्वयव्यतिरेकि | केवलान्वयि | केवलव्यतिरेकि |
| अन्वयेन व्यतिरेकेन च व्याप्तिमत | अन्वयमात्रव्याप्तिकम् | व्यतिरेकमात्रव्याप्तिकम् |
| पर्वतो वह्निमान् धूमात् | शब्दो अभिधेयः प्रमेयत्वात् | पृथिवी इतरभिन्ना गन्धवत्वा |

## ७.४ अन्वयव्यतिरेकौ -

हेतुः त्रिविधो भवति। अन्वयव्यतिरेकी – केवलान्वयी-केवलव्यतिरेकी चेति। अन्वयव्यतिरेकी नाम अन्वयव्याप्त्या व्यतिरेकव्याप्त्या च व्याप्तिमत् यद्धेतुः सः। यथा पर्वतो वह्निमान् धूमादित्यत्र सम्प्रति वह्निसाध्ये धूमहेतुः अन्वय-व्यतिरेकि हेतुर्वर्तते। यथा यत्र धूमवत्त्वं तत्र वह्निमत्वं यथा महानसे इत्यन्वयव्याप्तिः। महानसे धूमाग्न्योः स्वाभाविकसम्बन्धस्य दृष्टत्वात्। एवं यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति यथा जलह्रदे इति व्यतिरेकव्याप्तिः। जलह्रदे धूमाग्न्योः व्यतिरेकस्य(विरोधाभावस्य) दृष्टत्वात्।

- तत्सत्त्वे तत्सत्त्वम् अन्वयव्याप्तिः अर्थात् हेतुसत्त्वे साध्यसत्त्वम्।

- तदभावे तदभावः व्यतिरेकव्याप्तिः अर्थात् साध्याभावे हेत्वभावः।

तत्र अन्वयव्याप्तेः व्यतिरेकव्याप्तेः च अयं क्रमः यत्, "अन्वयव्याप्तौ साधनं व्याप्यं भवति साध्यं व्यापकं" भवति। किन्तु व्यतिरेकव्याप्तौ तद्विपरीतम्, यथा अन्वयव्याप्तौ यद्व्याप्यं (न्यूनदेशवृत्तिः **धूमः**), तदभावः (धूमाभावः) व्यतिरेकव्याप्तौ व्यापको भवति। यच्च अन्वयव्याप्तौ व्यापकं (अधिकदेशवृत्तिरग्निः), तदभावः (वह्नेरभावः) अत्र व्याप्यो भवति। एतदेव प्रतिपादितं श्लोकवार्तिके कुमारिलभट्टेन –

**व्याप्यव्यापकभावो हि भावयोर्यादृगिष्यते।**
**तयोरभावयोस्तस्माद् विपरीतः प्रतीयते॥**

**अन्वये साधनं व्याप्यं साध्यं व्यापकमिष्यते।**
**तदभावोऽन्यथा व्याप्यो व्यापकः साधनात्ययः॥**

**व्याप्यस्य वचनं पूर्वं व्यापकस्य ततः परम्।**
**एवं परीक्षिता व्याप्तिः स्फुटीभवति तत्त्वतः॥**[1]

[1] श्लोकवार्तिकम् – १२१-१२३।

व्याप्य-व्यापकभावः भावपदार्थयोः यथा कथ्यते तद्विपरीतेन अभावयोः ब्रूते। यथा अन्वयव्याप्तौ साधनं व्याप्यं साध्यं च व्यापकम्। तदभावपदार्थे व्याप्याभावः व्यापकं साधनम्, व्यापकाभावः व्याप्यं साध्यं भवति इति साधु परीक्षिते सति व्याप्तिः स्फुटा भवतीति।

पर्वतो वह्निमान् धूमात् इत्यत्र यत्र धूमः तत्र वह्निः इति अन्वयव्याप्तिः। यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति इति व्यतिरेकव्याप्तिः। एवं च धूमवत्त्वे हेतौ अन्वयेन व्यतिरेकेण च व्याप्तिरस्ति। एवमेव अन्यान्यपि कानिचन उदाहरणानि यथा- शब्दो अनित्यः कृतकत्वात् घटवदित्यत्र यत्र कृतकत्वं तत्र अनित्यत्वम्। यत्र अनित्यत्वाभावः तत्र कृतकत्वाभावः यथा गगनम् इति।

अत्र प्रश्नः – पर्वतो वह्निमान् धूमादित्यस्मिन् वाक्ये अन्वय-व्यतिरेकद्विविधव्याप्तेः सत्त्वेऽपि केवलम् अन्वयव्याप्तेरेव प्रदर्शनं कुतः? इतिचेत्, अन्वयव्याप्तेः अवक्रत्वात् प्रदर्शनम्। ऋजुमार्गेण सिद्ध्यतोऽर्थस्य वक्रेण साधनऽयोगात् न प्रदर्शनम्। न तु व्यतिरेकव्याप्तेरभावात् इति।

(मूलम्)

**कश्चिद्धेतुः केवलव्यतिरेकी। तद्यथा सात्मकत्त्वे साध्ये प्राणादिमत्त्वं हेतुः। यथा जीवच्छरीरं सात्मकं प्राणादिमत्त्वात्। यत् सात्मकं न भवति**

तत् प्राणादिमन्न भवति। यथा घटः। न चेदं जीवच्छरीरं तथा, तस्मान्न तथेति। अत्र हि जीवच्छरीरस्य सात्मकत्वं साध्यम्, प्राणादिमत्त्वं हेतुः। स च केवलव्यतिरेकी, अन्वयव्याप्तेरभावात्। तथा हि यत् प्राणादिमत् तत् सात्मकं यथा अमुक इति दृष्टान्तो नास्ति। जीवच्छरीरं सर्वं पक्ष एव।

लक्षणमपि केवलव्यतिरेकी हेतुः। यथा पृथिवीलक्षणं गन्धवत्त्वम्। विवादपदं पृथिवीति व्यवहर्तव्यं, गन्धवत्त्वात्, यन्न पृथिवीति व्यवह्रियते तन्न गन्धवत् यथापः। प्रमाणलक्षणं वा यथा प्रमाकरणत्वम्। तथा हि प्रत्यक्षादिकं प्रमाणमिति व्यवहर्तव्यं प्रमाकरणत्वात्। यत्प्रमाणमिति न व्यवह्रियते तन्न प्रमाकरणं यथा प्रत्यक्षाभासादि, न पुनस्तथेदं तस्मान्न तथेति। न पुनरत्र यत्प्रमाकरणं तत्प्रमाणमिति व्यवहर्तव्यं यथा अमुक इत्यन्वयदृष्टान्तो अस्ति प्रमाणमात्रस्य पक्षीकृतत्वात्। अत्र च व्यवहारः साध्यो न तु प्रमाणत्वं तस्य प्रमाकरणत्वाद्धेतोरभेदेन साध्याभेददोषप्रसङ्गात्। तदेवं केवलव्यतिरेकिणो दर्शिताः।

७.३ केवलव्यतिरेकी –

व्यतिरेकमात्र व्याप्तिमत् केवलव्यतिरेकी इति केवलव्यतिरेकिणः लक्षणम्(अन्वयो न भवतीत्यर्थः)। यथा सात्मकत्वे साध्ये प्राणादिमत्त्वं हेतुः अर्थात् **जीवच्छरीरं सर्वं सात्मकं प्राणादिमत्त्वात्** इत्यत्र जीवच्छरीरस्य

आत्मसत्त्वं साध्यम्, प्राणादिमत्त्वं हेतुः। स च केवलव्यतिरेकी। यतो हि अन्वयव्याप्तेरभावात् यथा- यत् प्राणादिमत् तत् सात्मकं यथा अमुक इति उदाहरणं नास्ति, जीवच्छरीरस्य सर्वस्यापि पक्षत्वात्। अतः यत् सात्मकं न भवति तत् प्राणादिमत् न भवति यथा घटः, न च इदं जीवच्छरीरं तथा, तस्मान् न तथा इति अत्र केवलव्यतिरेकी हेतुः सिद्धः। उदाहरणान्तरं यथा - **पृथिवी इतरभिन्ना गन्धवत्त्वात्** इत्यत्र यत्र गन्धवत्वं तत्र पृथिवी यथा इति दृष्टान्तो नास्ति। अतः गन्धवत्त्वात् पृथिवी इतरभिन्ना, यत् इतरेभ्यो न भिद्यते न तद् गन्धवत्, यथा जलम्, न च इयं पृथिवी तथा, तस्मान्न तथा इति।

अन्यदुदाहरणं प्रतिपाद्यते प्रमाकरणं वेति। यथा प्रमाकरणत्वम्। तथा च **प्रत्यक्षादिकं प्रमाणमिति व्यवहर्तव्यम्, प्रमाकरणत्वात्**। यत् प्रमाणम् इति न व्यवह्रियते तत् न प्रमाकरणं यथा प्रत्यक्ष आभासादि। तथा इदं न, तस्मान्न तथा इति। न पुनरत्र 'यत् प्रमाकरणं तत् प्रमाणमिति व्यवहर्तव्यम्' यथा अमुक इति दृष्टान्तस्य अभावात्, प्रमाणमात्रस्य पक्षीकृतत्वात्। अत्र च व्यवहारः साध्यः न तु प्रमाणत्वम्। प्रमाणत्वस्य प्रमाकरणत्वात् हेतोः अभेदेन साध्य अभेददोषप्रसङ्गात्। (सिद्धत्व-साध्यत्वयोः एककालावच्छेदेन सह अवस्थानस्य असम्भवात्)।

(मूलम्)

कश्चिदन्यो हेतुः केवलान्वयी। यथा शब्दो अभिधेयः प्रमेयत्वात्। यत्प्रमेयं तदभिधेयम्, यथा घटः। तथा चायं तस्मात्तथेति। अत्र शब्दस्याभिधेयत्वं साध्यं प्रमेयत्वं हेतुः। स च केवलान्वय्येव। यदभिधेयं न भवति तत्प्रमेयमपि न भवति यथा अमुक इति व्यतिरेकदृष्टान्ताभावात्। सर्वत्र हि प्रामाणिक एवार्थो दृष्टान्तः। स च प्रमेयश्चाभिधेयश्चेति।

७.४ केवलान्वयी –

अन्वयमात्र-व्याप्तिकः केवलान्वयी हेतुः। अर्थात् यत्र केवलम् अन्वय एव सम्भवति तत्। यथा शब्दोऽभिधेयः प्रमेयत्वात्। अत्र यद् यत् प्रमेयं तत्तदभिधेयं यथा घटः। तथा च अयम्, तस्मात् तथा इति। अत्र शब्दस्य अभिधेयत्वं साध्यम्, प्रमेयत्वं हेतुः। स च प्रमेयत्वहेतुः केवलान्वयी यस्य केवलम् अन्वय एव वर्तते। यदभिधेयं नास्ति तत् प्रमेयमपि नास्ति यथा अमुक इति व्यतिरेकदृष्टान्तस्य अभावात्। प्रमेयत्वम् अभिधेयत्वञ्च सर्वत्र प्रामाणिक अर्थ एव दृष्टान्तः दृष्टः।

(मूलम्)

एतेषां च अन्वयव्यतिरेकि-केवलान्वयि-केवलव्यतिरेकि-हेतूनां त्रयाणां मध्ये यो हेतुरन्वयव्यतिरेकी स पञ्चरूपोपपन्न एव स्वसाध्यं

साधयितुं क्षमते, नत्वेकेनापि रूपेण हीनः। तानि पञ्चरूपाणि पक्षसत्त्वं, सपक्षसत्त्वं, विपक्षव्यावृत्तिः, अबाधितविषयत्वं, असत्प्रतिपक्षत्वं चेति।

एतानि पञ्चरूपाणि धूमवत्त्वादौ अन्वयव्यतिरेकिणि हेतौ विद्यन्ते। तथाहि धूमवत्त्वं पक्षस्य पर्वतस्य धर्मः, पर्वते तस्य विद्यमानत्वात्। एवं सपक्षसत्त्वं, सपक्षे महानसे तद् विद्यत इत्यर्थः। एवं विपक्षान्महाह्रदात् व्यावृत्तिस्तत्र नास्तीत्यर्थः। एवमबाधितविषयं च धूमवत्त्वम्। तथा हि धूमवत्त्वस्य हेतोर्विषयः साध्यधर्मस्तच्छाग्निमत्त्वम्, तत्केन प्रमाणेन न बाधितं न खण्डितमित्यर्थः।

एवमसत्प्रतिपक्षत्वम् - असन् प्रतिपक्षो यस्येत्यसत्प्रतिपक्षं धूमवत्त्वं हेतुः। तथा हि साध्यविपरीतसाधकं हेत्वन्तरं प्रतिपक्ष इत्युच्यते। स च धूमवत्त्वे हेतौ नास्त्येवानुपलम्भात्। तदेवं पञ्चरूपाणि धूमवत्त्वे हेतौ विद्यन्ते। तेनैतद् धूमवत्त्वम् अग्निमत्त्वस्य साधकम्। अग्नेः पक्षधर्मत्वं, हेतोः पक्षधर्मताबलात् सिध्यति। तथाहि अनुमानस्य द्वे अङ्गे व्याप्तिः पक्षधर्मता च। तत्र व्याप्त्या साध्यसामान्यस्य सिद्धिः। पक्षधर्मताबलात्तु पक्षसम्बन्धित्वं विशेषः सिध्यति। पर्वतधर्मेण धूमवत्त्वेन वह्निरपि पर्वतसम्बद्ध एवानुमीयते। अन्यथा साध्यसामान्यस्य व्याप्तिग्रहादेव सिद्धेः कृतमनुमानेन।

**यस्तु अन्योऽपि अन्वयव्यतिरेकी हीतुः, स सर्वः पञ्चरूपोपपन्न एव सद्धेतुः। अन्यथा हेत्वाभासो अहेतुरिति यावत्।**

**केवलान्वयी चतूरूपोपपन्न एव स्वसाध्यं साधयति। यस्य हि विपक्षाद् व्यावृत्तिर्नास्ति, विपक्षाभावात्।**

**केवलव्यतिरेकी च चतूरूपोपपन्न एव। तस्य हि सपक्षे सत्त्वं नास्ति, सपक्षाभावात्।**

## ७.५ अन्वयव्यतिरेकी – पञ्चरूपोपपन्नता च

अन्यतमो हेतुः अन्वय-व्यतिरेकि-हेतुः। स च पञ्चरूपोपपन्न एव स्वसाध्यं साधयितुं शक्नोति। पञ्चरूपेषु एकरूपेणापि हीनः सन् स्वसाध्यं साधयितुं न शक्नोतीत्यर्थः। तर्हि जिज्ञासा उदेति **'कानि तानि पञ्चरूपाणि?'** इति।

**सिद्धेतोः रूपाणि**

| पक्षसत्त्वम् | सपक्षसत्त्वम् | विपक्षासत्त्वम् | अबाधितत्त्वम् | असत्प्रतिपक्षत्त्वम् |
|---|---|---|---|---|
| सन्दिग्ध साध्ये सत्त्वम् | निश्चित साध्ये सत्त्वम् | निश्चित साध्याभावे सत्त्वम् | बाधरहितत्वम् | सत्प्रतिपक्ष रहितत्त्वम् |

**पञ्चरूपाणि –**

१. पक्षधर्मत्वम्।

२. सपक्षे सत्त्वम्।

३. विपक्षाद् व्यावृत्तिः।

४. अबाधितविषयत्वम्।

५. असत्प्रतिपक्षत्वञ्च।

एतानि पञ्चरूपाणि पर्वतो वह्निमान् धूमादित्यत्र अन्वयव्यतिरेकिणि धूमवत्त्वहेतौ वर्तन्ते। तथा च धूमवत्त्वं पक्षस्य पर्वतस्य धर्मः, पर्वते धूमस्य विद्यमानत्वात्। एवं सपक्षे महानसे अपि धूमस्य विद्यमानत्वात् सपक्षसत्त्वम्। एवं विपक्षे जलह्रदे व्यावृत्तिः भेदः (ह्रदे धूमस्य

अविद्यमानत्वात्) विपक्षव्यावृत्तिः। वह्निसाध्ये धूमवत्वस्य केनापि प्रमाणेन बाधितत्त्वाभावात् अबाधितविषयत्वात् अबाधितविषयत्वमप्यस्ति। एवम् असत्प्रतिपक्षत्वम् अर्थात् असन् प्रतिपक्षो यस्येति असत्प्रतिपक्षत्वं हेतुः। अर्थात् साध्याभावसाधकं हेत्वन्तरं प्रतिपक्षः, स च धूमवत्त्वे हेतौ नास्त्येव। उपलब्ध्यभावात्। एवञ्च उक्तपञ्चरूपाणि धूमवत्त्वे हेतौ विद्यन्ते, तेन एतद्धूमवत्त्वम् अग्निमत्त्वस्य साधकम् इति फलितम्।

- ❖ अग्नेः पक्षधर्मत्वं, हेतोः पक्षधर्मताबलात् सिद्ध्यति। एतावता अनुमानस्य व्याप्तिः पक्षधर्मता इति द्वे अङ्गे। तत्र व्याप्त्या साध्यसामान्यस्य सिद्धिः भवति।
- ❖ व्याप्तिर्नाम साध्यसामान्यः खलु? तेन वह्निसामान्यस्य सिद्धेः अनुमानस्य का आवश्यकता? इति प्रश्ने सति उक्तम्, द्वितीयाङ्गात् पक्षधर्मताबलात् साध्यस्य पक्षसम्बन्धित्वविशेषः सिद्ध्यति। धूमस्य पर्वते विद्यमानत्वात् वह्निरपि पर्वतसम्बद्धमेव अनुमीयते। तस्य तु प्रत्यक्षाभावाद् अनुमानमस्य आवश्यकमिति सिद्धम्।
- ❖ यत्र कुत्रापि वा अनुमाने अन्वयव्यतिरेकी हेतुः भवति सः सर्वोऽपि पञ्चरूपोपपन्न एव स्वसाध्यं साध्ययन् सद्धेतुः भवति। एकेन रूपेणापि नष्टः(निर्गतः) सः हेतुः हेत्वाभासो वा अहेतुः भवति न तु सद्धेतुरिति।

- ❖ केवलान्वयी तु चतूरूपोपपन्न एव स्वस्य साध्यं साधयति। तस्य केवलान्वयि हेतोः विपक्षाभावात्।
- ❖ केवलव्यतिरेकी अपि चतूरूपोपपन्न एव स्वस्य साध्यं साधयति। तस्य सपक्षस्य अभावात्।

(मूलम्)

**के पुनः पक्ष-सपक्ष-विपक्षाः? उच्यन्ते। सन्दिग्धसाध्यधर्मस्य धर्मी पक्षः, यथा – धूमानुमाने पर्वतः पक्षः। निश्चितसाध्यधर्मा धर्मी सपक्षः, यथा धूमानुमाने महानसः। निश्चितसाध्याभाववान् धर्मी विपक्षः, यथा धूमानुमाने महाह्रद इति। तदेवमन्वयव्यतिरेकी-केवलान्वयि-केवलव्यतिरेकिनो दर्शिताः।**

- ❖ अत्र पुनः जिज्ञासा भवति के पक्ष-सपक्ष-विपक्षा? इति। समाधानमुच्यते-

१. सन्दिग्धसाध्यधर्मस्य धर्मी पक्षः अर्थात् साध्यस्य धर्मः यत्र संशयितो वर्तते, तादृशधर्मविशिष्टधर्मी पक्ष इति। यथा – धूमानुमाने पर्वतः पक्षः।

२. निश्चितसाध्यधर्मा धर्मी सपक्षः अर्थात् यत्र साध्यस्य धर्मः निश्चितः, तादृशधर्मविशिष्टधर्मी सपक्ष इति। यथा धूमानुमाने महानसः।

३. निश्चितसाध्याभाववान् धर्मी विपक्षः अर्थात् यत्र साध्यस्य अभावः निश्चितः तादृशाभावविशिष्टधर्मी विपक्षः। यथा धूमानुमाने महाह्रदः(जलाशयः)।

एतावता अन्वय-व्यतिरेकि-केवलान्वयि-केवलव्यतिरेकिणः हेतवः प्रतिपादिताः।

व्याप्तिः

↓ ↓ ↓

अन्वयव्यापिः | व्यतिरेकव्याप्तिः
↓ | ↓
तत्सत्त्वे तत्सत्त्वम् | तदभावे तदभावः
↓ | ↓
धूमसत्त्वे वह्निसत्त्वम् | वह्न्यभावे धूमाभावः

## उपसंहारः –

पाठेऽस्मिन् अनुमानस्य द्वैविध्यम् सोदाहरणैः प्रतिपादितम्। ततः अन्वयव्याप्तेः व्यतिरेकव्याप्तेश्च लक्षणानि उदाहरणैः सह निरूपितानि। ततः परार्थानुमाने प्रयुक्ताः पञ्चावयवाः अपि लक्षण-उदाहरणैः निरूप्य अनुमित्युत्पत्तेः प्रक्रिया स्पष्टीकृता। तदनु पक्षधर्मतायाः प्रयोजनम्, त्रिप्रकारकं लिङ्गं तल्लक्षणानि च विविधोदाहरणैः प्रतिपाद्य पञ्चावयवयुक्त एव हेतुः स्वसाध्यं साधयितुं शक्यः, अन्यथा सः हेत्वाभासो भवतीति प्रतिपादितम्। ततः क्वचित् चतूरूपोपपन्न एव केवलान्वयी स्वसाध्यं साधयति तत्र विपक्षाभावात्, एवं केवलव्यतिरेकी अपि इति निरूप्य पक्ष-सपक्ष-विपक्षाणां भेदोपि सोदाहरणं निरूपितः।

## अभ्यासः

### (अ) लघूत्तरप्रश्नाः समाधानानि च।

| क्रमः | प्रश्नः | समाधानम् |
|---|---|---|
| १ | अनुमानं कतिविधम्? | द्विविधम् |
| २ | स्वार्थानुमानं किम्? | स्वस्य उपलब्धिहेतुः |

| | | |
|---|---|---|
| ३ | का नाम व्याप्तिः? | यत्र धूमस्तत्राग्निरिति साहचर्यनियमः |
| ४ | परार्थानुमानं नाम किम्? | पञ्चावयववाक्यं प्रयुज्य परं बोधयति तत्। |
| ५ | के पञ्चावयवाः? | प्रतिज्ञा-हेतु-उदाहरण-उपनय-निगमनानि |
| ६ | व्यतिरेकव्याप्तेः किं स्वरूपम्? | अन्वयव्याप्तौ यद्व्याप्यं तद-भावोऽत्र व्यापकः, यच्च व्यापकं तदभावोऽत्र व्याप्य इति। |
| ७ | अन्वय-व्यतिरेकिहेतोः उदाहरणं किम्? | वह्निमत्त्वे साध्ये धूमवत्त्वम्। |
| ८ | शब्दो अनित्यः कृतकत्वादित्यत्र कृतकत्वहेतुः कीदृशः? | अन्वय-व्यतिरेकिहेतुः। |
| ९ | केवलान्वयिहेतोः लक्षणं किम्? | अन्वयमात्रव्याप्तिकम्। |
| १० | पृथिवी इतरभिन्ना गन्धवत्त्वादित्यत्र व्याप्तिः कथम्? | यदितरेभ्यो न भिद्यते न तद् गन्धवदिति व्यतिरेकव्याप्तिः। |

| | | |
|---|---|---|
| ११ | केवलान्वयिहेतौ कस्य अभावो भवति? | व्यतिरेकदृष्टान्तस्य अभावो भवति। |
| १२ | हेतोः पञ्चरूपाणि कानि? | पक्षसत्त्व-सपक्षसत्त्व-विपक्षासत्त्व-अबाधितत्त्व-असत्प्रतिपक्षत्वानि। |
| १३ | पञ्चरूपोपपन्नः हेतुः क उच्यते? | अन्वय-व्यतिरेकीत्युच्यते। |
| १४ | हेतोः पक्षधर्मत्वं कथं सिद्ध्यति? | पक्षधर्मताबलात्। |
| १५ | पक्षधर्मताबलात् किं सिद्ध्यति? | साध्यस्य पक्षसम्बन्धित्वं विशेषः सिद्ध्यति। |
| १६ | विपक्षाभावहेतुः कः? | केवलान्वयी हेतुः। |
| १७ | सपक्षाभावहेतुः कः? | केवलव्यतिरेकिहेतुः। |
| १८ | सन्दिग्धसाध्यधर्मा धर्मी कः? | पक्षः |
| १९ | निश्चितसाध्याभाववान् धर्मी कः? | विपक्षः |
| २० | कः सपक्षः? | निश्चितसाध्यवान् धर्मी |
| २१ | धूमानुमाने विपक्षस्योदाहरणं किम्? | जलह्रदः |

| | | |
|---|---|---|
| २२ | धूमानुमाने पक्षस्योदाहरणं किम्? | पर्वतः |
| २३ | व्याप्तिज्ञानात् कस्य सिद्धिः भवति? | साध्यसामान्यस्य सिद्धिर्भवति |
| २४ | का नाम अन्वयव्याप्तिः? | यत्र यत्र धूमवत्त्वं तत्र तत्राग्नि-मत्त्व यथा महानस इति |
| २५ | का नाम व्यतिरेकव्याप्तिः? | यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति यथा महाह्रद इति। |

(आ) योग्यं विकल्पं योजयत।

| | | | | |
|---|---|---|---|---|
| १ | तस्मात्तथा | (क) | प्रतिज्ञा | १ |
| २ | धूमवत्त्वात् | (ख) | उपनयः | ४ |
| ३ | तथा चायम् | (ग) | हेतुः | ३ |
| ४ | पर्वतो वह्निमान् | (घ) | उदाहरणम् | २ |
| ५ | यो यो धूमवान् ससोऽग्निमान् | (ङ) | निगमनम् | १ |

(इ) व्याख्यात्मकाः प्रश्नाः।

१ पञ्चावयवाः सोदाहरणं व्याख्यात।

२ स्वार्थानुमान-परार्थानुमानयोः भेदं व्याख्यात।

३ केवलान्वयिहेतुं व्याख्यात।

४ केवलव्यतिरेकिहेतुं सोदाहरणं व्याख्यात।

५ अन्वयव्यतिरेकौ व्याख्यात।

(ई) निबन्धात्मकाः प्रश्नाः।

१ भेदसहितानुमानं सोदाहरणं प्रतिपादयत।

२ लिङ्गभेदान् सोदाहरणं विशदीकुर्वन्तु।

*****

# पाठ - ८

## हेत्वाभासाः

**प्रस्तावना –**

पूर्वपाठे अनुमानस्य सामान्यतः सद्धेतूनां स्वरूपं निरूपितम्। सद्धेतव इव असद्धेतवोऽपि तत्त्वनिर्णयविजयप्रयोजकत्वात् निरूपनीया इति विचिन्त्य सम्प्रति प्रसङ्गप्राप्ताः हेत्वाभासाः विविच्यन्ते।

### ८.१ हेत्वाभासपरिचयः –

हेत्वाभासाः

- असिद्धः
  - आश्रयासिद्धः
  - स्वरूपासिद्धः
  - व्याप्यत्वासिद्धः
    - व्याप्तिग्राहकप्रमाणाभावात्
    - उपाधिसद्भावात्
- विरुद्धः
- अनैकान्तिकः
- प्रकरणसमः
  - साधारणः
  - असाधारणः
- कालात्ययापदिष्टः

(मूलम्)

**अतोन्ये हेत्वाभासाः। ते च असिद्ध-विरुद्ध-अनैकान्तिक-प्रकरणसम-कालात्ययापदिष्ट-भेदात् पञ्चैव।**

ते च हेत्वाभासाः पञ्चविधाः, १. असिद्धः, २. विरुद्धः, ३. अनैकान्तिकः, ४. प्रकरणसमः (सत्प्रतिपक्षः), ५. कालातीतः (बाधितः) इति। हेतुवत् आभासन्त इति हेत्वाभासाः, दुष्टहेतव इत्यर्थः। दोषाः के इति जिज्ञासायां, **असिद्धिः विरोधः व्यभिचारः प्रकरणसमता कालात्ययापदिष्टनामकाः** दोषा अपि पञ्च। ईदृशदोषैः विशिष्टाः हेतवः दुष्टहेतव इत्युच्यन्ते। दोषलक्षणं किम्? इति चेत्, यद्विषयकज्ञानम् अनुमितिं तत्कारणीभूतं व्याप्तिज्ञानं परामर्शं वा प्रतिबध्नाति तत्त्वं दोषसामान्यलक्षणम्। तत्र बाधसत्प्रतिपक्षयोः साक्षात् अनुमितिप्रतिबन्धकत्वम्, इतरेषां त्रयाणां तु परामर्शप्रतिबन्धकत्वम्। एवम् अनुमितिप्रतिबन्धनेन परामर्शप्रतिबन्धनात् च एते पञ्च दुष्टहेतव इत्युच्यन्ते।

(मूलम्)

**लिङ्गत्वेनासिद्धो हेतुः असिद्धः। तत्रासिद्धस्त्रिविधः। आश्रयासिद्धः स्वरूपासिद्धः, व्याप्यत्वासिद्धश्चेति। आश्रयासिद्धो यथा गगनारविन्दं**

सुरभि, अरविन्दत्वात्, सरोजारविन्दवत्। अत्र गगनारविन्दमाश्रयः स च नास्त्येव। स्वरूपासिद्धो यथा – शब्दो अनित्यः चाक्षुषत्वात्, घटवत्। अत्र चाक्षुषत्वं हेतुः, स च शब्दे नास्त्येव, तस्य श्रावणत्वात्।

व्याप्यत्वासिद्धस्तु द्विविधः, एको व्याप्तिग्रहप्रमाणाभावात्। अपरस्तु उपाधिसद्भावात्। तत्र प्रथमो यथा- शब्दः क्षणिकः सत्त्वात्। यत् सत् तत् क्षणिकं यथा जलधरपटलं तथा च शब्दादिरिति। न च सत्त्वक्षणिकत्वयोः व्याप्तिग्राहकं प्रमाणमस्ति। सोपाधिकतया व्याप्यत्वासिद्धौ उच्यमानायां क्षणिकत्वम् अन्यप्रयुक्तमित्यभ्युपगतं स्यात्।

द्वितीयो यथा क्रत्वन्तर्वर्तिनी हिंसा अधर्मसाधानं, हिंसात्वात्, क्रतुबाह्यहिंसावत्। अत्र ह्यधर्मसाधनत्वे हिंसात्वं न प्रयोजकम्, किन्तु निषिद्धत्वमेव प्रयोजकम्, उपाधिरिति यावत्। तथा हि `साध्यव्यापकत्वे सति साधनाऽव्यापकम्' उपाधिरित्युपाधिलक्षणम्। तच्चास्ति निषिद्धत्वे। निषिद्धत्वं हि साध्यस्याधर्मसाधनत्वस्य व्यापकम्। यतो यत्र यत्र अधर्मसाधनत्वं तत्र तत्रावश्यं निषिद्धत्वमपीति। एवं साधनं हिंसात्वं, न व्याप्नोति निषिद्धत्वम्। न हि यत्र यत्र हिंसात्वं तत्र तत्रावश्यं निषिद्धत्वं, यज्ञीयपशुहिंसायाः निषिद्धत्वाभावात्। तदेवं निषिद्धत्वस्योपाधेः सद्भावादन्यप्रयुक्तव्याप्त्युपजीवि-हिंसात्वं व्यप्यत्वासिद्धमेव।

## ८.१. असिद्धः –

लिङ्गत्वेन अनिश्चितो हेतुः असिद्ध इत्युच्यते। स च असिद्धः त्रिविधः-

१. आश्रयासिद्धः, २. स्वरूपासिद्धः, ३. व्याप्यत्वासिद्धश्च इति।

❖ तत्र आश्रयासिद्धो नाम पक्षे पक्षतावच्छेदकस्य धर्मस्य अभाव आश्रयासिद्धिः, तद्विशिष्टो हेतुः आश्रयासिद्धः। यथा – 'गगनारविन्दं सुरभि अरविन्दत्वात्', सरोजारविन्दवत् इति। उदाहरणेऽस्मिन् पक्षः गगनारविन्दं यद्यपि तत्र अरविन्दं प्रसिद्धं तथापि गगनीयत्वस्य अभावात् गगनारविन्दस्य आश्रयः किमपि प्रसिद्धो नास्तीत्यतः अत्र आश्रयासिद्धिदोषो वर्तते।

❖ स्वरूपासिद्धो नाम व्याप्यत्वेन अभिमतहेतोः पक्षे अवृत्तित्वं स्वरूपासिद्धिः, तद्विशिष्टो स्वरूपासिद्धः। यथा- 'शब्दो अनित्यः चाक्षुषत्वात्' इति। अत्र शब्दः पक्षः, अनित्यत्वं साध्यम्, चाक्षुषत्वं नाम चक्षुरिन्द्रियजन्यप्रत्यक्षविषयत्वं हेतुः। तस्य शब्दरूपपक्षे वृत्तित्वं नास्ति। शब्दे श्रवणेन्द्रियजन्य-प्रत्यक्षविषयत्वरूपस्य श्रावणत्वस्य विद्यमानत्वात्। तादृशहेतोः पक्षे अवृत्तित्वात् अत्र स्वरूपासिद्धिदोषो वर्तते।

❖ व्याप्यत्वासिद्धो नाम उपाधिसहितः हेतुः व्याप्यत्वासिद्धः। स च द्विविधः – १. व्याप्तिग्राहकप्रमाणाभावात् एकः, २. उपाधिसद्भावाच्च। तत्र प्रथमस्य उदाहरणं यथा – 'शब्दः क्षणिकः सत्त्वात्', जलधरपटलवत्। अत्र शब्दः पक्षः, क्षणिकत्वं साध्यम्, सत्त्वं हेतुः। जलधरपटलं अर्थात् मेघः, यथा मेघः क्षणिको भवति तथा पदार्था अपि क्षणिकाः इति बौद्धानां मतम्, यत्सत् तत्क्षणिकम् इति। तथापि सत्त्व-क्षणिकत्वयोः व्याप्तिग्राहकस्य प्रमाणस्य अभावात् सत्त्वहेतुना पदार्थानां क्षणिकत्वं न सिद्ध्यतीति अत्र सत्त्वहेतुः व्याप्यत्वासिद्ध इति प्रथमप्रकारस्य निदर्शनं वर्तते।

❖ उपाधिसद्भावाच्चेति सोपाधिकव्याप्यत्वासिद्धस्य द्वितीयस्य उदाहरणं यथा – 'क्रत्वन्तरवर्तिनी हिंसा अधर्मसाधनं हिंसात्वात्', क्रतुबाह्यहिंसावत् इत्यत्र पक्षः – क्रत्वन्तर्वर्तिनी हिंसा, साध्यः – अधर्मसाधनत्वम्, हेतुः हिंसात्वमिति, क्रतुबाह्यहिंसावदिति उदाहरणम्। अधर्मसाधनत्वरूपसाध्य-सिद्धये प्रयुक्तः हिंसात्वहेतुः प्रयोजको नास्ति अपि तु निषिद्धत्वमेव अत्र प्रयोजकम् उपाधिरिति। तथा हि उपाधिर्नाम साध्यव्यापकत्वे सति साधनाऽव्यापकत्वम् उपाधिः। तच्च उपाधिः निषिद्धत्वे वर्तते। निषिद्धत्वं हि साध्यस्य अधर्मसाधनत्वस्य व्यापकम्, यतो हि यत्र यत्र अधर्मसाधनत्वं तत्र तत्र अवश्यं निषिद्धत्वम् अस्तीत्यतः। एवं साधनं हिंसात्वं न व्याप्नोति

निषिद्धत्वम्। यथा – यत्र यत्र हिंसात्वं तत्र तत्र अवश्यं निषिद्धत्वमिति नास्ति , यज्ञीयपशुहिंसायाः निषिद्धत्व- अभावात् इति। एवं च निषिद्धत्वस्य उपाधेः सद्भावात् हिंसात्वहेतुः उपाधिसहितत्वात् व्याप्यत्वासिद्धो जात इत्यर्थः।

(मूलम्)

**साध्यविपर्ययव्याप्तो हेतुः विरुद्धः। स यथा शब्दो नित्यः, कृतकत्वात्, आत्मवत्। अत्र कृतकत्वं हि साध्यनित्यत्वविपरीतानित्यत्वेन व्याप्तम्। यत्कृतकं तदनित्यमेव, न नित्यमित्यतो, विरुद्धं कृतकत्वमिति।**

८.१.२ विरुद्धः –

साध्यविपर्ययव्याप्तो हेतुः विरुद्धः अर्थात् साध्याभावव्याप्तत्वं विरुद्धस्य लक्षणम् इति। यथा- 'शब्दो नित्यः कृतकत्वादि'त्यत्र शब्दः- पक्षः, नित्यत्वं- साध्यम्, कृतकत्वं हेतुः। कृतकत्वं नाम कर्तृजन्यत्वम्। तच्च कृतकत्वं नित्यत्वाभावस्य अनित्यत्वस्य व्याप्यं साधकम्। यत् कृतकं तत् अनित्यमेव, न तु नित्यमित्यतः विरुद्धः कृतकत्वहेतुः।

(मूलम्)

सव्यभिचारोऽनैकान्तिकः। स द्विविधः, साधारणानैकान्तिको असाधारणा-नैकान्तिकश्चेति। तत्र पक्षसपक्षविपक्षवृत्तिः साधारणः। यथा- 'शब्दो नित्यः, प्रमेयत्वात्', व्योमवत्। अत्र हि प्रमेयत्वं हेतुः तच्च नित्यानित्यवृत्ति। सपक्षाद्विपक्षाद्व्यावृत्तो यः पक्षे एव वर्तते सो असाधारणानैकान्तिकः। स यथा भूर्नित्या, गन्धवत्त्वात्। गन्धवत्त्वं हि सपक्षान्नित्यात् विपक्षाच्चानित्याद् व्यावृत्तं भूमात्रवृत्ति।

८.१.३ अनैकान्तिकः –

सव्यभिचार एव अनैकान्तिकः, अर्थात् साधारणा-साधारणाद्यन्यतमः। स च द्विविधः – I. साधारणानैकान्तिकः, II. असाधारणानैकान्तिकश्च।

तत्र साधारणो नाम पक्ष-सपक्ष-विपक्षवृत्तिः। यथा- 'शब्दो नित्यः प्रमेयत्वात्', व्योमवदिति। अत्र शब्दः पक्षः, नित्यत्वं साध्यम्, प्रमेयत्वं हेतुः, व्योमवदित्युदाहरणम्। प्रमेयत्वं नाम प्रमाविषयत्वम्, तस्य प्रमेयत्वस्य साध्याधिकरणे नित्ये साध्याभावाधिकरणे अनित्ये च वृत्तित्वेन साधारणत्वम्। अर्थात् यः हेतुः साध्याधिकरणेऽपि भवति तथा

साध्याभावाधिकरणेऽपि भवति तर्हि सः हेतुः साधारण-अनैकान्तिकदोषग्रस्त इति।

असाधारणो नाम सपक्षाद् विपक्षाद् व्यावृत्तः पक्षमात्र वृत्तिः। अर्थात् यः हेतुः सपक्षेऽपि न भवति विपक्षेऽपि न भवति अपि तु केवलं पक्षे एव तिष्ठति सः असाधारण-अनैकान्तिकः। यथा – 'भूर्नित्या गन्धवत्त्वात्' इत्यत्र भू पक्षः, नित्यत्वं साध्यम्, गन्धवत्त्वं हेतुः। गन्धवत्त्वं नाम गन्धसमवायिकारणवत्त्वम् तत् सपक्षनित्यत्वाधिकरणेषु आकाशादिषु अविद्यमानत्वात्, अनित्यत्वाधिकरणेषु जलादिष्वपि अविद्यमानत्वात् केवलं पक्ष-भूमिमात्रवृत्तित्वात् अयम् असाधारणः अनैकान्तिकदोषग्रस्त इति।

(मूलम्)

**प्रकरणसमस्तु स एव यस्य हेतोः साध्यविपरीतसाधकं हेत्वन्तरं विद्यते। यथा शब्दो अनित्यो नित्यधर्मरहितत्वात्, शब्दो नित्यो अनित्यधर्मरहितत्वादिति। अयमेव हि सत्प्रतिपक्ष इति चोच्यते।**

### ८.१.४ प्रकरणसमः- स एव सत्प्रतिपक्षः –

प्रकरणसमो नाम यस्मात् प्रकरणचिन्ता स निर्णयार्थं प्रयुक्तः सः। अर्थात् यस्मात् हेतोः स्वसाध्यस्य विपरीतार्थस्य साधकस्य हेत्वन्तरस्य चिन्ता निर्णयार्थं- स्वसाध्यसिद्ध्यर्थं प्रयुक्तः स हेतुः प्रकरणसमः सत्प्रतिपक्षो वा इत्युच्यते। यथा – 'शब्दो अनित्यः नित्यधर्मरहितत्वात्' इत्यत्र शब्दः पक्षः, साध्यः अनित्यत्वम्, हेतुः नित्यधर्मरहितत्त्वम्। अत्र शब्दे नित्यधर्मरहितत्वेन हेतुना अनित्यत्वं साध्यते, तत्रैव साध्यविपरीतस्य हेत्वन्तरेण अनित्यधर्मरहितत्वेन हेतुना च शब्दे नित्यत्वं साध्यते तत्र प्रकरणसमदर्शनाद्दोष इति।

(मूलम्)

**पक्षे प्रमाणान्तरावधृतसाध्याभावो हेतुर्बाधितविषयः। कालात्ययापदिष्ट इति चोच्यते। यथा अग्निरनुष्णः कृतकत्वाज्जलवत्। अत्र हि कृतकत्वस्य हेतोः साध्यमनुष्णत्वं तदभावः प्रत्यक्षेणैवावधारितः स्पार्शनप्रत्यक्षेणैवोष्णत्वो-पलम्भात्।**

### ८.१.५. कालात्ययापदिष्टः स एव बाधितः –

कालात्ययापदिष्टो नाम पक्षे प्रमाणान्तरेण अवधृतसाध्याभावो हेतुः सः। अर्थात् पक्षे प्रमाणान्तरेण अन्यप्रमाणेन गृहीतः साध्याभावो यस्य सः बाधितः। यथा – 'अग्निः अनुष्णः कृतकत्वाज्जलवदि'त्यत्र अग्निः पक्षः, अनुष्णत्वं साध्यम्, कृतकत्वं हेतुः, जलवदित्युदाहरणम्। अत्र अग्नौ अनुमानप्रमाणान्तरेण स्पार्शन-प्रत्यक्षजनक-त्वगिन्द्रियेण साध्याभावरूपम् उष्णत्वं गृह्यते, तेन कृतकत्वहेतुः बाधित इति।

एवं प्रकारेण सङ्गत्या प्राप्ताः हेत्वाभासाः भेदसहितं सोदाहरणञ्च स्पष्टं निरूपिताः। ईदृशदोषैरसंस्पृष्टाः हेतवः स्वसाध्यं साधयितुं शक्नुवन्तीत्यनेन फलितं भवति।

### ८.२ अनुमानस्य आवश्यकता –

वस्तुतः चार्वाकान् त्यक्त्वा अनुमानप्रमाणं सर्वेऽपि दार्शनिकाः अङ्गीकुर्वन्ति। अनुमानप्रमाणं विना परपुरुषगत-अज्ञान-सन्देह-विपर्ययादिज्ञानं भवितुं नार्हति। अतः चार्वाकैरपि अनिच्छयापि अनुमानं मन्तव्यमेव भवति। तथा यद्वस्तु प्रत्यक्षं नास्ति तस्य अस्तित्वमपि न मन्यते। एवं सति चार्वाकः किमपि कार्यवशात् गृहाद्बहिर्निर्गते सति स्वपरिवारस्य अप्रत्यक्षत्वात् तेषामभावो मन्येत। तथाऽस्वीकारादपि

अनुमानं मन्तव्यमेव। अनुमानेन ज्ञानं स्पष्टं दृढञ्च भवति। अनुमानं विना स्वर्गादयः नोपलभ्येत। स्वात्म तु प्रत्यक्षेण गृह्यते, किन्तु अनुमानं विना परात्मापि नोपलभ्येत।

## ८.३ अनुमाननिरूपणे अन्यदर्शनेषु भेदः –

दार्शनिकजगति अनुमानप्रमाणस्य मुख्यत्वेन परम्परात्रयी दरीदृश्यते। तत्रैका **वैदिकपरम्परा** द्वितीया **बौद्धपरम्परा** तृतीया **नव्यन्यायपरम्परा** च। तत्र वैदिकपरम्परायां पुनः वैशेषिक-मीमांसकविचारधारायाम् अनुमानस्य भेदद्वयं प्रतिपादितम्। तद्यथा – तत्तु द्विविधम्। **'प्रत्यक्षतो दृष्टसम्बन्धं सामान्यतोदृष्टसम्बन्धञ्चे'**ति शाबरभाष्ये प्रतिपादितम्। तत्तु द्विविधम्। **'दृष्टं सामान्यतो दृष्टं च'** इति प्रशस्तपादभाष्ये च प्रतिपादितम्। तथा न्याय-सांख्य-चरकादिविचारधारायाम् अनुमानस्य त्रैविध्यं प्रतिपादितम्। तद्यथा – **'अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेशवत्सामान्यतो दृष्टं च'** इति न्यायसूत्रे प्रतिपादतम्। **'त्रिविधमनुमानमाख्यातम्'** इति साङ्ख्यकारिकायां, **'प्रत्यक्षपूर्वं त्रिविधं त्रिकालं चानुमीयते'** इति चरकसूत्रस्थाने च प्रतिपादितम्।

बौद्धपरम्परायामपि पुनः अनुमानस्य धाराद्वयी दृश्यते, दिङ्नागात् पूर्वबौद्धैः वैदिकपरम्परानुसारम् अनुमानत्रैविध्यमेव स्वीकृतम्, तदनु

दिङ्नागेन वैदिकपरम्परातः भिन्नतया अनुमानस्य लक्षणभेदाः प्रतिपादिताः। नव्यन्यायपरम्पारायां पुनः अनुमानस्य वैशेषिकदर्शनानुसारं स्वार्थानुमान-परार्थानुमानमिति द्वैविध्यं प्रतिपादितम्। प्रकृत-तर्कभाषाग्रन्थे पुनः न्यायदर्शनानुसारं त्रैविध्यं प्रतिपादितम्।

## ८.४ अनुमानप्रमाणस्य उपसंहारः –

एतावता प्रबन्धेन प्रमाणनिरूपणावसरे प्रत्यक्षप्रमाणनिरूपणानन्तरं क्रमप्राप्तम् अनुमानप्रमाणं लक्षण-भेदोदाहरणैः निरूप्य सोदाहरणं दुष्टहेतून्निरूप्य, प्रमानिरूपणे अनुमानप्रमाणस्य आवश्यकताम्, विभिन्नदर्शनेषु अनुमानस्य वैविध्यञ्च विशदतया प्रतिपादितम्।

## अभ्यासः

### (आ) लघूत्तरप्रश्नाः समाधानानि च।

| क्रमः | प्रश्नः | समाधानम् |
|---|---|---|
| १ | हेत्वाभासशब्दस्य का व्युत्पत्तिः? | हेतुवत् आभासन्त इति। |
| २ | हेत्वाभासाः कति? | पञ्च |

| | | |
|---|---|---|
| ३ | हेत्वाभाससामान्यलक्षणं किम्? | यद्विषयकज्ञानम् अनुमितिं तत्कारणीभूतं व्याप्तिज्ञानं परामर्शं वा प्रतिबध्नाति तत्त्वं दोषसामान्यलक्षणम्। |
| ४ | के दोषाः? | असिद्धि-विरोध-व्यभिचार-प्रकरणसमता-कालात्ययापदिष्टता च। |
| ५ | असिद्धः कः? | लिङ्गत्वेनानिश्चितो हेतुः |
| ६ | असिद्धभेदाः के? | आश्रयासिद्ध-स्वरूपासिद्ध-व्याप्यत्वासिद्धाः। |
| ७ | शब्दो अनित्यः चाक्षुषत्वादित्यत्र कः दोषः? | स्वरूपासिद्धिः। |
| ८ | अधर्मसाधनत्वे प्रयोजकं किम्? | निषिद्धत्वम्। |
| ९ | विरुद्धस्योदाहरणं किम्? | शब्दो नित्यः कृतकत्वात्। |
| १० | पक्ष-सपक्ष-विपक्षवृत्तिः कीदृशोऽनैकान्तिकः? | साधारणोऽनैकान्तिकः |
| ११ | असाधारणोऽनैकान्तिकः क उच्यते? | सपक्षाद्विपक्षाद्व्यावृत्तः पक्षमात्रवृत्तिः। |

| | | |
|---|---|---|
| १२ | प्रकरणसमस्यापरं नाम किम्? | सत्प्रतिपक्षः |
| १३ | कालात्ययापदिष्टपदस्य पर्यायपदं किम्? | बाधः । |
| १४ | कालात्ययापदिष्टः कः? | पक्षे प्रमाणान्तरेण अवधृतसाध्याभावो हेतुः सः । |
| १५ | अग्निरनुष्णः कृतकत्वादित्यत्र को दोषः? | बाधः |
| १६ | अग्नौ उष्णत्वं केन प्रमाणेन गृह्यते? | स्पार्शनप्रत्यक्षप्रमाणेन । |
| १७ | यत् सत् तत्क्षणिकमिति मतं कस्य? | बौद्धस्य |
| १८ | को नाम उपाधिः? | साध्यव्यापकत्वे सति साधनाव्यापकत्वम् उपाधिः । |
| १९ | अनैकान्तिकः कतिविधः? | द्विविधः, साधारणासाधारणभेदात् । |
| २० | कः प्रकरणसमः? | यस्मात् प्रकरणचिन्ता स निर्णयार्थं प्रयुक्तः सः । |

(आ) योग्यं विकल्पं योजयत।

| | | | |
|---|---|---|---|
| १ | असिद्धः | शब्दो नित्यः कृतकत्वात् | ४ |
| २ | विरुद्धः | शब्दो नित्यः प्रमेयत्वात् | ३ |
| ३ | अनैकान्तिकः | शब्दो अनित्यः नित्यधर्मकत्वात् | २ |
| ४ | प्रकरणसमः | अग्निरनुष्णः कृतकत्वात् | ५ |
| ५ | कालात्ययापदिष्टः | गगनारविन्दं सुरभि अरविन्दत्वात् | १ |

(इ) व्याख्यात्मकाः प्रश्नाः।

१ असिद्धहेत्वाभासं सोदाहरणं व्याख्यात।

२ अनैकान्तिकहेत्वाभासं लक्षणोदाहरणैः व्याख्यात।

३ अनुमानप्रमाणस्य हेत्वाभासानाञ्च निरूपणावश्यकतां व्याख्यात।

४ सोदाहरणं व्याप्यत्वासिद्धिं व्याख्यात।

५ अन्यदर्शनोक्तानुमानभेदाः व्याख्यात।

(ई) **निबन्धात्मकाः प्रश्नाः।**

१ पञ्चहेत्वाभासानां दुष्टत्वं सोदाहरणं प्रतिपादयत।

२ पञ्चहेत्वाभान् सोदाहरणं विशदीकुर्वन्तु।

(उ) **परियोजना**

१. साम्प्रतयुगे अनुमानप्रमाणस्यावश्यकता अनुमित्युत्पत्युपायाश्च।
२. सद्धेतु-असद्धेतुनिरूपणे युक्तयः, प्रयोजनञ्च।
३. अनुमित्युत्पत्तौ प्रक्रिया।
४. अनुमित्युत्पत्तौ परामर्शस्वरूपं प्रयोजनञ्च

*****

# पाठ-९

## उपमानखण्डः

➢ उपमानप्रमाणम्

**प्रस्तावना -**

प्रत्यक्षानुमानप्रमाणयोः प्रतिपादनानन्तरं न्यायदर्शनाभिमतं तृतीयं प्रमाणम् उपमानप्रमाणं निरूपयति।

अत्र जिज्ञासा उदेति यत् प्रत्यक्षानुमानप्रमाणानन्तरम् एव कथम् उपमानप्रमाणस्य निरूपणम्? कथं ताभ्यां प्राक् निरूपणं न कृतम्? तस्य उत्तरम् एव यद् उपमान-प्रमाणस्य आधारभुतं प्रत्यक्षमेव अस्ति। यथा गोसदृशो गवयः इत्यस्मिन् अतिदेशवाये श्रोतुः प्रथमं गोः ज्ञानं आवश्यकम्। अर्थाद् येन प्राक् गोः प्रत्यक्षं कृतम्, स एव गवयपदार्थं ज्ञातुं शक्नोति तस्माद् उपमानात् प्राक् प्रत्यक्षप्रमाणनिरूपणं नितराम् अपेक्ष्यते।

अनुमानप्रमाणस्य तु उपमानप्रमाणनिरूपणात् प्राक् निरूपणे हेतुः वर्तते उपमानापेक्षया अनुमानप्रामाण्ये विवादः अल्पीयान्। अनुमानप्रमाणेन मनुष्यः अनन्तान् पदार्थान् ज्ञातुं शक्नोति उपमानेन तु

न तथा। अत: लोके उपमानापेक्षया अनुमानस्य उपयोगिता अधिका वर्तते तस्मात् मनुष्य: पूर्वम् अनुमानप्रमाणम् एव जिज्ञासते तस्माद् तस्य पूर्वनिरूपणम् उचितम्।

(मूलम्)

**अतिदेशवाक्यार्थस्मरणसहकृतं गोसादृश्यविशिष्टपिण्डज्ञानमुपमानम्। यथा गवयमजानन्नपि नागरिको "यथा गौस्तथा गवय" इति वाक्यं कुतश्चिदारण्यकात् पुरुषात् श्रुत्वा वनं गतो वाक्यार्थं स्मरन् यदा गोसादृश्यविशिष्टं पिण्डं पश्यति तदा तद्वाक्यार्थस्मरणसहकृतं गोसादृश्यविशिष्टपिण्डज्ञानम् उपमानम् उपमितिकरणत्वात्। गोसादृश्यविशिष्ट-पिण्डज्ञानानन्तरम् "अयम् असौ गवयशब्दवाच्यः पिण्डः" इति संज्ञासंज्ञिसम्बन्धप्रतीतिः उपमितिः। सैव फलम्। इदन्तु प्रत्यक्षानुमानासाध्यप्रमासाधकत्वात् प्रमाणान्तरमुपमानमस्ति। इति व्याख्यातमुपमानम्**

## ९.१ उपमानस्वरूपम्

अतिदेशवाक्यार्थस्मरणसहकृतं सादृश्यविशिष्टपिण्डज्ञानम् उपमानम्। इति मूलकार: केशवमिश्र: उपमानस्य स्वरूपं दर्शयति।

विस्तरेण च उपमानस्य स्वरूपं ज्ञास्यामः। व्याख्यावसरे व्युत्पत्तिः अपि ज्ञातव्या–अतः उपमीयते अनेन तत्–उपमानम्–अर्थात् येन–उपमा दीयते। अत्र गोः सादृश्यं पिण्डे वर्तते, गोः उपमा-गवये पदार्थे दीयते। अतः गोसादृश्ययुक्तपिण्डज्ञानम्–उपमानम् इति अग्रे स्फुटीभविष्यति।

➢ **अतिदेशवाक्येति**

''अतिदिश्यते-प्रतिपाद्यते अनेन साधर्म्यादिः'' इति अतिदेशः। पदार्थेषु धर्माणां विद्यमानानां यत् साम्य-समानता-सूचकं वाक्यं भवति-अतिदेशवाक्यम्। अथवा एकत्र श्रुतस्य अन्यत्र सम्बन्धः, अन्य धर्मस्य अन्यत्र आरोपणम् इति सर्वलक्षणसंग्रहे। अर्थात् येन वाक्येन एक पदार्थस्य धर्मस्य अपरपदार्थेन सहसम्बन्धः, निरूप्यते तदा तत् वाक्यं "अतिदेशवाक्यम्" इति उच्यते-तथा हि "यथा गोः तथा गवयः" अर्थात् यादृशी गोः तादृशी नीलगोः भवति, इदं वाक्यं गोः गवयस्य च सादृश्यं प्रवक्ष्यति। अतः इदम् एव अतिदेशवाक्यम् उच्यते।

उपमानप्रमाणस्य-आधारभूतं इदमेव वाक्यम्भवति। यतो हि अतिदेशवाक्यार्थस्य स्मरणमात्रेण गोसादृश्यविशिष्टपिण्डम् शरीराकृतिं पश्यति तदा गवयपशुं जानाति, गोसादृश्यं साक्षात् दृष्ट्वा एव सः अनुमिनोति यत् अयमेव गवयपदार्थ इति।

न्यायबोधिनी बोधयति यत् –

उपमानं नाम=अति देशवाक्यार्थज्ञानम्। अतिदेशवाक्यार्थस्मरणं=व्यापार:। उपमिति: = फलम् 'गोसदृशो गवयपदवाच्य' इत्याकारकवाक्यात् गोसादृश्यावच्छिन्नविशेष्यकं गवयपदवाच्यत्वप्रकारकं-यज्ज्ञानं जायते तदेव करणम्, उपमिते: करणम् एव उपमानम्।

➢ उपमानस्य त्रैविध्यम् -

पदकृत्यव्याख्याकार: चन्द्रजसिंह: स्वमतेन उपमानप्रमाणस्य प्रकारत्रयं दर्शयति यथा तच्चोपमानं त्रिविधं – सादृश्यविशिष्टपिण्डज्ञानम् असाधारणधर्मविशिष्टपिण्डज्ञानम्, वैधर्म्यविशिष्टपिण्डज्ञानस्य तत्राऽऽद्यमुक्तमेव। द्वितीयं यथा 'खड्गमृग: कीदृग्? इति पृष्टे नासिकालसदेकश्रृङ्गोऽनतिक्रान्त-गजाकृतिकश्चेति तज्ज्ञातृभ्य: श्रुत्वा कालान्तरे तादृशं पिण्डं पश्यन् अतिदेशवाक्यार्थं स्मरति, तदनन्तरं खड्गमृगो खड्गमृगपदवाच्य' इत्युपमितिरुत्पद्यते।

अत्र नासिकालसदेकश्रृंङग एव असाधारणधर्म:। तृतियो यथा 'उष्ट्रः कीदृग्' इति पृष्टे अश्वादिवदसमानपृष्ठो न ह्रुस्वगिवशरीरश्चेति आप्तोक्तो कालान्तरे तत्पिण्डर्शनाद् वैधर्म्यविशिष्टपिण्डज्ञानं,

ततोऽतिदेशवाक्यार्थस्मरणं, तत 'उष्ट्र उष्टपदवाच्य' इत्युपमितित्पद्यते। इत्थम् उपमानस्य स्वरुपम् अस्ति।

## २) उपमानप्रक्रिया

उपमानप्रमाणस्य प्रक्रिया नाम उपमितिपर्यन्तं कया रीत्या पद्धत्या वा उपमानप्रमाणस्य सोपानानि भवन्ति इति।

तर्कभाषाकार: केशवमिश्र: लिखति यत्-

गवयम् अजानन् अपि नागरिको 'यथा गोस्तथा गवय' इति वाक्यं कुतश्चिद् आरण्यकात् पुरुषात् श्रुत्वा वनं गतो वाक्यार्थ स्मरन् यदा गोसादृश्यं पिण्डं पश्यति तदा तद्वाक्यार्थस्मरणसहकृतं गोसादृश्यलृविशिशष्टपिण्डज्ञानम् उपमानम् उपमितिकरणत्वात्। अस्य भावार्थं सारल्यञ्च इत्थम् अस्ति, गवयनामकं पशुं न दृष्टवान् कदापि न जानाति यो नागरिक: मनुष्य: स: कदाचित् अरण्यं विहारार्थं गच्छति, प्राणिसृष्टिम् अवगन्तुं वा गच्छति तदा तत्रस्थं ग्रामीणजनं स: पृच्छति; भो: भ्रात: गवय: पशु: किदृश: भवति? कृपया भवान् बोधयतु इति।

स: आरण्यक: ग्राम्यजन: परं प्रति बोधयितुं कथयति यत् 'यथा गोस्तथा गवय:' (इदमतिदेशवाक्यम्) इदं वाक्यं गवयस्य गवा सह

सादृश्यं व्यनक्ति। इदं वाक्यं श्रुत्वा नागरिक: अरण्यं गच्छति तत्र च गत्वा सदृशं पशुं पिण्डं वा पश्यति, दृष्ट्वा ग्रामीणजनकथित-वाक्यस्यार्थस्य स्मरणं भवति-यत् 'यथा गौस्तथा गवय:'। तत्पश्चात् तस्य निश्चयो भवति, बुद्धौ निर्णय: भवति यत् 'यथा गौस्तथा गवय:' यथा गौ: तथा नील गौ: पशुविशेष: लोकभाषायां नील गाय इति।

**उपमानप्रक्रिया: त्रय: अवयवा:।**

१. गोसदृशपशुविशेषस्य – प्रत्यक्षज्ञानम्।

२. अतिदेशवाक्यार्थस्य स्मरणम्।

३. गोसदृश: पशुविशेष:। अर्थात् अयं पशुविशेष: गवयशब्दस्य वाच्यार्थ: इति ज्ञानम्। तर्कभाषाकार: प्रथमं द्वितीयञ्चावयवं उपमानप्रमाणम् अस्ति इति बोधयति।

तृतीयम् अवयवं "उपमिति:" इति ज्ञापयति।

इदम् एव उपमानप्रमाणस्य फलम् अस्ति।

➢ इयमेव उपमानप्रकिया कारिकावल्याम् इत्थम् अस्ति यत्

*ग्रामीणस्य प्रथमत: पश्यतो गवयादिकम्।*
*सादृश्यधीर्गवादीनां या स्यात् सा करणं मतम्।।७३।।*

*वाक्यार्थस्यातिदेशस्य स्मृतिर्व्यापार उच्यते।*
*गवयादिपदानां तु शक्तिधीरुपमा फलम्।*

**उपमितिः**

संज्ञा-संज्ञिसम्बन्धज्ञानम् उपमितिः। कस्यचिद्वस्तुनः पदार्थस्य यत् नाम तदेव संज्ञापदेन आस्यते तथा च सः पदार्थः वा वस्तु 'संज्ञी' इति पदेन ज्ञायते। आरण्यकः पशुविशेषः (गवयः) संज्ञी अस्ति 'गवयपदम्' च तस्य पिण्डस्य पशुविशेषस्य संज्ञा अस्ति। 'अयं गवयपदवाच्यः'- अयं पशुविशेषः गवयनाम्ना उच्यते। तत्र गवयशब्दः वाचकः अस्ति तथा आरण्यकः पशुविशेषः तस्य वाच्यः अस्ति।

अस्य वाच्यवाचकसम्बन्धस्य (वा संज्ञासंज्ञिसम्बन्धस्य) प्रतीतिः एव उपमानप्रमाणस्य फलम् अस्ति। इदं फलं न प्रत्यक्षेण नानुमानेन साध्यते।

न्यायसूत्रकारः उपमानस्य लक्षणं 'प्रसिद्धसाधर्म्यात् साध्यसाधनम् उपमानम्' इति करोति। भाष्यकारः

समाख्यासम्बन्धप्रतिप्रत्तिरुमानार्थः इत्युक्त्वा तस्य व्याख्यां करोति, तस्य च परिष्कृतं स्वरूपम् अपि प्रदत्तम्। तदेव तर्कभाषाकारोऽपि स्वीकरोति।

तर्कसंग्रहकार अन्नंभट्टः लिखति यत्- "संज्ञासंज्ञिसम्बन्धज्ञानम् उपमितिः तत्करणं सादृश्यज्ञानम्। अतिदेशवाक्यार्थस्मरणम् अवान्तरव्यापारः"।

मुक्तावल्यामपि उपमितिप्रकिया यथा निर्दिष्टा यत्रारण्यकेन केनचिद् ग्रामीणं प्रत्युक्तं गोसदृशो गवयपदवाच्य इति। पश्चद् ग्रामीणेन कुतश्चिद् अरण्यादौ गवयो दृष्टः तत्र गोसादृश्यज्ञानं यज्जातं तदुपमितिकरणम्। तदनन्तरं "गोसदृशो गवयपदवाच्य" इति अतिदेशवाक्यार्थस्मरणं यज्जायते तदेव व्यापारः। तदनन्तरं तत्र "गवयो गवयपदवाच्य" इति ज्ञानं यज्जायते तदुपमितिः।

### उपमानप्रमाणविषयस्य वैविध्यम्

उपमानप्रमाणं केवलं संज्ञासंज्ञिनः सम्बन्धस्यैव निश्चयं न कारयति किन्तु विषयान्तरस्यापि निश्चयं कारयति।

यथा – "मुदगाकारवति ओषधिः विषापहरा" अर्थात् मुद्गाकारसदृशं यद ओषधम् अस्ति तत् विषं दूरीकरोति इति कश्चित् आरण्यकपुरुषात् यदा श्रुतं, श्रुत्वा च वनं गतः पूर्वश्रुतवाक्यार्थ स्मरति-

दृष्ट्वा च सादृश्यं निश्चयं करोति यत् इदमेव मुदगाकारसदृशं विषापहारकमोषधम्। तेन स्पष्टं भवति यत् अतिदेशवाक्यार्थस्य स्मरणेन सादृश्यज्ञानरूपोपमानप्रमणेन शब्दार्थयो: सम्बन्धस्यैव निश्चयो न भवति अपि तु विषहरणसाधनत्वसदृशान्यपदार्थादीनाम् अपि निश्चयो भवति।

अत: उपमानप्रमाणस्य क्षेत्रं शब्दार्थसम्बन्धं यावत न सीमितं किन्तु अन्यपदार्थेषु अपि विस्तृतम् अस्ति।

तथा च युक्तियुक्तानेकसमाधानै: विवरणैश्चान्यै ग्रन्थै: विद्वद्भिश्च वा स्पष्टं यत् उपमानप्रमाणस्य अन्तर्भाव: प्रत्यक्षानुमानशब्दादिषु प्रमाणेषु, न सम्भवति अत: "उपमानम्" स्वातन्त्रयेणैकं पृथक् प्रमाणम् एव इति सिध्दम्।

## अभ्यासः

**(अ) एकेन वाक्येन समाधानं लिखत।**

१. उपमानप्रमाणस्य आधारभूतं प्रमाणं किम्?

२. उपमानस्य किं लक्षणम्?

३. उपमानशब्दस्य का व्युत्पतिः?

४. अतिदेशशब्दस्य का व्युत्पतिः?

५. यथा गौः तथा गवयः इति कीदृशं वाक्यम्?

६. उपमानप्रक्रियायाः कति अवयवाः?

७. उपमानप्रक्रियायां तृतीयः अवयवः कः?

८. उपमानफलं किम्?

९. का नाम उपमितिः?

१०. गवयशब्दः वाचकः वा वाच्यः?

११. न्यायसूत्रानुमतम् उपमानस्य किं लक्षणम्?

१२. उपमितिजनने अवान्तव्यापारः कः?

१३. उपमाननिरूपणात् पूर्वं कथमनुमाननिरूपणम्?

१४. न्यायबोधिनिग्रन्थानुसारम् उपमानलक्षणं किम्?

१५. तर्कसङ्ग्रहानुसारम् उपमितेः किं लक्षणम्?

**(आ) योग्यं विकल्पं योजयत।**

| | | | |
|---|---|---|---|
| १ | उपमानम् | गोसदृशो गवयः | ५ |
| २ | गवयशब्दः | फलम् | ४ |
| ३ | पिण्डः | करणम् | १ |
| ४ | उपमितिः | वाचकः | २ |
| ५ | अतिदेशवाक्यम् | वाच्यः | ३ |

**(इ) व्याखात्मकाः प्रश्नाः**

१. प्रत्यक्षानुमानानन्तरम् उपमानप्रमाणनिरूपणे प्रयोजनम्।
२. तर्कभाषानुसारं सलक्षणम् उपमाननिरूपणम्।
३. तर्कभाषानुसारम् उपमानप्रक्रियानिरूपणम्।
४. तर्कभाषानुसारम् उपमितिलक्षणम्।
५. न्यायसूत्रानुमतस्य उपमितिलक्षणस्य अन्येषां मतानुसारं सङ्गतिः।

**(ई) निबन्धात्मकप्रश्नाः**

१. उपमानप्रकिया
२. उपमितिः

*****

## पाठ:-१०

## शब्दप्रमाणम्

**प्रस्तावना:-**

प्रागस्माभिः प्रमाणत्रयविषये ज्ञातम्, अधुना चतुर्थप्रमाणं शब्दप्रमाणम्, शब्दः एव प्रमाणम् शब्दप्रमाणम् इति वक्तुं शक्यते।




शब्दप्रमाणस्य – द्वैविध्यम्।

- नित्यम् (अनादि) ऋग्वेदे (८.७पु.६)- मन्त्रे निगदितं यत्-वेदः परमात्मनः नित्या वाक्।

अनादिनिधना नित्या वेदवाणी अस्ति। नहि वेदानां कर्ता भगवान्, तस्य निःश्वसितं वेदाः। भगवतः शब्दः भागवतः शब्दः चतुर्विधदोषनिर्मुक्ताः वेदाः। के च ते दोषाः? भ्रमः, प्रमादः, विप्रलिप्सा, कर्णापारवञ्च। एते चत्वारः दोषाः वेदेषु न सन्ति तस्मात् वेदशब्दः प्रमाणम्। यस्य शब्दस्य

उपरि सन्देहः नैव जायते न वा कर्तुं शक्यते। तस्मादेव प्रसिद्धं वाक्यं **“वेदाः प्रमाणम्”** नाम शब्दप्रमाणं श्रेष्ठं प्रमाणम् इति। वेदभिन्नान्यशास्त्रप्रमाणं वेदापेक्षया अनित्यम् इति केचन विद्वांसो ब्रुवन्ति।

**१०.१ वाक्यनिरूपणम्:-**

(मूलम्)

आप्तवाक्यं शब्दः। आप्तस्तु यथार्थभूतस्य अर्थस्य उपदेष्टा पुरुषः।

वाक्यं तु आकांक्षायोग्यतासन्निधिमतां पदानां समूहः। अत एव गौः अश्वः पुरुषो हस्ति इति पदानि न वाक्यम्, परस्पराकांक्षाविरहात्। वह्निना सिञ्चेदिति न वाक्यं योग्यताविरहात्। न हि अग्निसेकयोः परस्परान्वययोग्यताऽस्ति। तथा हि अग्निना इति तृतीयया सेकरूपं कार्यं प्रति करणत्वं अग्नेः प्रतिपादितम्। न चाग्निःसेके करणीभवितुं योग्यः। तेन कार्यकारणभावलक्षणसम्बन्धेऽग्निसेकयोः अयोग्यत्वात् अग्निना सिञ्चेद् इति न वाक्यम्। एवमेकैकशः प्रहरे प्रहरे असहोच्चारितानि “गाम् आनय” इत्यादि पदानि न वाक्यम्, सत्याम् अपि परस्पराकांक्षायां परस्परान्वययोग्यतायां परस्परसान्निध्याभावात्।

आकाङ्क्षायोग्यताऽऽसनिन्निधिभि: युक्त: पदससूह: वाक्यम् अस्ति, तदेव शब्दप्रमाणम् किन्तु कीदृशं वाक्यं प्रमाणम्? वाक्यम् अपि कान्-कान् नियमान् अपेक्षते वा कीदृशं वाक्यं शाब्दबोधजनकमित्याद्यनेकप्रश्नानां समुत्तरं सविस्तरम् अत्र प्रस्तूयते।

शब्दप्रमाणं नैयायिकानां चतुर्थं प्रमाणम् अस्ति। शब्दप्रमाणस्य लक्षणं 'आप्तवाक्यं शब्द:' विहितम्। अस्मिन् लक्षणे शब्द: इति पदं लक्ष्यम् 'आप्तवाक्यम्' इति पदं लक्षणं च दर्शयति। क: यथार्थवक्ता भवति?, वस्तु यथा यादृशं वर्तते तथा तादृशं वस्तु पदार्थो वा यो वक्ति स:। यथार्थभूतस्य अर्थस्य उपदेष्टा पुरुष: उच्चनीचजात्याद्यपेक्षारहित: आप्तो भवेत् इति सिद्धिम्।

अत एव भाष्यकारो ब्रूते यत् '**कृष्यार्यम्लेच्छानां समानं लक्षणम् (न्या.भा.१-१-७)**' अमरकोषेऽपि आप्तो नाम प्राप्त: ज्ञानं प्राप्त प्रत्ययिते विश्वस्ते, यथार्थज्ञानयुक्ते च इति स्पष्टम्। इति आप्तशब्दस्य विवेचना पूर्णा। अधुना आप्तोक्तं वाक्यं किं? किं तस्य लक्षणम्? इति जिज्ञासायां सत्याम् उच्यते मूलकारेण

(मूलम्)

**आकाङ्क्षायोग्यतासन्निधिमतां पदानां समूहो वाक्यम्।**

सरलार्थं पश्यामश्चेत् पदसमूहो वाक्यम्, किन्तु पदस्य विशेषणत्रयव्यपेक्षा, तादृशत्रयविशेषयुक्तपदानां समूहो यदि भवति तदा एव तद् वाक्यमिति वक्तुं शक्यते नो चेत् अवाक्यम् इति।

तस्य वाक्यस्य ग्रन्थानुगुणं वयं शास्त्रीयं मतं सर्वसम्मतञ्च पश्यामः इति।

'पदानां समूहः वाक्यम्' इत्येतावदेव वाक्यस्य लक्षणं क्रियते तर्हि तद् वाक्यस्य पूर्णं लक्षणं भवितुं न शक्नोति, यतो हि पदानि यानि सन्ति तेषु एकस्यापि विशेषणस्याभावेन कस्यापि पदसमूहस्य अर्थे पूर्णत्वबोधनाय सामर्थ्यं न सम्भवेत। तदा न तद् वाक्यम्उच्यते। तदेव हि वाक्यं कथ्यते यत् पूर्णार्थस्य बोधं कारयेत्। तस्मात् शबरस्वामिना वाक्यस्य लक्षणं कृतं यत् **अर्थैकत्वादेकं वाक्यं साकांक्षं चेद् विभागे स्यात्।** इति विचिन्त्यैव ग्रन्थकारेण 'पदानाम्' इत्यभ्यै आकङ्क्षादिविशेषणानि प्रदत्तानि **आकांक्षा-योग्यता-सन्निधिमतां पदानां समूहो वाक्यम् इति लक्षणम्।** तत्र का नाम आकांक्षा चेत् (मुक्तावल्याम्) आकाङ्क्षां निर्वक्ति-''**यत् पदेन विना यस्याननुभावकता भवेत्। आकाङ्क्षा..........।।८८।।**''

अर्थात् येन पदेन विना यस्य पदस्य अननुभावकता अन्वयाननुभावकत्वं नाम अर्थस्मारकत्वं भवेत् तेन सह तस्याकाङ्क्षा। यथा

‘घट’मिति कारकपदं ‘आनये’ ति क्रियापदं विना नान्वयबोधं जनयति तेन तस्याकाङ्क्षा।

लक्ष्ये यदि ‘आकाङ्क्षा’पदं न निवेश्यते तर्हि ‘गौः अश्वः पुरुषः हस्ति’ इत्यादिपदसमूहोऽपि वाक्यं स्यात्,कारणं यत् एतेषां पदानां सान्निध्यं परस्परम्, अर्थेषु अपि परस्परं आकांक्षायाः अभावात् तन्न वाक्यं वक्तुं शक्यते। तस्मात् निराकांक्षपदसमूहे वाक्यत्वस्य अतिप्रसक्तिनिवारणाय लक्षणे आकांक्षापदस्य निवेश आवश्यकः।

अथ का नाम योग्यता? इति जिज्ञासायाम् एकपदार्थेऽपरपदार्थसम्बन्धो योग्यता। कारिकावल्यां यथा - ‘‘**पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तिता।।।८३।**’’

तद्वत्ता=पदान्तरार्थप्रतियोगिको विवक्षितसम्बन्धो योग्यता परिकीर्तिता=कथितेति कारिकार्थः। तत्र मुक्तावलीकारः एकपदार्थेऽपरपदार्थसम्बन्धो योग्यता इत्यर्थः। ‘पयसा सिञ्चति’ इत्यत्र सेकपदार्थे पयसः करणतया सम्बन्धो योग्यता। नतु ‘वह्निना’ सिञ्चति इत्यत्र वह्नेः सेककरणत्वाभावात् द्रवद्रव्यक्षरणस्यैव सेकपदार्थत्वात्। वह्नौ च तदभावात्।

‘‘**कारणं सन्निधानं तु पदस्यासत्तिरुच्यते।**’’

अव्यवधानेन पदानां सन्निधि: आसक्तिरुच्यते। अथवा तर्कसंग्रहे अविलम्बेन परस्परं सहोच्चारितानि पदानि यदि भवन्ति तर्हि तत् सामान्यं सन्निधि:, आसक्तिर्वा उच्यते। प्रहरेऽसहोच्चारितानि गाम् आनय इत्यादिपदानि न प्रमाणम्, सान्निध्याभावात्। एतादृक् आकाङ्क्षायोग्यतासन्निधिमतां पदानां समूहो वाक्यम् उच्यते।

तस्माद् मूलकार: कथयति तर्कभाषायाम् -

(मूलम्)

**यानि तु साकाङ्क्षाणि योग्यतावन्ति सन्निहितानि पदानि तानि एव वाक्यम्। यथा-ज्योतिष्टोमेन स्वर्गकामो यजेत इत्यादि। यथा च नदीतीरे पञ्चफलानि सन्ति इति। यथा च तान्येव-गामानय इत्यादिपदान्यविलम्बितोच्चरितानि।**

अत्रज्योतिष्टोमेन इत्यादि वैदिकवाक्यम्। नदीतीरे इत्यादि लौकिकवाक्यम्। अविलम्बोच्चरितं पदसमूहात्मकानि भिन्नानि त्रीणिवाक्यानि आकाङ्क्षादिनियमवन्ति सन्ति वाक्यानि उच्यन्ते।

(मूलम्)

नन्वत्रापि न पदानि साकाङ्क्षाणि किन्त्वर्था फलादीनामाधेयानां तीराद्याधाराकाङ्क्षितत्वात्। न च विचार्यमाणेऽर्था अपि साकाङ्क्षाः। आकाङ्क्षायाः इच्छात्मकत्वेन चेतनधर्मत्वात्।

सत्यम्। अर्थास्तावत् स्वपदश्रोतर्यन्योन्यविषयाकाङ्क्षा जनकत्वेन साकाङक्षा इत्युच्यन्ते। तद्वारेण तत्प्रतिपादकानि पदान्यपि साकाङक्षाणीत्युपचर्यन्ते। यद्वा पदान्येवार्थान् प्रतिपाद्यार्थान्तरविषयाकाङक्षा जनकानि इत्युपचारात् साकाङ्क्षाणि। एवमर्थाः साकाङ्क्षाः परस्परान्वययोग्याः। तद्वारेण पदान्यपि परस्परान्वययोग्यानीत्युच्यन्ते।

सन्निहितत्वं तु पदानामेकेनैव पुंसा अविलम्बेनोच्चरितत्वम्। तच्च साक्षादेव पदेषु सम्भवति नार्थद्वारा। तेनाऽयमर्थः सम्पन्नः। अर्थप्रतिपादनद्वारा श्रोतुः पदान्तरविषयाम् अर्थान्तरविषयाम् वाऽकाङ्क्षां जनयतां प्रतीयमानपरस्परान्वययोग्यार्थे प्रतिपादकानां सन्निहितानां पदानां समूहो वाक्यम्।

पदं च वर्ण समूहः। समूहश्चात्र एकज्ञानविषयीभावः। एवं च वर्णानां क्रमवताम् आशुतरविनाशित्वेन एकदा अनेकवर्णानुभवासम्भवात् पूर्वपूर्ववर्णान् अनुभूय, अन्त्यवर्णश्रवणकाले पूर्वपूर्ववर्णानुभवजनित-संस्कारसहकृतेन अन्त्यवर्णसम्बन्धेन पदव्युत्पादनसमयग्रहानुगृहीतेन

श्रोत्रेणैकदैव सदसदनेकवर्णावगाहिनी पदप्रतीतिः जन्यते, सहकारिदाढ्र्यात् प्रत्यभिज्ञानवत्। प्रत्यभिज्ञाप्रत्यक्षे ह्यतीतापि पूर्वावस्था स्फुरत्येव। ततः पूर्वपूर्वपदानुभवजनितसंस्कारसहकृतेनान्त्यपदविषयेण श्रोत्रेन्द्रियेण पदार्थप्रत्ययानुगृहीतेन अनेकपदावगाहिनी वाक्यप्रतीतिः क्रियते।

तदिदं वाक्यम् आप्तपुरुषेण प्रयुक्तं सच्छब्दनामकं प्रमाणम्। फलन्त्वस्य वाक्यार्थज्ञानम्। तच्चैतच्छब्दलक्षणं प्रमाणं लोके वेदे च समानम्। लोके त्वयं विशेषो यः कश्चिदेवाप्तो भवति, न सर्वः। अतः किञ्चिदेव लौकिकं वाक्यं प्रमाणं, यदा आप्तवक्तृकम्। वेदे तु परमात्मश्रीमहेश्वरेण कृतं सर्वमेव वाक्यं प्रमाणं, सर्वस्यैवाप्तवाक्यत्वात्।

शङ्का -

वाक्यं तु आकांक्षा-योग्यता-सन्निधिमतां पदानां समूहः इति ग्रन्थोक्तपरिष्कृतलक्षणे कृतेऽपि आकांक्षाशब्दे शङ्कते - नन्वत्रापि इत्यादिना। यथा न तानि पदानि वाक्यानि इति वक्तं शक्यन्ते यतो हि आकांक्षा न पदानाम् किन्तु अर्थानाम् मध्ये भवति, वा अर्थेषु आकांक्षा न पदेषु इति भावार्थः। यथा नदीतीरे पञ्चफलानि सन्ति। अस्मिन् वाक्ये (नदीतीरे, पञ्च, फलानि, सन्ति) परस्परं पदानां न आकांक्षा कारणं तत्र

अस्ति यत् एतानि पदानि अन्योन्यं विना अपि स्वकीयम् अस्तित्वं-विद्यमानतां निर्वहन्ति इति।

आकाक्षां तु पदानाम् अर्थेषु भवति यतो हि तीरं तत्र आधेयता तीररूपेण फलं च आधेयरूपेण ज्ञायते। तीरस्य आधारता फलरूपाधेयं विना न सम्भवति ततः ज्ञायते यत् अर्थानाम् आकाङ्क्षा न पदानि साकांक्षाणि। फलादीनाम् आधेयानां तीराद्याधाराकांक्षितत्वात्। किन्तु सूक्ष्मे विचार्यमाणे सति अर्थाः अपि न साकांक्षाः। कथम्? उच्यते, आकांक्षा नाम इच्छारूपः कश्चन धर्मः स चेतने आत्मनि भवति, चेतनस्य धर्मः इच्छा न तु जडरूपस्यार्थस्य धर्मः, जडे चेतनाभावात् ज्ञानेच्छादीनामप्यभावः इति। तस्मात् मूले प्रोक्तं आकांक्षायाः इच्छात्मकत्वेन चेतनधर्मत्वात्। तस्मात् प्रश्नः वा पूर्वपक्षः यत् पदानि अर्थाः वा कथं साकांक्षा इति।

**समाधानम् -**

आकांक्षा चेतनस्य धर्मः इति उचितम् उक्तम् सा न पदानाम् अर्थानाम् वा धर्मः। तथापि अचेतनार्थानाम् अचेतनपदानाञ्च उपरि आकांक्षायाः आरोपितः व्यवहारस्तु शक्यः (औपचारिको व्यवहारः)। अर्थात् आकांक्षायाः आश्रयः अचेतनस्सन्नपि अचेतनार्थबोधकपद-श्रोतृणाम् मनसि तेऽर्थाः परस्पराकांक्षाः उत्पादकास्तु भवन्त्येव। तस्माद्

उपचारात् अन्योन्यविषयाकांक्षाजनकत्वेन साकाङक्षा इत्युच्यन्ते। तद्द्वारेण तत्प्रतिपादकानि पदानि अपि साकाङ्क्षाणि इति उपचर्यन्ते। अथवा एवम् अपि वक्तुं शक्यते यत् पदानि स्वस्वार्थान् बोधयित्वा इतरार्थस्य आकांक्षां जनयन्ति।

एतावता पदानि साक्षात् उपचारेण साकांक्षाणि कथ्यन्ते। तथा च यदि अर्थाः परस्परं साकांक्षाः परस्परान्वययोग्याः सन्ति तदा तद्द्वारेण तत्प्रतिपादकानि सन्ति इति वक्तुं शक्यते। एवमेव अर्थाः साकाङक्षाः परस्परान्वययोग्या तदेद्वारेण पदानि अपि परस्परान्वययोग्यानि इति उच्यन्ते। पदानां साकांक्षता वास्तविकी न भूत्वा साकांक्षैः अर्थैः परस्परम् औपचारिकी भवति। किन्तु पदानां भवति। यतो हि एकेन मनुष्येण अविलाम्बेनोच्चारितमेव सन्निधिः कथ्यते। उच्चरितत्वाच्च पदानां स्वधर्मः अस्ति। तस्माद् कारणादेव मूलकारः कथयति यत्

सन्निहितत्वं तु पदानाम् एकेनैव पुंसा अविलम्बेन उच्चरितत्वम्, तच्च साक्षादेव पदेषु सम्भवति नार्थ द्वारा तेनाऽयम् अर्थः सम्पन्नः। अर्थप्रतिपादनद्वारा श्रोतुः पदान्तरविषयाम् वा आकांक्षां जनयतां प्रतीयमानपरस्परोन्वययोग्यार्थप्रतिपादकानां सन्निहितानां पदानां समूहो वाक्यम्।

## १०.२ पदार्थज्ञानप्रक्रिया -

ग्रन्थकारेण "पदं च वर्णसमूह:" इति पदस्य लक्षणं कृतम् किन्तु वर्णानां समूहो न सम्भवति अत: कथं संगच्छते एतल्लक्षणम्। यतो हि समूहशब्दस्य प्रयोग: तत्र क्रियते यत्राधिकसहावस्थितपदार्थप्रतीति: स्यात्। यथा एकस्मिन्नेवाधिकरणे सहावस्थितानां अनूभुयमानानां धवखदिरपलाशादिपदार्थानां अथवा हस्ती, अश्व, पुरुषादि पदार्थानां 'समूह' इति शब्देन व्यवहर्तुं शक्यते। किन्तु वर्णानां जायमानेन – उत्पत्तिविनाशेन तेषां तादृशोऽनुभवो न भवति। तस्माद् वर्णानां समूहत्वाभाव: कदापि न सम्भवति इति पूर्वपक्ष:।

तत् समाधत्ते ग्रन्थकार: स्वशैल्या – यत् – **समूहश्चात्र एकज्ञानविषयीभाव:**। अर्थात् वास्तिविके समूहे असम्भवेऽपि बुद्धौ तु समूहस्य सम्भव: अर्थात् बुद्धिगत: समूह: तु सम्भवत्येव। एकज्ञानविषयत्वं नाम एकं पदं ----- इति ज्ञानविषयत्वं एकस्य पदस्य यत् ज्ञानं तस्य ज्ञानस्य विषयीभवनम् एव। तादृशी विषयता तु वर्णेषु सम्भवति तस्माद् वर्णानां काल्पनिकसमूहेऽपि वास्तविकसमूहासम्भवात् न काचित् विप्रतिपत्ति:।

**एवञ्च वर्णानां क्रमवताम् इत्यादिपङ्क्तीनाम् भावार्थ:** - पूर्वं नैयायिकै: कथितं यत् एकस्य ज्ञानस्य विषयो नाम एकम् पदम्

इत्याकारकज्ञानस्य विषयीभवनम् तादृशी विषयता वर्णेषु अपि सम्भवेत् इति। अथ वैयाकरणो ब्रूते यत् 'एकं पदम्' प्रतीतिः स्फोटद्वारा सम्भवति। स्फोटे प्रत्यक्षम् अर्थापत्तिश्च इति प्रमाणद्वयम्। यथा 'गौ' इति एकं पदम् अस्ति इति प्रतीतिः नानावर्णातिरिक्ता एव अस्ति, अतः प्रत्येक्षप्रमाणेन स्फोटस्य अस्तित्वं सिद्धम्, तथैव अर्थापत्तिप्रमाणेन अपि स्फोटस्य सिद्धिर्भवति। यदि उच्यते न स्फोटेन अपि तु वर्णैः एव अर्थप्रतीतिः जायते तर्हि स्पष्टं कुरु यत् अर्थप्रतीतिः व्यस्तवर्णैर्भवति वा समस्तवर्णैः? इति।

प्रथमः पक्षः अनुचितः यतो हि अर्थबोधकृत् कस्मादपि एकवर्णात् अतिरिक्ताः अन्ये सर्वे वर्णाः व्यर्था इति कथनापत्तिः स्यात्, द्वितीयमपि कारणं यत् प्रत्येकवर्णद्वारा अर्थ प्रतीतिर्भवति इति दृष्टिगोचरं नास्ति। द्वितीयपक्षोऽपि नोचितः यतो हि उत्पन्नविनाशिवर्णानाम् एकत्रितम् असम्भवम् तस्माद् वर्णानां वाचकता अनुपपन्ना स्यात् अतः तदुपपत्तये स्फोटस्य स्वीकारः आवश्यकः येन अर्थप्रतिपत्तिर्जायेत। अतः वैयाकरणस्य कथनमस्ति यत् स्फोटावलम्बनेन एव एकं पदम् इति प्रतितिर्जायते। तस्य समाधानं ग्रन्थकारेण **'सदसदनेकवर्णावगाहिनी पदप्रतिपत्तिर्जन्यते इति पङ्क्त्या प्रदत्तम्'**। या च पदप्रतीतिः अस्ति सा वर्णावगाहिनी एव अस्ति सा वर्णातिरिक्त-शशविषाणसदृशः कस्यचिदन्यस्य स्फोटस्य अवगाहनं न कारयति।

न च अन्तिमवर्णश्रवणकाले अन्यवर्णाभावे अनेकवर्णावगाहिनी प्रतीतिः कथं स्यादिति वाच्यम्। यतो हि वयं सदसदनेकवर्णावगाहिनी पदप्रतीतिः जन्यते इति क्रमः। चरमवर्णः सन् पूर्ववर्णाः असन्तः एवञ्च सदसदनेकवर्णावगाहनस्य क्रमिकत्वात् पदप्रतीत्तिः न जायते इत्यपि वक्तुं न शक्यते। यतो हि वयं एकदैव सदसदनेकवर्णावगाहिनी पदप्रतीतिः इति क्रमः। यदा युगपद् सदसदनेकवर्णावगाहनं भविष्यति तदा पदप्रतीतिरपि अवश्यभाविनी। अनेन प्रकारेण पदप्रतीतिः श्रोत्रेण भवति, तत्र मूले ''पूर्वपूर्ववर्णान् अनुभूय......जन्यन्ते'' इत्यादिकथनस्य भावः अस्ति यत् श्रोता उच्चारणकर्तुः पूर्वपूर्ववर्णानाम् स्वश्रोत्रेन्द्रियेण ग्रहणं करोति। यद्यपि एते वर्णाः क्रमशः नष्टाः भवन्ति किन्तु तत्तद्वर्णानुभवः श्रोतुः चित्ते एकं संस्कारविशेषं जनयति। यदा श्रोता कस्यचिद् पदस्य अन्तिमवर्णस्य श्रवणं करोति तदा तस्य चित्ते पूर्व-पूर्ववर्णानुभूतसंस्काराः विद्यमानाः भवन्ति अन्तिमवर्णस्य तु तस्य श्रोत्रं साक्षात् रूपेण अनुभवति। अतः पूर्वपूर्ववर्णानां संस्कारैः सह अन्तिमवर्णस्य संयोगेन सह पदस्य पूर्णरूपेण प्रतीतिः जायते।

अनया प्रक्रियया क्रमवताम् उत्पत्तिमताम्, अतिशीघ्रविनाशवतां वर्णानां समुदायोऽपि एकज्ञानविषयस्य जनकः अस्ति। तस्माद् वर्णसमूहो पदम्।

- अत्र पूर्वपक्षः यत् संस्काराः खलु अनुभूतविषयस्य स्मरणमात्रमात्रं कारयति, तदभिन्ने कार्ये तेषां संस्काराणां सामर्थ्यं न भवति, अतः पूर्वपूर्ववर्णानां स्वानुभवजन्यसंस्काराणां सहयोगेन अपि सदसद्ववर्णानां युगपद् जायमाना प्रतीतिरसम्भवा, तदा कथं पदप्रतीतिः सम्भवेत्, न शक्या।
- उत्तरयिति – ग्रन्थकारः सहकारिदार्ढ्यात्...... स्फुरत्येव।

अस्य कथनस्य तात्पर्यम् - यदि संस्कारस्य चित्ते द्दढता अस्ति तदा सः स्मृतिभिन्नान्यकायेऽपि निमित्तं भवति। “सोऽयं देवदत्तः” इति प्रत्यभिज्ञावत्। पत्यभिज्ञाप्रत्यक्षे ह्यतीताऽपि पूर्वावस्था स्फुरत्येव ततः पूर्वपूर्वपदानुभवजनितसंस्कारसहकृतेन अन्त्यपदविषयेण श्रोत्रेन्द्रियेण पदार्थप्रत्ययानुगृहीतेन अनेकपदावगाहिनी वाक्यप्रतीतिः क्रियते। अनेन प्रकारेण शब्दप्रमाणलक्षणघटकीभूतौ आप्तवाक्यशब्दौ व्याख्यातौ। एवं च पसंहारं कुर्वन् मूलकारः कथयति तदिदं वाक्यम्... इत्यादिभिः पङ्क्तिभिः।

## १०.३ वाक्यनिरूपणम्ः-

“पदसमूहो वाक्यम्।” श्रोत्रेन्द्रियेणैव वाक्यप्रतीतिः भवति। सा वाक्यप्रतीतिरप्यनेकपदानां ग्राहिका अर्थात् अनेकपदावगाहिनी भवति।

अत्रापि समूहस्य अर्थः एकज्ञानविषयत्वम् अस्ति। यदा अनेक पदेषु अथवा एकस्मिन् पदे इदं एकं वाक्यम् ईदृशी प्रतीतिर्जायते तदा सः पदसमूहः अथवा एकं पदम् वाक्यमिति उच्यते। यथा एकवर्णात्मकं पदम्भवति तथा एकपदात्मकं वाक्यम् अपि भवति।

**वाक्यप्रतीतौ त्रयः सहायका पदार्थाः**

१. पूर्वपूर्व-पदानुभवजनितसंस्काराः।

२. अन्तिमपदस्य श्रोत्रेण-ग्रहणम्।

३. श्रोतरि जायमाना पदार्थप्रतीतिः।

इत्थम् आकाङ्क्षा-योग्यता-सन्निधियुक्तः पदसमूहो वाक्यम् उच्यते। एवं पदसमूहरूपवाक्यस्य प्रयोगं यदा-यथार्थदर्शी यथार्थवक्ता आप्तः करोति तदा तदेव वाक्यं शब्दप्रमाणम् इति कथ्यते। शब्दस्य व्युत्पत्तिः करणपरा यथा शब्द्यते अनेन इति शब्दः, किन्तु करणं तदेव कथ्यते यत् फलवत् भवति। अतः प्रोक्तशब्दप्रमाणस्य फलम् अस्ति वाक्यार्थज्ञानम् इति।

शब्दप्रामाण्यविचारश्च मूलकारः तदिदं वाक्यमाप्तपुरुषेण..... इत्यादिना ज्ञापयति।

## १०.४ शक्यार्थविवेचनम्:-

शब्द: स्वशक्त्या स्वसहजशक्त्या च पदार्थं बोधयति दर्शयति वा ज्ञापयति स: अर्थ: इति। शब्देन शक्तिद्वारा अर्थ: य: ज्ञापित: तस्मात् शक्यार्थ: पदं शक्तम्, तस्य अर्थ: शक्यार्थ: इति। शब्द: शक्तिरूपसम्बन्धेन अर्थबोधं नियमयति, तस्य शब्दस्य या सहजा शक्ति: सा अभिधा शक्ति: इति उच्यते।

शक्यार्थविषये मतमतान्तराणि सन्ति। नैयायिकानां मतम् अस्ति यत् शब्दश्रवणे जाते शब्दश्रवणे कृते सति श्रोतु: य: बोध: भवति स सर्वोऽपि अर्थ:। तेषु सर्वेष्वपि शब्दस्य सहजा शक्तिः वर्तते। यथा गोशब्दश्रवणे जाते आकृतिविशिष्टव्यक्तेश्च बोध: भवति। अर्थात् गोत्वे सास्नादिषु, व्यक्तौ वा एतेषु सर्वेषु गोशब्दस्य शक्ति: अस्ति। यथा सूत्रकार: महर्षि: गौतमः कथयति “जात्याकृतिव्यक्तय: पदार्थ:” एतद्-सूत्रगताकृतिशब्दविषयोऽपि नैकमतानि सन्ति। प्राचीननैयायिकै: आकुतिशब्देन ‘अवयवसंस्थानरूप: आकार:’ स्वीकृत: किन्तु नव्यनैयायिकै: आकृतिशब्देन जातिव्यक्त्योः य: सम्बन्ध: समवाय: अस्ति स: स्वीकृत:।

एवम्प्रकारेण जात्याकृतिव्यक्तय: शब्दस्य अर्थ: इति प्राचीनमतम्। तथा जातिव्यक्त्योः द्वयो: सम्बन्ध प: समवाय: एव

शब्दस्य अर्थः इति नवीनमतम्। मीमांसकाः तु लाघवात् जातिः एव शब्दस्य अर्थः इति मन्यन्ते। शब्दश्रवणानन्तरं व्यक्तिज्ञानं तु आक्षेपात् भविष्यति।

- यथा प्रभाकरमीमांसकमते तु शब्दस्य शक्यार्थः केवला जातिः इति मत्वा जातिबोधसामग्र्या एव व्यक्तेः बोधः भवति इति ज्ञापयति, यतो हि व्यक्तिमध्ये तुल्यव्यक्तिवेद्यता तिष्ठति। अर्थात् समसामग्रीग्राह्यता, श्री कुमारिलभट्टपादैः अपि शब्दस्य शक्यार्थः (वाच्यार्थः) जातेरेवेति प्रोक्तम् – इत्यंशे द्वयोः समानता अस्ति तथा च व्यक्तेः ज्ञानम् अनुमानेन तैः दर्शितम्।
- मण्डनमिश्रमतेऽपि शब्दस्य अभिधाशक्त्या एव जातेः बोधः इति, अर्थात् शब्दस्य शक्यार्थः (वाच्यार्थः) जातिरस्ति व्यक्तेश्च ज्ञानं लक्षणया भवति।
- कुब्जशक्तिवादि श्रीवरेण-अपि जातिरेव शब्दस्य शक्यार्थः (वाच्यार्थः) इति ज्ञापितम्, व्यक्तेश्च बोधः व्यक्तिमन्तरा जातेः अनुपपत्तिं दृष्ट्वा अर्थापत्तिप्रमाणेन शब्दजन्यः एव मतः।
- तात्पर्यं तु शब्दस्य शक्तिः केवला जातावेव व्यक्तौ न अतः व्यक्तेः ज्ञानं शब्दशक्त्या अपितु प्रकारान्तरेण भवति।

❖ **मीमांसकमतखण्डनम् :-**

व्यक्तेः अनन्यलभ्यता अप्रमाणिकी, तद्दर्शिताः सर्वाः पध्दतयः सदोषाः - यथा

**प्रभाकरमते दोषः –**

केवलां तुल्यव्यक्तिवेद्यताम् उक्त्वैव व्यक्तिबोधस्य उपपत्तिः नैव शक्यते यतो हि कस्यापि कार्यस्य उत्पतिः केनापि कारणेनैव भवति न कारणाभावे।

**श्रीकुमारिलभट्टपादमते दोषः –**

अस्मिन् मते अभिधाशक्त्या जातेः बोधः, अनुमानेन च व्यक्तेः बोधः भवति, किन्तु अनुमानेन व्यक्ते बोधः एतस्मात् कारणाद् न भवति यत् अनुमिते ज्ञाने वस्तुनः भानं पक्षसाध्ययोः तयोश्च सम्बन्धरूपेण एव भवति, किन्तु व्यवहारोपयोगिनी व्यक्तिः अनुमितिविषयो न भवति, अतः परामर्शाभावात् अनुमानेन व्यक्तेः बोधः भवति इति कथनं न समुचितम्।

**मण्डनमिश्रमते दोषः –**

मण्डनमिश्रमते जातिः तु शब्दस्य वाच्यः (शक्यः) अस्ति व्यक्तेश्च ज्ञानं लक्षणया भवति। किन्तु एतत् कथनं निःसारनत प्रतीयते। यतो हि

अन्वयानुपपत्तिः लक्षणाबीजम् किन्तु गौः अस्ति इति उच्यमाने गोत्वे अस्तित्वस्य अन्यानुपपत्तिस्तु नास्ति एव तस्मात् लक्षणाभावेऽपि तथा गोशब्दवाच्याभावेऽपि गोव्यक्तेस्तु बोधस्तु भवत्येव।

विना लक्षणया एव गोव्यक्तेः बोधः भवत्येव किन्तु अस्मिन् मते व्यक्तिबोधोपपादनं न भवति इति दोषः।

**कुब्जशक्तिवादिश्रीकरमते दोषः –**

अस्य मतानुसारं जातेः भानं शब्दशक्त्या भवति व्यक्तेश्च भानम् अर्थपत्तिप्रमाणेन भवति।

किन्तु विजातीयप्रमाणैः एकज्ञानस्य – उपपत्तिर्न भवति अतः शब्दस्य अर्थापत्तेश्च परस्परसहयोगेन व्यक्तेः भानं न भवति। अभिप्रायः यत् शब्दस्य श्रवणे जाते सति जातेः व्यक्तेश्च द्वयोः युगपदेव ज्ञानं भवत्येव न तु क्रमेण।

अनन्यलभ्यः शब्दार्थः इति मन्यमाने द्वयो युगपद् ज्ञानं कथं सम्भवति? अतः जातिवत् व्यक्तिरपि शब्दस्य वाच्यः एव मन्तव्यः।

शब्दश्रवणानन्तरं न केवलं पदार्थज्ञानं भवति किन्तु अनेकपदार्थानां सम्बन्धस्यापि ज्ञानं भवति। किन्तु पदार्थानां सम्बन्धस्य ज्ञानं केन

कारणेन भवति? इति चिन्तयामश्चेत् किं पदार्थाना परस्परसम्बन्धे पदशक्त्या सम्बन्धज्ञानं भवति? अथवा वाक्यावयवीभूतपदानां परस्पराकांक्ष या सम्बन्ध ज्ञानं भवति?

उपर्युक्तप्रश्नद्वयसमाधानं मीमांसकैः प्रकारद्वयेन प्रदत्तः। इमौ च तौ प्रकारौ।

१. अभिहितान्वयवादः
२. अन्विताभिधानवादः

## १०.५ अभिहितान्वयवादः

श्रीकुमारिलभट्टपादाः अभिहितान्वयवादिनः सन्ति। नैयायिकाः अपि समर्थका अस्य। अथ च को नाम वाक्यार्थः? पदार्थसंसर्गबोधः वाक्यार्थः उच्यते।

अस्य वाक्यार्थस्य निष्पत्तिप्रकारं अभिहितान्वयवादी कुमारिलभट्टः ज्ञापयति यत् पदानि स्वाभिधया शक्त्या स्वस्वार्थान् बोधयन्ति किन्तु अर्थानां सम्बन्धं न ज्ञापयन्ति। पदैः अभिहितम् अर्थानां परस्परं सम्बन्धज्ञानं तु तत्तत् पदानां पौर्वापर्यरूपवाक्यसामर्थ्यबलेन भवति।

अभिप्रायस्तु पदानां स्वस्वार्थभिन्नः कश्चन नूतनः अर्थः वाक्यार्थरूपेण प्रकारितो भवति। तस्य च क्रमः – इत्थम्

१. पदानि स्वीयान् स्वीयान् अर्थान् अभिदधते।

२. अर्थानाञ्च आकांक्षायोग्यतासन्निधिं दृष्ट्वा तेषां परस्परं सम्बन्धः (अन्वयः) भवति।

अनेन प्रकारेण पदैः अभिहितानाम् अर्थानां यः परस्परम् अन्वयः, स एव अभिहितान्वयवादः। अभिहितानाम् अन्वयः - अभिहितान्वयः तस्य वादः सिध्दान्त इत्यर्थः।

## १०.६ अन्विताभिधानवादः

वाक्यार्थविषये द्वितीयः प्रकारः अस्ति अन्विताभिधानवादः, प्रभाकरमीमांसकाः गुरवः अन्विताभिधानवादिनः सन्ति। तेषां वाक्यार्थप्रक्रिया अनया रीत्या विद्यते वाक्यघटकीभूतपदानि स्वस्य केवलार्थमात्रं न ज्ञापयित्वा अन्वितार्थम् (परस्परं सम्बद्धम्) एव अभिधाशक्तिद्वारा अभिहितं कुर्वन्ति।

व्यवहारादिभिः अन्विते अर्थे एव शक्तिग्रहः भवति अर्थात् अभिधाशक्तिद्वारा पदानि अन्वितार्थस्यैवाभिधानं कुर्वन्ति तस्मात्

कारणात् उच्यतेऽसौ अन्विताभिधानवादः। अन्वितस्य अभिधानम्, तस्य च वादः।

**प्रमाणचतुष्टयोपसंहारः -**

(मूलम्)

**वर्णितानि चत्वारि प्रमाणानि। एतेभ्योऽन्यन्न प्रमाणम्, प्रमाणस्य सतः अत्रैवान्तर्भावात्।**

नैयायिकसम्मतानि चत्वारि प्रमाणानि वर्णितानि एतेभ्यः चतुर्भ्यः प्रमाणेभ्यः पृथग् अधिकं न प्रमाणम्। यदि अधिकं मन्यते चेत् तेषां एतेषु चतुर्षु एव अन्तर्भावः शक्यः किन्तु नैयायिकास्तु चत्वारि एव प्रमाणनि सन्ति इति कथयन्ति अन्यानि प्रमाणनि एव न सन्ति तदा कुत्र अन्तर्भावः? सतः प्रमाणस्य इति मूलपङ्क्त्या सूचितम्।

भिन्न- भिन्न दार्शनिकानां मते प्रमाणसङ्ख्याविषये कश्चन न्यूनाधिकः भावः दृष्टिगोचरो भवति। आचार्याः विश्वेश्वराः पद्यद्वयेन प्रमाणसंग्रहं बोधयन्ति। यथा-

**प्रत्यक्षमात्रं चार्वाका बौद्धा वैशेषिका द्वयम्।**
**सांख्या योगास्त्रयं चैव तार्किकाश्च चतुष्टयम्।।**

पञ्च प्राभाकरा, भाट्टास्तथा वेदान्तिनश्च षट्।
पौराणिकास्तथा चाष्टौ प्रमाणानि ब्रुवन्ति वै।।

## अभ्यासः

(अ) एकेन वाक्येन समाधानं लिखत।

१. वेदः परमात्मनः नित्या वाग् इति कुत्र निगदिनम्?
२. के दोषाः?
३. को नाम शब्दः?
४. कः आप्तः?
५. किं नाम वाक्यम्?
६. “वह्निना सिञ्चेत्” इति कथं न वाक्यम्?
७. गौः अश्वः पुरुषो हस्ती इत्यादिपदसमूहस्य कथं न वाक्यत्वम्?
८. का नाम आकाङ्क्षा?
९. का नाम योग्यता?
१०. का नाम आसत्तिः?
११. किं नाम पदम्?
१२. स्फोटवादः कस्य?
१३. सोऽयं देवदत्तः इति कीदृशं वाक्यम्?

१४. गौतमानुसारं कः पदार्थः?

१५. अभिहितान्वयवादः कस्य?

## (आ) योग्यं विकल्पं योजयत।

| | | | |
|---|---|---|---|
| १ | पदम् | अभिहितान्वयवादः | ४ |
| २ | वाक्यम् | अन्विताभिधानवादः | ५ |
| ३ | गौतमः | पदसमूहः | २ |
| ४ | कुमारिलभट्टः | वर्णसमूहः | १ |
| ५ | मण्डनमिश्रः | जात्याकृतिव्यक्तयः पदार्थः | ३ |

## (इ) व्याखात्मकाः प्रश्ना।

१ वाक्यलक्षणनिरूपणम्।

२ आकाङ्क्षायोग्यतासन्निधिनिरूपणम्।

३ वाक्यार्थज्ञानक्रियानिरूपणम्।

४ अभिहितान्वयवादः।

५ अन्विताभिधानवादः।

**(ई) निबन्धात्मकप्रश्नाः।**

१ शक्यार्थे मतमतान्तरनिरूपणम्।

२ शब्दप्रमाणनिरूपणम्।

***

## व्याख्यातॄणां परिचयः



### डॉ. उमामहेश्वरी बी.



आन्ध्रप्रदेशे नन्द्यालजिलायां १९८८ तमे वर्षे लब्धजन्मा **डॉ. उमामहेश्वरी बी.** न्यायशास्त्रे शास्त्री, आचार्यकक्षा: तथा योगविज्ञाने पी.जी.डिप्लोमाञ्च कृत्वा उपाधिमलभत्। UGC NET JRF परीक्षामुत्तीर्य बनारस हिन्दू विश्वविद्यालये 'न्यायसारस्य समीक्षा' इत्यास्मिन् विषये २०१७ मध्ये विद्यावरिध्युपाधिं लब्धा। शोधकार्यसमयात् २०१४ तमवर्षादारभ्य श्रीसोमनाथसंस्कृतविश्वविद्यालये दर्शनविभागे सहायिकाचार्यारूपेण कार्यरतास्ति। अस्याः राष्ट्रियान्ताराष्ट्रियपत्रिकासु ३२ शोधपत्राणि प्रकाशितानि। पुस्तकद्वयं सम्पादितम्। अस्याः मार्गदर्शने २ छात्रौ एम्.फिल/पी.एच.डी उपाधिं प्राप्तवन्तौ। अनया विविधशैक्षणिक-कार्यक्रमेषु ७० यावदामन्त्रितव्याख्यानानि प्रदत्तानि। अनया गुजरातपाठ्यपुस्तकमण्डलेन आयोजितपाठ्यपुस्तकलेखनकार्ये मध्यमाकक्षयोः पाठलेखिकारूपेणापि कार्यं कृतम्। राष्ट्रियान्ताराष्ट्रियकविसम्मेलनेष्वपि स्वीयकाव्यानि प्रस्तुतानि। अथ च Master Trainer of IKS इत्युपाधिरपि लब्धा। सम्प्रति विश्वविद्यालयस्य बह्वीषु समितिषु अध्यक्षत्वेन सभ्यत्वेन कार्यं निर्वहन्ती विशेषेण दर्शनविभागाध्यक्षा परीक्षाविभागे OSD रूपेण च कार्यरतास्ति।

---

### डॉ. जानकीशरण आचार्यः



राजस्थानस्थस्य जोधपुरमण्डले १९८५ तमे वर्षे लब्धजन्माः **डॉ. जानकीशरण आचार्यः** बी.ए. (ऑनर्स), ''शास्त्री'' एवञ्च स्वर्णपदकेन सह अद्वैतवेदान्ते ''आचार्यः'' इति उपाधिम् अलभत्। अयं UGC NET & JRF परीक्षाम् उत्तीर्य श्रीसोमनाथसंस्कृतविश्वविद्यालयात ''कृष्ण-विरचितस्वोपज्ञप्रभाव्याख्यासहितायाः कैवल्यदीपिकायाः पाठसम्पादनं समीक्षात्मकमध्ययनञ्च'' इति मातृकाशास्त्र-विषये विद्यावारिधिः (Ph.D) इत्युपाधिं प्राप्नोत्। असौ केन्द्रीय-संस्कृत विश्वविद्यालयस्य वेदव्यासपरिसरे दर्शनप्राध्यापकत्वेन कार्यं कृत्वा मार्च २०१४ आरभ्य श्रीसोमनाथसंस्कृतविश्वविद्यालये दर्शनविभागे सहायकाचार्यत्वेन कार्यरतोऽस्ति। अस्य राष्ट्रियान्ताराष्ट्रियपत्रिकासु ३९ शोधपत्राणि प्रकाशितानि। अनेन एतावता १३ पुस्तकानि सम्पादितानि। एतस्य मार्गदर्शने ५ छात्राः एम.फिल/पी.एच.डी. उपाधिं प्राप्तवन्तः। अनेन विविधशैक्षणिककार्यक्रमेषु ९८ आमन्त्रित-व्याख्यानानि प्रदत्तानि। सम्प्रति अयं द्वयोः शोधपरियोजनयोः मुख्यगवेषकरूपेण कार्यं कुर्वन् अस्ति। अनेन पाठ्यपुस्तकमण्डलद्वारा पाठ्यपुस्तकरचनायां लेखकरूपेण विविधसमयावधौ योगदानं प्रदत्तम्। विभिन्नैः पुरस्कारैः सभाजितः डॉ. आचार्यः विश्वविद्यालयस्यास्य विद्यापरिषद्, प्रकाशनसमितिः इत्यादिविभिन्न-समितिसु उल्लेखनीयं योगदानं प्रादात्। सम्प्रति अयं दर्शनसङ्कायप्रमुखरूपेण प्रोग्राम-ऑफिसर-रूपेण च कार्यरतोऽस्ति।

ISBN 938309767-8
9789383097678